
# संस्कृतसाहित्येतिहासः

## Course Code: B21SN03DE

Discipline Specific Elective Course
Undergraduate Programme in
Sanskrit Language and Literature
Self Learning Material



SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

# संस्कृतसाहित्येतिहासः

Course Code: B21SN03DE

Semester - V

## Discipline Specific Elective Course
## Undergraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SGOU

വിദ്യകൊണ്ട് സ്വതന്ത്രരാവുക

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# संस्कृतसाहित्योतिहासः

Course Code: B21SN03DE
Semester- V
Discipline Specific Elective Course
BA Sanskrit Language and Literature

SREENARAYANAGURU
OPEN UNIVERSITY


**Academic Committee**

Dr. C.T. Francis
Dr. Sreeja Priyadharshini
Dr. Smitha Sabu
Dr. K. Ratheesh
Dr. Jeena George
Dr. R. Maniyappan
Dr. Thara K.V.
Dr. K. Retheesh
Dr. M. Harinarayanan Mankulathillath
Dr. Susanth S.



**Development of the Content**

Radhamany Amma S.
Dr. Lekshmi C.
Dr. Sreeja J.

**Review and Edit**

Dr. G. Sahadevan

**Linguistics**

Dr. G. Sahadevan

**Scrutiny**

Dr. Sreeja J.,
Dr. Vijayarajan K.U.
Chitra Bhaskar
Dr. Jothilekshmi M.
Anju J.

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

Director, MDDC :
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.


Scan this QR Code for reading the SLM on a digital device.


**Edition**
January 2025



**Copyright**
© Sreenarayanaguru Open University



ISBN 978-81-982562-0-1



All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The University aims to offer you an engaging and thought-provoking educational journey. The undergraduate programme in Sanskrit Language and Literature is distinguished by its strong focus on grammar and comprehension components while still allocating sufficient attention to literary discussions within the curriculum. Sanskrit education, recognised for its high employability potential, necessitates a practical integration of both grammatical and literary aspects. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.



Warm regards.
Dr. Jagathy Raj V. P.

01-01-2025

## Contents


| | |
|---|---|
| **Block -1 वैदिकसाहित्येतिहासः** | 1 |
| Unit - 1 वेदाः | 2 |
| Unit - 2 वेदाङ्गानि | 10 |
| Unit - 3 संहिता, ब्राह्मणं, आरण्यकं च | 19 |
| Unit - 4 उपनिषदः | 27 |
| **Block - 2 वैदिककालानन्तरं संस्कृतसाहित्यम्** | 34 |
| Unit - 1 रामायणम् | 35 |
| Unit - 2 महाभारतम् | 45 |
| Unit - 3 पुराणानि -1 | 60 |
| Unit - 4 पुराणानि -2 | 67 |
| **Block - 3 काव्यप्रपञ्चः** | 75 |
| Unit - 1 भारतीयकाव्यसङ्कल्पः | 76 |
| Unit - 2 पञ्चमहाकाव्यानि | 82 |
| Unit - 3 गद्यकाव्यानि | 97 |
| Unit - 4 सन्देशकाव्यानि | 109 |
| **Block - 4 स्तोत्रकाव्यानि, चम्पूकाव्यानि च** | 115 |
| Unit - 1 स्तोत्रकाव्यशाखा | 116 |
| Unit - 2 प्रसिद्धस्तोत्रकाव्यानि | 123 |
| Unit - 3 चम्पूकाव्यलक्षणम् | 133 |
| Unit - 4 प्रसिद्धचम्पूकाव्यानि | 138 |
| **Block - 5 प्रशस्ताः रूपककर्तारः** | 146 |
| Unit - 1 शक्तिभद्रः | 147 |
| Unit - 2 श्रीहर्षः | 155 |
| Unit - 3 शूद्रकः, भट्टनारायणश्च | 162 |
| Unit - 4 विशाखदत्तः | 169 |
| **Block - 6 संस्कृतसाहित्ये योगदानं कृतवत्सु केरलीयेषु प्रमुखाः** | 175 |
| Unit - 1 के.एन्. एषुत्तच्छन्, डा.पी.के.नारायणप्पिल्लै | 176 |
| Unit - 2 डा. बालरामप्पणिक्कर्, सि. वि. वासुदेवभट्टितिरिः | 182 |
| Unit - 3 पि.सि.देवस्य, ए.आर्.राजराजवर्मा | 189 |

Unit - 4 केरलवर्मा वलियकोयित्तम्पुरान्, मेल्पत्तूर् नारायणभट्टपादः 195
Model Question Paper Set - 01 203
Model Question Paper Set - 02 206

SGOU

# BLOCK -1

# वैदिकसाहित्येतिहासः

SGOU

# Unit -1
# वेदाः

## उद्देश्यानि (Learning Outcomes)

- वैदिकसाहित्यस्य सामान्यज्ञानं सिद्ध्यति।
- वेदानां उपविभागानां च अधिकृत्य ज्ञानं वर्धते।
- वेदाभ्यसनतरीतिमधिकृत्य ज्ञानं वर्धते।
- भारतीयानां वाङ्मयवैशिष्ट्यमधिकृत्य ज्ञानं लब्धुं शक्यते।
- आचारानुष्ठानानां परिचयः लभते।

## प्राग्व्यपेक्षाः (Pre requisites)

संस्कृतसाहित्यं विषयदृष्ट्या द्विधा विभक्तं-वैदिकं लौकिकं च। वैदिकसाहित्यस्य वैशिष्ट्यं शब्दैः अभिव्यक्तुं न शक्यते। संस्कृतसाहित्यस्य सर्वमपि वैशिष्ट्यं वैदिकसाहित्यस्य आधारं एव। तत्तु स्वरूपदृष्ट्याऽपि वैदिकसाहित्यं नितान्तमेव सविपुलमस्ति। वेदाः मानवज्ञानस्य विश्वकोशत्वेन प्रसिद्धं भवति। तत्रैव सम्पूर्णभारतीयवाङ्मयस्य उपजीव्यं विद्यते। विश्वसाहित्ये वैदिकसाहित्यं परमोन्नतं स्थानमलङ्करोति। अत्र वेदाः, वेदाङ्गाः, संहिता, ब्राह्मणानि, आरण्यकानि, उपनिषदः इत्यादीनां प्राधान्यं सामान्येन प्रतिपादयति। प्राचीनकालादेव भारतवर्षोऽयं धर्मेण सदाचारेण संस्कृत्या च सकलस्यापि विश्वस्य श्रद्धाकेन्द्रः आसीत्। भारतदेशः वेदगवीनाम् उद्गमभूमिः इति, यासां समुपदेशेन पीयूषेन पाविताः सर्वे धर्माः। अत एव वैदिकधर्मः सुसमृद्धः। भारते अनेके धर्माः उपधर्माः च सन्ति, तेषां मूलस्रोतो वेदेभ्य एवं निर्गतमस्ति। तस्माद् वेद एव सर्वत्र धर्मे मूलं प्रमाणम्। अत एवोक्तम् "वेदोऽखिलो धर्ममूलम्'।

प्रवृत्ति-निवृत्ति-लक्षणस्य द्विविधस्यापि धर्मस्य मन्त्र-ब्राह्मणात्मको वेद एव गणनीयः। तत्र प्रवृत्तिलक्षणे धर्मो यागादिः निवृत्तिलक्षणे अद्वैतात्मज्ञानम्, तदेव परमोधर्मः इति कथ्यते। परम्परागत- प्राचीन दृष्ट्यानुसारम् अपौरुषेयवेदवदेव वेदमूलको सनातनधर्मोऽपि अपरिवर्तनाशीलो विद्यते। सर्वधा वेदोऽपि सर्वशेनापि धर्ममेव अभिवदति। अतः सर्वात्मना पुरुषार्थनिःश्रेयस्करं वेदमधीत्य तदर्थं च ज्ञात्वा यथाविधि कर्मण्यनुष्ठाय जनाः स्वाभिलषितं सुखं प्राप्नुयुः इति। एवं च सर्वश्रेयः- साधको निखिल-पुरुषार्थ-प्रापको धर्मो वेदादेव

यथावदधिगन्तुं शक्यते।

इत्थं वेदा धर्मार्थकाममोक्षाणां चतुर्णामेव वर्गाणां साधकाः। मानवानां यावन्तोऽनुभवविषयास्ते साकल्येन सूत्ररूपेण तत्र वर्णिताः। विषयबाहुल्येऽपि रचनासौष्ठवं क्रमबद्धतां च वैदिक साहित्यस्योल्लेखनीयं वैशिष्ट्यम्।

## मुख्यपदानि (Key terms)

वेदाः, ऋग्वेदस्य एकविंशतिशाखाः, चतुर्वेदाः, उपवेदाः।

## DISCUSSION

### 1.1. वेदाः

### 1.1.1. ऋग्वेदः

ऋच्यन्ते स्तूयन्ते अनया इति ऋक्। विश्वस्य प्राचीनतमं साहित्यं खलु वेदाः। वेदेषु प्राथम्यं ऋग्वेदस्य सिद्धयति भाषिकसंरचना-प्रतिपाद्यविषयादि दृष्ट्या एव। पौर्वापर्यविचारेण च इतरवेदापेक्षया ऋग्वेदस्य प्राथम्यं दृश्यते। ऋग्वेदस्य एकविंशतिशाखाः सन्ति। येषां विकासक्रमः पुराणेषु निर्दिष्टाः। वेदानां क्रमः तु कुत्रचित् ऋक्-साम यजुः अथर्वाणि, क्वचित् तु ऋक्-यजुः-साम-अथर्वाणि च इति। पैलः ऋग्संहितां व्यासादयः तां स्वशिष्यायेन्द्रप्रमितये बाष्कलाय च प्रोक्तवान्। स च तां चतुर्धा व्यस्य बोध्य- याज्ञवल्क्य-पराशर-अग्निमित्रेभ्यः पाठयामास। इन्द्रप्रमितिश्च माण्डूकेयं कविं पाठयामास। कविश्च देवमित्रं स च सौभर्यादीन्, देवमित्रश्च शाकल्यं च पाठयामास। स च तत्पञ्चधा व्यस्य वात्स्य-मुदुल-शालीय-गोखल्य-शिशिरान् पाठयमास। वात्स्यश्च जातूकर्ण्यं प्रोवाच। स च बलाक-पैल-वैताल-विरजेभ्यो ददौ।

शिष्यप्रशिष्यपरम्परया तस्य एकविंशतिशाखात्वम्। तासु शाकलबाष्कलसंहिते एव उपलभ्यते। शाकलसंहिता दशमण्डलेषु विभक्ता, प्रतिमण्डलं सूक्तानि प्रतिसूक्तम् ऋचश्च सन्ति। बाष्कलसंहिता तु अष्टाष्टकेषु विभक्ता। ऋग्वेदे १०२८ (1028) मितसूक्तानि ११००० (11000) मितमन्त्राः च। गृत्समद-विश्वामित्र-वामदेव-अत्रि-भरद्वाज-वसिष्ठादयो मन्त्रद्रष्टारः ऋषयः। अस्यापि द्वितीयमण्डलमारभ्य सप्तमण्डलपर्यन्तभागः प्राचीनतमः ततश्च क्रमेण प्रथमाष्टदशमण्डलानि भाषाविज्ञानदृष्ट्या। तत्रापि दशममण्डलं नितान्तमेव अर्वाचीनं प्रतिभाति विषयप्रौढिदृष्ट्यापि।

ऋग्वेदस्य संवादसूक्तान्यपि काव्यमयत्वाद् हृद्यानि भवन्ति। तेषु पुरूरुवउर्वशीसंवादः, यमयमीसंवादः एवं सरमापाणिसंवादः च प्रसिद्धाः। अत्र च सामाजिकरीतिसम्बद्धानि सूक्तानि च

लभ्यन्ते। एवमेव शकुनिसूक्तं, विवाहसूक्तं, पितृसूक्तं रहस्यसूक्तमिति च प्रसिद्धानि। तत्रत्यानि नासदीय-पुरुष-हिरण्यगर्भसूक्तानि दार्शनिकविषयाणि।

ऋग्वेदे सायणाचार्यस्य भाष्यं नितान्तं प्रामाणिकं गरिमामण्डितं च विद्यते। एवमेव वेङ्कटमाधवभाष्यं च। सायणाचार्यस्य ऋग्वेदभाष्यभूमिका, दयानन्दस्य ऋग्वेदादिभाष्यभूमिका च प्रसिद्धे। चतुर्वेदानां एकैकं संहिता - ब्राह्मण - आरण्यक उपनिषद्भागाः। अत्र मन्त्राणां संग्रहः संहिता (विषयप्रतिपादकं वचनं मन्त्रः), यज्ञादिवर्णनापरगद्यभागः ब्राह्मणः, वानप्रस्थकर्मविवेचकवचनम् आरण्यकं, ब्रह्मज्ञादिविषयविवेचनम् उपनिषद् च। ऐतरेयकौषितक्यौ च ब्राह्मणे यत्र प्रथमे अष्टौ पञ्चिकाः प्रतिपञ्चिकं पञ्चाध्याया इति संहत्य चत्वारिंशदध्यायाः द्वितीये तु त्रिंशदध्याया एव। एवमेव ऐतरेयशाङ्खायनौ च आरण्यके। अत्र दशसंख्याका उपनिषदः ऐतरेयप्रभृतयः समुपलब्धा ऋग्वेदशाखा शाकलसंज्ञिता।

एषा च अग्निसूक्तस्य

"अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्
होतारं रत्नधातमम्"। इत्यग्निप्रार्थनामन्त्रेण प्रारभते।

ऋग्वेदस्य उपवेदः भवति आयुर्वेदः।

**1.1.2. यजुर्वेदः**

इज्यते अनेन इति यजुः। यजुषां यज्ञविधानानां वेदो यजुर्वेदः। अत्र अध्वर्युसम्बद्धा प्रार्थनामन्त्राः संगृहीताः। प्रतिपादकविषयदृष्ट्या ऋग्वेदानन्तरं यजुर्वेदस्य स्थानम्। एकाधिकशतशाखासु विभक्तः यजुर्वेदः। तस्य द्वौ भेदौ 'शुक्लः' 'कृष्णः' च। शुक्लयजुर्वेदस्य पञ्चदश, कृष्णयजुर्वेदस्य षडशीतिः शाखाः च सन्ति। शुक्लयजुर्वेदे केवलं मन्त्रभागः विद्यते, कृष्णे तु व्याख्याविनियोगौ अपि। शुक्लस्य माध्यन्दिनकाण्वाभिधे द्वे शाखे। कृष्णस्य च तैत्तिरीय-मैत्रायणी- काण्वकपिष्ठलाभिधाः चतस्रः एव।

तत्र माध्यन्तिनशाखायां चत्वारिंशदध्यायाः १९७५ (1975) मितमन्त्राः च सन्ति। काण्वशाखायामपि तावन्तः एवाध्यायाः २०८६ (2086) संख्याकाः मन्त्राः। संहितैषा 'इषेत्वा' इत्यादिमन्त्रेण प्रारभ्य 'हिरण्मयेन पात्रेण' इति मन्त्रेण समाप्नोति। अत्र दर्शपौर्णमासौ, पिण्डपितृयज्ञः अग्निहोत्रं, चतुर्मास्योष्टिः अग्निष्टोमविधानं सोमयागः, राजसूयवाजपेययज्ञौ,

सौत्रामणिः उखाचयनं, वसोर्धारा, शतरुद्रीयं राष्ट्रभृत्, सोमसम्पादनविधिः, अश्वमेधप्रसङ्गः, पुरुषमेधः, सर्वमेधः, पितृमेधः ईशावास्योपनिषद् इत्यादिविषयाः सप्रपञ्चमुपवर्णिताः।

कृष्णयजुर्वेदे तैत्तिरीयप्रमुखा। अत्र सप्त काण्डानि चतुर्चत्वारिंशत् प्रपाठकानि ६३१ (631) मितानुवाकः। अत्र ब्राह्मण-आरण्यकोपनिषद्-श्रौत-गृह्य-धर्म-शुल्बसूत्रादि समस्तविषयाणां समावेशः। अस्यापि विषये यागानुष्ठानमेव प्रतिपादयति। मैत्रायण्यां चत्वारि काण्डानि, २१४४ (2144) मितमन्त्राश्च विद्यन्ते। काठकसंहितायां चत्वारिंशत् स्थानकानि ८४३ (843) मितानुवाकश्च। अस्यापि यागानुष्ठानमेव विषयः।

यजुर्वेदस्य उपवेदः धनुर्वेदः। शतपथब्राह्मणं शुक्लस्य शताध्याय निबद्धं, तैत्तिरीयब्राह्मणं कृष्णस्य तैत्तिरीयम् आरण्यकं च। शुक्लसम्बद्धा ईशाद्या एकोनविंशतिसंख्याका उपनिषदः, कृष्णयजुर्वेदसम्बद्धा द्वात्रिंशदिति यजुर्वेदसंम्बद्धा एकपञ्चाशत् उपनिषदः।

यजुर्वेदे भागद्वयं दृश्यते ऋग्भागो यजुर्भागो च। ऋग्भागे ऋग्वेदीया एव मन्त्राः संग्रहीताः, यजुर्भागे मौलिकः च सन्ति। शुक्लयजुर्वेदे उव्वटस्य महीधरस्य च भाष्यं प्रसिद्धम्। काण्वसंहितायां सायणस्य भाष्योपलब्धम्। तैत्तिरीये च सायणस्य भाष्यं प्रसिद्धम् ।।

### 1.1.3. सामवेदः

साम नाम गानम्। यदैव ऋचो गीयन्ते तदा साम भवति। सामवेदे १८२० (1820) मन्त्राः सन्ति। तेषु पञ्चसप्ततिसंख्याका मौलिका, अवशिष्टाः तु ऋग्वेद सम्बद्धा एव। तत्रापि अनेके तु बहुवारं पुनरुक्ता अपि। पुनरावृत्तिविरहे तु तत्र केवलं ९८५ (985) संख्याः मन्त्राः एव।

अस्य एकसहस्रसंख्याकशाखासु सम्प्रति तिस्रः उपलभ्यन्ते। ताः राणायनीय कौथुमजैमिनीयाख्याः। तत्र अपि कौथुमस्य केवलं सप्तमोऽध्याय एव लभ्यते। सामवेदस्य व्यासप्रभृतयः त्रयोदशाचार्याः। अयञ्च सहस्रधा गीयत इत्यस्य सहस्रवर्त्मत्वम्। प्रधानविषयः उपासन एव। अधिकांशमन्त्राः सोमयागसम्बद्धाः।

सामवेदः पूर्वार्चिकखण्डा उत्तरार्चिकखण्डा चेति द्विधा विभक्तम्। तत्र पूर्वं आग्नेय-ऐन्द्र-पवमान-आरण्यकपर्वसु विभक्तम्। उत्तरार्चिकं खण्डं बहुधा दशरात्रसंवत्सरैकाहाहीन सत्रप्रायश्चित्तक्षुद्रादि भेदाः च।

सामवेदस्य उपवेदः गान्धर्ववेदः। अस्य च ताण्ड्यप्रभृतयः अनेके ब्राह्मणाः। तेषु ताण्ड्यस्य प्रसिद्धिः सर्वाधिकाः। तदेव पञ्चविंशब्राह्मणसंज्ञयाऽपि ज्ञायते। छान्दोग्यप्रभृतयः षोडशोपनिषदः सामवेदीयाः। सायणकृतं भाष्यं प्रसिद्धम्। तस्यैव कात्यायन श्रौतसूत्रो गोभिल गृह्यसूत्रे च भाष्यं लभ्यते।

### 1.1.4. अथर्ववेदः

थर्वन् गतिः तस्याभावो अथर्वन्निति व्युत्पत्या अथर्ववेदः चित्तस्थिरीकरणोपायसम्बद्धः। थर्वति चरति कर्मा इति निरुक्तम्। अथवा अथ अर्वाक् इति अथर्वा। अर्वाक् इति अनन्तरार्थकं आभ्यन्तरार्थकं वा। अनन्तरार्थेऽयं वेदस्य अवशिष्टभागः आभ्यन्तरार्थे तु आत्मनः साक्षात्कारोपदेशकभागः। वस्तुतस्तु अथर्वा नाम कश्चिदृषिः तद् दृष्टमन्त्राणां संग्रहत्वेनायम् अथर्ववेदः। अथर्वाणां भृगूणां सह वेदेषु उल्लेखो दृश्यते। यथा-

"अङ्गिरसो न पितरो नवधा अथर्वाणो भृगवः सोम्यासः" इति।

अयमेव अथर्व-अङ्गिरस-अथर्वाङ्गिरस-ब्रह्म-भृग्वङ्गिर-क्षत्रभैषज्यछन्दो-महीत्यादिविविध संज्ञाभिः बोध्यते।

पैप्पलादशौनकादि नव भेदाः अथर्ववेदस्य। तत्र शौनकपैप्पलादशाखे एव समुपलभ्यते। 'शं नो' इति मन्त्रेण शौनकसंहिता प्रारभते। तत्र विंशतिः काण्डानि, ७३०(730) सूक्तानि, ५९८७ (5987) मिताः मन्त्राः च। अयमपि गद्यपद्यमयः। शौनकसंहितायां सायणभाष्यमम उपलभ्यते। पैप्पलादशाखा 'ये त्रिषप्ताः' इति मन्त्रेण प्रारभते।

अथर्ववेदस्य प्रतिपाद्यविषयाः अध्यात्म(ब्रह्मचर्यगृहस्थवानप्रस्थायुर्वेददादि)-अधिभूत(राष्ट्र राज्यादि)-अधिदैवतादीनि।

चतुर्वेदानाम् पठनेन किं किं अवगम्यते इति चिन्तयतु। वेदाः धर्मार्थकाममोक्षाणां साधकाः। वेदाः परलोकसाधका इति ज्ञानहीनानां (अज्ञानिना) उक्तिः। किन्तु यज्ञसम्पादनद्वारा धर्ममाचरयन्ति। सत्यऋतदीक्षातपोब्रह्मादिभिः च धर्ममाचरयितुं शक्यते। कृषि-वाणिज्य-पशुपालनशिक्षया अर्थोपार्जनम्, परिमितभोग-सहजीवन-गृहस्थोपपदेशादिभिः कामसेवनमुपदिशन्ति। एकेश्वरभक्तिः सर्वसमानभावशिक्षया मोक्षधर्मं च उपदिशन्ति। ते हि त्रैगुण्यविषयं तु शिक्षयन्त्येव, गुणातीतविषयमपि ते प्रतिपादयन्ति। तेन 'त्रैगुण्यविषयावेदाः' इति कथनमेकाङ्गमेव। 'ऋचो अक्षरे परमे व्योमन्' इति गुणातीतपदप्रशंस्यैव। सर्वातिशयत्वेन वेदाः कर्मोपदिशन्ति। अतः वेदाः पुरुषार्थसाधकाः इति।

**वेदाः किं सन्दिशन्ति?**

वेदाः खलु भारतीयसंस्कृतेः अमूल्यनिधिः। तेषु एव अनादिकलोपार्जितं मूल्यं सञ्चितमस्ति। वेदाः धर्मार्थकाममोक्षाणां चतुर्णामेव वर्गाणां साधकाः। यज्ञसम्पादनद्वारा सत्य-ऋत-दीक्षा-तपो-ब्रह्मादिभिरूपं निर्धारयन्ति। यथोक्तां- "सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्मा यज्ञः पृथिवीं

धारयन्ति"। अथर्ववेदे।। सत्यं, बृहद्, ऋतम्, उग्रं, दीक्षा, तपः, ब्रह्म (ज्ञानं), यज्ञः (यागादिक्रिया) एते खलु पृथिवीं धरयन्ति इति।।

## पुनरावृत्तिः (Recap)

- चत्वारो वेदाः सन्ति- ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः।
- ऋच्यन्ते स्तूयन्ते अनया इति ऋक्।
- ऋग्वेदस्य एकविंशतिशाखाः सन्ति।
- ऋग्वेदस्य संवादसूक्तान्यपि काव्यमयत्वाद् हृद्यानि भवन्ति।
- ऋग्वेदे प्रमुख सूक्तानि यम-यमी, पुरूरुवा-उर्वशी, सरमा-पाणि, नासदीय, विश्वामित्र-नदी प्रभृतयः।
- ऋग्वेदस्य उपवेदः भवति आयुर्वेदः।
- इज्यते अनेन इति यजुः। यजुषां यज्ञविधानानां वेदो यजुर्वेदः।
- ऋग्वेदे माध्यन्दिनशाखायां चत्वारिंशदध्यायाः १९७५ (1975) मितमन्त्राः च सन्ति।
- यजुर्वेदस्य द्वौ भेदौ 'शुक्लः' 'कृष्णः' च।
- शुक्लयजुर्वेदस्य पञ्चदश, कृष्णयजुर्वेदस्य षडशीतिः शाखाः च सन्ति।
- यजुर्वेदस्य उपवेदः धनुर्वेदः।
- यजुर्वेदे भागद्वयं दृश्यते-ऋग्भागो यजुर्भागो च।
- साम नाम गानम्। यदैव ऋचो गीयन्ते तदा साम भवति।
- सामवेदे १८२० (1820) मन्त्राः सन्ति।
- सामवेदे केवलं ९८५ (985) संख्याः मन्त्राः सन्ति।
- सामवेदस्य उपवेदः गान्धर्ववेदः।
- अथर्ववेदस्य पञ्च उपवेदाः सर्पपिशाचासुरेतिहासपुराणभेदात्।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. सम्प्रति कति वेदाः सन्ति ?
2. प्राचीनतमः वेदः कः?
3. ऋग्वेदे कति शाखाः सन्ति ?

4. ऋग्वेदस्य उपवेदस्य नाम किम् ?
5. यजुर्वेदे मन्त्राणां संख्या कियत्यः?
6. यजुर्वेदस्य द्वौ भेदौ कौ ?
7. उव्वटः कस्य भाष्यकारः?
8. अथर्ववेदे सूक्तानां संख्या कति?
9. सामवेदे कति मन्त्राः सन्ति ?
10. सामवेदस्य उपवेदस्य नाम किम् ?
11. चतुर्वेदेषु प्राथम्यं कस्य कल्प्यते?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. ऋग्वेदस्य संवादसूक्तानि कानि?
2. यजुर्वेदस्य कति शाखाः, कति भेदौ च?
3. यजुर्वेदस्य भागद्वयं किम्?
4. सामवेदस्य उपलभ्यमानाः शाखाः के?
5. अथर्ववेदस्य प्रतिपाद्यविषयाः के?

## एकैकया खण्डिकया उत्तरं लिखत।

**(Answer the following questions in a paragraph)**

1. ऋग्वेदे प्रमुखसूक्तानि कानि सन्ति ?
2. ऋग्वेदमधिकृत्य संक्षिप्तरूपेण लिखत?
3. चतुर्वेदाः के ?
4. सामवेदम् अधिकृत्य टिप्पणिं लिखत।
5. अथर्ववेदम् अधिकृत्य लघूपन्यासं लिखत।
6. यजुर्वेदम् अधिकृत्य लघूपन्यासं लिखत।

## निर्दिष्टाभ्यासः (Assignment)

1. ऋग्वेदः ।
2. कति वेदाः, के च ते ? विशदयत।
3. आधुनिकशिक्षायां वैदिकसाहित्यस्य प्रभावमधिकृत्य उपन्यासं रचयतु।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. चत्वारो वेदाः।
2. ऋग्वेदः।
3. एकविंशतिशाखाः।
4. आयुर्वेदः।
5. १९७५ (1975)
6. 'शुक्लः' 'कृष्णः' च।
7. शुक्लयजुर्वेदस्य।
8. ७३० (730)
9. १८२० (1820)
10. गान्धर्ववेदः।
11. ऋग्वेदः।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, कृष्णदास अकादमि, वारणसि।
2. डॉ. पारसनाथद्विवेदि, संस्कृतनिबन्धनवनीत, श्रीराम मेहरा एण्ड कम्पनी, आग्रा।
3. A.A Macdonell, History of Sanskrit Literature, Mothilal Banarasi Dass, New Delhi
4. A B. Keith Introduction to Sanskrit Literature, Mothilal Banarasi Dass, New Delhi

# Unit - 2
# वेदाङ्गानि

## उद्देश्यानि (Learning Outcomes)

- वैदिकसाहित्यस्य सामान्यज्ञानं सिद्ध्यति।
- वेदाङ्गानाम् अधिकृत्य ज्ञानं लभते।

## प्राग्व्यपेक्षाः (Pre requisites)

वेदाः खलु विश्वस्यैव प्राचीनतमं साहित्यम्। ज्ञानार्थकात् 'विद्' धातोः उत्पन्नो भवति वेदः। वेदः जीवानुभवानां संग्रहमपि मन्यते। पुरातनकाले संस्कृतसाहित्यस्य प्रथमस्रोतः भवति वेदः। वेदः मानवज्ञानस्य विशेषकोशः भवति। रामायणे 'अपौरुषेयं वाक्यं वेदः' इत्याहुः। वेदाः अनादि अपौरुषेयं च भवति। वेदाः चतुर्धा भवन्ति।

वेदाध्ययने उपयुक्तशास्त्रं भवति वेदाङ्गम्। वेदानाम् अङ्गः वेदाङ्गः। षट् विधानि वेदाङ्गानि सन्ति।

## मुख्यपदानि (Key terms)

वेदाङ्गानि, शिक्षायाः प्रयोजनम्, शिक्षाग्रन्थाः, कल्पसाहित्यम्, व्याकरणं वेदस्य मुखस्थानीयम्, व्याकरणस्य त्रयोदशप्रयोजनानि, यास्कः, पिङ्गलसूत्रम्, ज्योतिषविषयग्रन्थाः।

## Discussion

### 1.2.1. वेदाङ्गानि

वेदानाम् अङ्गानि वेदाङ्गानि। वेदार्थावगमनाय विशिष्टा अध्ययनप्रणाली वेदाङ्गत्वेन समाख्याता। कालक्रमेण क्षीयमाणबुद्धीनां जनानां कृते वेदा दुरूहाः सञ्जाताः। अत एव तत्र मन्त्राणां उच्चारणाविषये वैदिकशब्दज्ञानविषये, वेदनिर्दिष्टकर्मप्रतिपादनविषये, तन्निर्वचनविषये, तद्गतवृत्तविषये, तत्प्रतिपाद्यकर्मविधानकालविषये च पृथक् विवेचनमपि आवश्यकं सञ्जातम्। प्रथमं तु वेदाङ्गानां वेदमन्त्रैः सहैव अध्ययनं अभिमतं आसीत्। किन्तु कालक्रमेण ते पृथक् ग्रन्थत्वेन उपस्थापिता दृश्यन्ते। वेदाङ्गानि षट्- शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः,

ज्योतिषम् इति। तत्र छन्दो वेदस्य पादौ, कल्पो वेदस्य हस्तौ, ज्योतिषं चक्षुः, निरुक्तं श्रोत्रे, शिक्षा घ्राणं, मुखं व्याकरणमिति।

**1. शिक्षा**

शिक्ष्यते प्रतिबोध्यते इति शिक्षा। तैत्तिरीयोपनिषदि "वर्णः स्वरः। मात्रा बलम्। साम सन्तानः" इत्युक्तम्। तेन वर्णस्वरमात्राबलसामसन्तानात्मका शिक्षा। अकारादयः वर्णाः, उदात्तादयः स्वराः, मात्रा ह्रस्वादिः, स्थानप्रयत्नौ बलं, निषादादिः सामः, सन्तानो विकर्षणादिः येषाम् अवबोधनमेव शिक्षायाः प्रयोजनम्। शिक्षायाम् अक्षरविज्ञानं स्वरविज्ञानं सन्धिविज्ञानं निवृत्तिविज्ञानं संहितापाठः पदपाठः च इत्यादिविषयाः समाविष्टाः। तत्र वर्णानाम् उच्चारणविधिः अक्षरविज्ञानं, स्वराणाम् उदात्त-अनुदात्त-स्वरितभेदेन उच्चारणज्ञानं स्वरविज्ञानम्। वेदपाठे द्वयोरेव महानुपयोगः। यथोक्तम् –

> मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
> स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।इति।

प्रतिसंहितं शिक्षाग्रन्थोऽपेक्षते सम्प्रति त्रिंशत् सङ्ख्याका एव लभ्यन्ते। ते च याज्ञवल्क्य-वसिष्ठ-कात्यायन-पराशर-माण्डव्य-अमोघानन्दन-नारद-शौनक-गौतम-माण्डूक-पाणिनिप्रभृतिप्रणीताः येषां पाणिनीयशिक्षा सर्वोत्कृष्टत्वेन गृहीता। शिक्षाग्रन्थाश्च सूत्रशैल्या संगृहीताः। कानिचित् शिक्षाग्रन्थाः संक्षेपेण विविच्यन्ते-

पाणिनीयशिक्षा - शिक्षेयं दासीपुत्रस्य पाणिनेः कृतित्वेन सम्मता। अत्र हि मन्त्राणाम् उच्चारणविधिनिर्दिष्टः अस्ति। अस्य अनेके टीकाग्रन्थाः लभ्यन्ते।

याज्ञवल्क्यशिक्षा- इयं शिक्षा शुक्लयजुर्वेदस्य वाजसनेयीयसंहिता सम्बद्धा। वैदिकस्वराणां सोदाहरणं विवेचनपूर्वकं वर्णानां लोपागमविकारप्रकृतिभावादिसन्धीन् विशदयति। तथैव वर्णानां भेदस्य स्वरूपस्य पारस्परिकं साम्यवैषम्ये च विवेचयति।

वासिष्ठीशिक्षा - एषापि शुक्लयजुर्वेद सम्बद्धैव। यत्र निर्दिष्टं यद्यजुर्वेदे ऋचां १४६७ (1467) मितसङ्ख्याऽस्ति यदा यजुषां २८२३ (2823) मिता।

कात्यायनी शिक्षा - इयमपि शुक्लयजुर्वेदसम्बद्धा। अत्र हि जयन्तस्वामिनो विवृतिः लभ्यते।

नारदीयशिक्षा- एषा सामवेदसम्बद्धा। अत्र शोभाकरस्य टीका समुपलभ्यते।

एवमेव गौतमी शिक्षा लोमशी शिक्षा च।

एवं पाराशरीशिक्षा, माण्डव्यशिक्षा, माध्यन्दिनी शिक्षा, केशवी शिक्षा.... इत्यादयः ।

एतदतिरिक्तं मल्लशर्मशिक्षा, स्वराङ्कुरशिक्षा, षोडशश्लोकी शिक्षा, अवसाननिर्णयशिक्षा, स्वरभक्तिलक्षण शिक्षा.... इत्यादयः च।

प्रातिशाख्यम् अपि शिक्षाया एव अङ्गम्। प्रातिशाख्यं प्रतिसंहितं विद्यत इति विश्वस्यते। अत्र उच्चारणं स्वरविधानं, वर्णानां लोपागमादि विचारश्च वर्ण्यविषयाः ।।

**2. कल्पः**

"कल्पो वेदविहितानां कर्मणामानुपूर्वेण कल्पनाशास्त्रम्।" साहित्यमिदं ब्राह्मणसाहित्येन सह प्रत्यक्षतः सम्बद्धम्। ब्राह्मणेषु निरूपितानां यज्ञानां क्रमबद्धनिरूपणमेव कल्पसाहित्यस्य प्रयोजनम्। कल्पसाहित्यं श्रौतसूत्र-गृह्यसूत्र- धर्मसूत्र-शुल्बसूत्रभेदाद् चतुर्धा विभक्तम्।

श्रौतसूत्रं हि वेदोक्तयागादीनां क्रमबद्धम् अध्ययनम्। अत्र दर्श-पूर्णमास- पिण्डपितृयाग – आग्रयणेष्टिचातुर्मास्य- निरूढपशु - सोमयाग - सत्र गवानायन - वाजपेय - राजसूय सौत्रामणि अश्वमेध, पुरुषमेध अहीनादीनं यथाक्रमं विशदयति। प्रतिसंहितं पृथक् एव श्रौतसूत्रं कल्प्यते। ऋग्वेदस्य आश्वलायन शाङ्खायनाभिधे द्वे श्रौतसूत्रे, यजुर्वेदस्य कात्यायनाभिधम् एकम्, कृष्णयजुर्वेदस्य बोधायन-आपस्तम्बादीनि सप्त, सामवेदस्य लाट्यायन - द्राह्यायण - राणानीयाभिधानि त्रीणि, अथर्ववेदस्य वैतानाख्यमेकमेव श्रौतसूत्रं च समुपलम्भन्ते। कात्यायनश्रौतसूत्रे कर्काचार्यस्य भाष्यम् अपि लभ्यते। अत्र षड्विंशतिः अध्यायाः।

गृहे भवं गृह्यमिति। गृहस्थकर्मसंबन्धं यत्कर्म तादृशकर्मनिरूपकं सूत्रम् गृह्यसूत्रम्। अत्र प्राधान्येन यज्ञाग्निसन्दीपनं, गृह्ययज्ञविभाजनं, सायंप्रातःपूजा... इत्यादिविषयाः प्रतिपाद्याः। ऋग्वेदसम्बद्धानि त्रीणि गृह्यसूत्राणि। यजुर्वेदसम्बद्धं एकमेव गृह्यसूत्रम्। शुक्लयजुर्वेदसम्बद्धानि गृह्यसूत्राणि अपि अस्ति। सामवेदसम्बन्धानि गृह्यसूत्राणि गोभिलाख्यादिः, अथर्ववेदसम्बद्धं गृह्यसूत्रं कौशिकाख्यं च अस्ति। इत्थं सुसमृद्धं गृह्यसूत्रसाहित्यं संस्कृतसाहित्ये दृढमूलं भवति।

धर्मसूत्रं नाम कल्पसूत्रस्य तृतीयः प्रकारः। अत्र वर्णानाम् आश्रमाणाञ्च आचारवर्णनेन सहैव कर्तव्यमपि निरूपितमस्ति। इमानि तात्कालिकजीवनस्य दर्पणा खलु एव। गौतम-बौधायन-आपस्तम्ब- हिरण्यकेशि वसिष्ठादीनां धर्मसूत्राणि समुपलभ्यन्ते। धर्मस्वरूपं, चतुर्णामेव वर्णनामाचाराः कर्तव्यानि जीवनवृत्तयः च, चतुर्णामेव आश्रमाणाम् एवाचाराः मिश्रितजातेः

स्वरूपादिविवेचनं, सपिण्डनं पापाः तेषां प्रायश्चित्तानि च, व्रतानां नियमाः, आशौचं, न्यायव्यवहारौ, राजधर्माः स्त्रीधर्माः, पुत्रविचारः, स्त्रीधनं, दायव्यवस्था इत्यादयः धर्मसूत्रस्य विषयाः।

शुल्बं नाम रज्जुः तेन शुल्बसूत्रं नाम वेद्या मापनिर्धारकसाहित्यं श्रौतसूत्रसम्बद्धम्। बौधायन-आपस्तम्ब-कात्यायनाभिधानि त्रीणि शुल्वसूत्राणि लभ्यन्ते। कात्यायनशुल्बसूत्रं शुक्लयजुर्वेदीयं, बौधायन-आपस्तम्बाख्यः कृष्णयजुर्वेदीयं च।

भारतीयजीवने सूत्रसाहित्यस्य महत् स्थानं दृश्यते। एतद् भारतीयजीवनपद्धतेः दर्पण एव। विशेषतो चतुर्णां वर्णानामाश्रमाणाञ्च साङ्गोपाङ्गं विशदीकरणमेव। सर्वेषामपि कर्तव्यैः सह धार्मिक्यः प्रथाः निरूपिताः सन्ति। ब्राह्मणानां परिशिष्टत्वेन एषां वेदाङ्गत्वम्।

**3. व्याकरणम्**

अपरं वेदाङ्गम् भवति व्याकरणम्। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम्। "साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः" इति भर्तृहरिः आह। शब्दसाधुत्वासाधुत्वव्याख्यानरूपेण व्याकरणेन पदादिविभागशः ऋग्वेदादयो ज्ञायन्त इति। व्याकरणस्य केवलं वेदाङ्गत्वम् अपि तु वेदानां वेदत्वमपि। अतिप्राचीनकालादेव वेदाख्यायनाय शब्दानुशासनस्य प्रातिशाख्यनिरुक्तव्याकरणरूपा समृद्धा रीतिः आसीत्। व्याकरणं हि वेदाङ्गेषु मुख्यत्वेन गृहीतम्। 'मुखं व्याकरणं स्मृतम्' इति पाणिनीयशिक्षादौ उक्त्वाद् व्याकरणं वेदस्य मुखस्थानीयम्। ब्राह्मणेषु व्याकरणस्य क्रमबद्धमध्ययनं दृश्यते।

पदानां प्रकृतिप्रत्ययविवेचनेन तस्य वास्तविकस्वरूपप्रतिपादन शास्त्रमेव व्याकरणम्। महाभाष्ये व्याकरणस्य सामान्यतः त्रयोदशप्रयोजनानि उक्तानि। तत्रापि शब्दानुशासनमेव व्याकरणस्य मुख्यं प्रयोजनम्। तच्च रक्षा-ऊह-आगम-लघु-असन्देहार्थमेव। रक्षा वैदिकशब्दानां ज्ञानं, ऊहः अर्थकल्पना प्रकृतिप्रत्ययविश्लेषणतः, आगमो व्युत्पत्तिज्ञानं, लघुः लघुनोपायेन शब्दज्ञानाय, असन्देहः सन्देहस्य अभावः इति। प्रथमं हि वैदिकशब्दा एव व्याकरणस्य विषया आसन्। अनन्तरं तत्र लौकिकशब्दानाम् अपि समावेशः संजातः। पाणिनि, वररुचि, पतञ्जलिः च व्याकरणशास्त्रस्य मूर्तित्रयम्। पाणिनेः अष्टाध्यायी, वररुचेः वृत्तिकारित्वम्, पतञ्जलेः महाभाष्यं च लभ्यते। प्रक्रियासर्वस्वं, रूपमाला, प्रक्रियाकौमुदी, सिद्धान्तकौमुदी, लघुसिद्धान्तकौमुदी.... इत्यादयः अनेकव्याकरणग्रन्थाः समुपलभ्यन्ते। संस्कृतसाहित्ये सुसमृद्धं व्याकरणसाहित्यं

शब्दानुशास्त्रस्य शास्त्रं भाषिकसंरचनानिर्धारकं च। 'वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिं पाणिनिं सूत्रकारञ्चप्रणतोऽस्मि मुनित्रयम्।' इति प्रार्थना प्रसिद्धा खलु ?

**4. निरुक्तम् ।**

वेदाङ्गेषु प्रधानेषु अन्यतमं भवति निरुक्तम्। मूर्तत्वेन प्रथमं निरुक्तं यास्कप्रणीतमेव। निरुच्यते निःशेषेण उपदिश्यते तत्तद् अर्थावबोधनाय पदजातं तद् निरुक्तम्। वैदिकपदानां व्युत्पादनमेव अस्य विषयः। निरुक्तस्य परम्परा नितान्तप्राचीना दृश्यते। वैदिकशब्दानाम् अर्थनिर्धारणमेव यास्कप्रणीतनिरुक्तस्य प्रतिपाद्यविषयः। अस्य च वर्ण्यविषयस्य त्रीणि रूपाणि, मन्त्रार्थज्ञानं, देवविद्या, निर्वचनं च। ननु निर्वचनमुखेन पदानाम् अर्थावगमो व्याकरणादपि सिद्ध्यति। वर्णोच्चारणदि ज्ञानमपि शिक्षाग्रन्थतः भवति। निरुक्तस्य तद्भिन्नत्वं इत्यपेक्षायाम् उच्यते - मन्त्राघटकपदार्थ ज्ञानाय निरुक्तस्य पृथग् आवश्यकता इति। पदव्याख्यानेन अर्थावबोधकत्वाद् वेदोपकारकन्वेन वेदाङ्गत्वं सिद्ध्यति।

यास्को हि निरुक्तकारः कदाऽभूदिति विषये विदुषां विमतिः। तस्य कालः केचन सप्तमशतकं मन्यन्ते। यास्काचार्यः प्रथमं निघण्डुमेव उपस्थापयति, नैघण्डुकाण्डे किन्तु स नैव तावत् पर्यन्तमेव बद्धसीमो भवति। स हि प्रसङ्गप्राप्तानाम् अन्येषां अपि शब्दानां निर्वचनं प्रस्तौति। निर्वचनेन सहैव प्रसङ्गप्राप्तान् व्याकरण साहित्यप्रभृति विषयानपि निर्दिशति।

अयं ग्रन्थः द्वादशाध्यायेषु विभक्तः। यत्र आद्य त्रयोऽध्यायाः नैघण्टुकाः तदनन्तरं त्रय अध्यायाः नैगमाः, सप्तमाध्यायादारभ्य द्वादशाध्यायपर्यन्तं षडध्याया दैवताः परिशिष्टं च। ग्रन्थारम्भे निघण्डुः पञ्चाध्यायात्मकः। केचित् निघण्डुः अज्ञातकर्तृकं कश्यपकर्तृकं वा इति मन्यन्ते। किन्तु वस्तुतस्तु निघण्डुर्नाम वैदिकशब्दानां समूह एव। न केवलं वैदिकशब्दार्थ अवबोधनदृष्ट्या अपितु भाषाशास्त्रदृष्ट्यापि निरुक्तस्य महत्वं सर्वान् अतिशेते। निरुक्तस्य बहवो भाष्याकारा अभूवन्, तेषु दुर्गाचार्यः मूर्धन्यत्वे स्मर्यते। तेषु सर्वेषु स्कन्दस्वामी प्राचीनतमः।

**5. छन्दः**

"यदक्षरपरिमाणं तच्छन्दः"। सङ्ख्याविशेषे वर्णनां सत्ता छन्दः। वैदिकमन्त्राणां छन्दोबद्धतया तेषां ज्ञानं विना मन्त्राणां सम्यक् उच्चारणं न सम्भवतीति छन्दसां वेदाङ्गत्वम्। वेदे वार्णिकछन्दास्येव प्रयुक्तानि सन्ति। तेषां हि प्रतिपादं निर्धारितवर्णसंख्या। तेषु गायत्री-अनुष्टुप्-त्रिष्टुप्-जगति.... इत्यादीनि छन्दांसि प्रयुक्तानि दृश्यन्ते।

छन्दः शास्त्रं प्राचीनतमं साहित्यं खलु। ब्राह्मणेषु अपि छन्दसां विषये बहूक्तम् अस्ति। ग्रन्थकारत्वेन ऋक्प्रातिशाख्यं प्रथमा कृतिः यत्र वैदिकछन्दसां विवेचना कृतास्ति। तत्र

षोडशसप्तदशाष्टादश पटलेषु वैदिकछन्दोविषय बहुशो निर्दिष्टम्। एवमेव शाङ्ख्यायन श्रौतसूत्रे, सामवेदस्य निदानसूत्रे, पिङ्गलस्य छन्दःसूत्रे च छन्दोविषयः सोपपत्तिकं प्रतिपादितः अस्ति। कात्यायनस्य सर्वानुक्रमाण्यमपि छन्दोविषये बहु प्रतिपादितम् अस्ति। वस्तुतः पिङ्गलछन्दःसूत्रं तु पूर्वार्धे वेदप्रयुक्तच्छन्दसां विवेचनमस्ति, उत्तरार्थे तु लौकिकछन्दसामेव। वैदिकच्छन्दसां संख्या षट्विंशतिः इति।

छन्दःसाहित्ये पिङ्गलसूत्रमेव वृत्तशास्त्रग्रन्थम् प्रथमं गणनीयम्। पुनः केदारभट्टस्य वृत्तरत्नाकरे षडध्यायाः सन्ति। तस्य पञ्चविंशत्याधिकाः टीकाः सन्ति। गङ्गादासस्य छन्दोमञ्जरी षड्भिः स्तबकैः निबद्धा। क्षेमेन्द्रस्य सुवृत्ततिलकम्, हेमचन्द्रस्य छन्दोऽनुशासनम् चेति केचन प्रसिद्धाः छन्दोविषयक ग्रन्थाः। वेदस्य पादत्वेन छन्दः साहित्यमपि सुविपुलं सुस्पष्टं च।।

### 6. ज्योतिषम्

वेदानां चक्षुस्त्वेन ज्यौतिषं सम्मतमस्ति। सर्वस्य लोचनं शास्त्रं, शास्त्राणां लोचनं, वेदानां लोचनं च, इत्यादिभिः महनीयत्वेन ज्योतिषं च प्रथमगणनीयम्।

होरा सिद्धान्त-संहिताभेदात् ज्योतिषे त्रिस्कन्धं भवति। ज्योतिषसाहित्यमपि संहितावदेव प्राचीनम्। संहितासु यत्र तत्र ज्योतिषविषये बहूक्तम् अस्ति।

यागादयो निर्धारितमुहूर्ते एव सम्पादनीया। यागादयः केचित् प्रातः केचित् रात्रौ केचित् वसन्तकाले च सम्पाद्याः। केचित् नक्षत्र-तिथि-वारादिभिः संबद्धाश्च भवन्ति। तादृशकालज्ञानाय ज्योतिषं आवश्यकम् इति बोध्यम्। वेदनिर्दिष्टकर्मसम्पादनयोग्यकालसंसूचनेन तस्य उपकारकत्वात् ज्योतिषस्य वेदाङ्गत्वम्। संहितासु ब्राह्मणादिषु च ज्योतिषस्य प्राधान्यं कल्पयति। ऋग्वेदीय ज्योतिषसम्बद्धा षट्त्रिंशत्, यजुर्वेदीयसम्बद्धा त्रयचत्वारिंशत्, अथर्वणविषये द्विषष्ट्युत्तरशतमिति एकचत्वारिंशदुत्तरद्विशतमितपद्यानि सन्ति। यजुर्वेदसम्बद्धभागे सोमाकरस्य भाष्यमपि लभ्यते।

लौकिकप्रकरणे आर्यभटस्य आर्यभटीयं, वराहमिहिरस्य पञ्चसिद्धान्तिका, भास्कराचार्यस्य सिद्धान्तशिरोमणिः ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तः, केशवस्य ग्रहकौतुकं, भोजदेवस्य राजमृगाङ्ककरणम् .... इत्यादयः बहवः ज्योतिषविषयग्रन्थाः सन्ति।

छन्दः पादौ वेदस्य हस्तौ कल्पोऽथ पठ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रेत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्

तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।

## पुनरावृत्तिः (Recap)

- वेदानाम् अङ्गानि वेदाङ्गानि।
- वेदाङ्गानि षट्- शिक्षा, कल्पः व्याकरणं, निरुक्तं, छन्दः, ज्योतिषम् इति।
- शिक्ष्यते प्रतिबोध्यते इति शिक्षा।
- कल्पसाहित्यं श्रौतसूत्र-गृह्यसूत्र- धर्मसूत्र-शुल्बसूत्रभेदाद् चतुर्धा विभक्तम्।
- गृहस्थकर्मसंबन्धं यत्कर्म तादृशकर्मनिरूपकं सूत्रम् गृह्यसूत्रम्।
- धर्मसूत्रं नाम कल्पसूत्रस्य तृतीयः प्रकारः। अत्र वर्णानामाश्रमाणाञ्च आचारवर्णनेन सहैव कर्तव्यमपि निरूपितमस्ति।
- व्याकरणं हि वेदाङ्गेषु मुख्यत्वेन गृहीतम्।
- पाणिनिः, वररुचिः, पतञ्जलिः च व्याकरणशास्त्रस्य मूर्तित्रयम्। पाणिनेः अष्टाध्यायी, वररुचेः वृत्तिकारित्वम्, पतञ्जलेः महाभाष्यं च लभ्यन्ते।
- प्रथमं निरुक्तं यास्कप्रणीतमेव।
- वैदिकशब्दानां संग्रहः निरुक्ते संगृहयति।
- वेदानां चक्षुस्त्वेन ज्योतिषं सम्मतमस्ति।
- लौकिकप्रकरणे आर्यभटस्य आर्यभटीयं, वराहमिहिरस्य पञ्चसिद्धान्तिका, भास्कराचार्यस्य सिद्धान्तशिरोमणिः, ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तः, केशवस्य ग्रहकौतुकं, भोजदेवस्य राजमृगाङ्ककरणम् .... इत्यादयः बहवः ज्योतिषविषयग्रन्थाः सन्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. कल्पस्य कति भेदाः सन्ति ?
2. वेदोक्तयागादीनां क्रमबद्धमध्ययनं सूत्रं किम् ?
3. कल्पसूत्रस्य तृतीय प्रकारः किम् ?
4. वेदाङ्गेषु मुखत्वेन गृहीतं किम्?
5. "साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः" कस्येदं कथनम्?
6. ‘अष्टाध्यायी’ इत्यस्य ग्रन्थस्य रचनाकारः कः?
7. निरुक्तस्य प्रणीतः कः?
8. वैदिकशब्दानां संग्रह कस्मिन् ग्रन्थे संगृहयति ?
9. वेदानां नेत्ररूपेण किं स्वीक्रियते ?
10. सिद्धान्तशिरोमणिः नामकस्य ग्रन्थस्य कर्ता कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत
**(Answer the following questions in one or two sentences)**

1. कल्पस्य भेदाः के ?
2. वेदाङ्गेषु कल्पस्य स्थानम्।
3. गृह्यसूत्रं किम् ?
4. धर्मसूत्रे किं निरूपयति ?
5. ‘मुखं व्याकरणं स्मृतम्’ विशदयत।
6. द्वयोः छन्दशास्त्रग्रन्थयोः नाम लिखतु?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. वेदाङ्गे शिक्षायाः प्रयोजनं किम् ?

2. व्याकरणशास्त्रस्य मूर्तित्रयं किम्?
3. निरुक्तस्य प्रयोजनं किम्?
4. वेदाङ्गानि कानि ? तेषु व्याकरणस्य प्राधान्यं लिखत ।
5. छन्दशास्त्रम् अधिकृत्य लघूपन्यासं लिखत।
6. निरुक्तं अधिकृत्य लघूपन्यासं लिखत।

## निर्दिष्टाभ्यासः (Assignment)

1. वेदाङ्गानि कानि विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. चतुर्धा।
2. श्रौतसूत्रम्।
3. धर्मसूत्रम्।
4. व्याकरणम्।
5. भर्तृहरिः।
6. पाणिनिः।
7. यास्कः।
8. निरुक्ते।
9. ज्योतिषम्।
10. भास्कराचार्यः।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, कृष्णदास् अकादमि, वारणसि।
2. डॉ. पारसनाथद्विवेदि, संस्कृतनिबन्धनवनीत, श्रीराम मेहरा एण्ड कम्पनी, आग्रा।
3. A.A Macdonell, History of Sanskrit Literature, Mothilal Banarasi Dass, New Delhi
4. A B. Keith Introduction to Sanskrit Literature, Mothilal Banarasi Dass, New Delhi

# Unit - 3
# संहिता, ब्राह्मणं, आरण्यकं च

## उद्देश्यानि (Learning Outcomes)

- वैदिकसाहित्यस्य सामान्यज्ञानं सिद्ध्यति।
- संहिता, ब्राह्मणं, आरण्यकं इत्यादीनां विषये ज्ञानं संवर्धयते।
- ब्राह्मणं संहिता इत्यादीनाम् अमूल्यतायाः परिज्ञानं सिद्ध्यति।
- भारतीयानां वैदिकसाहित्यमधिकृत्य सामान्यज्ञानं विशिष्टज्ञानं च सम्पादयति।

## प्राग्व्यपेक्षाः (Pre requisites)

संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्तते। अखिलभूमण्डलेऽस्मिन् समुपलब्धेषु विविध भाषागतप्राचीनग्रन्थेषु वेदः सर्वेभ्यः प्राचीनतमः इति सर्वैरेव अङ्गीक्रियते। वेदो धर्मनिरूपणे स्वतन्त्रभावेन प्रमाणम्, स्मृत्यादयः तु तन्मूलकतया। श्रुतिस्मृत्योः विरोधे श्रुतिरेव गरीयसी। न केवलं धर्ममूलतया एव वेदाः समादृताः, अपितु विश्वस्मिन् सर्वप्राचीनग्रन्थतयाऽपि। प्राचीनानि धर्मसमाजव्यवहारप्रभृतीनि वस्तुजातानि बोधयितुं श्रुतय एव क्षमन्ते। प्रधानतया वेदो द्विविधः- मन्त्ररूपो ब्राह्मणरूपः च। तथा च संहिता-ब्राह्मण-आरण्यक-उपनिषदः इति वेदस्य चत्वारः विभागाः विद्यन्ते।

## मुख्यपदानि (Key terms)

मन्त्रसंहिता, वेदसंहिता, ब्राह्मणम्, ब्राह्मणप्रभेदाः, आरण्यकम्, आरण्यके प्रतिपाद्यविषयः।

## Discussion

### 1.3.1. संहिता।

वैदिकसाहित्यस्य चत्वारः विकासस्तराः भवन्ति। संहिता, ब्राह्मणं, आरण्यकं, उपनिषद् च। स्तरेसंहितायां वैदिकसाहित्यं स्तुतिप्रदानं एवं काव्यस्वरूपं च आसीत्। संहितायां मन्त्राणि

अन्तर्भवन्ति। मन्त्राणां समूहः सूक्तः, एवं सूक्तानां समुच्चयः संहिता च भवति। मन्त्रसंहिता चतुष्टयं भवति-ऋक्संहिता, यजुःसंहिता, सामसंहिता एवं अथर्वसंहिता च।

ऋषीणां सूक्तानां समाहारः भवति वेदसंहिता। सुष्टु उक्तं सूक्तम्। ऋषिदेवता छन्दः इत्येतेषां ऐक्यद्वारा समानस्वभावयुक्तं मन्त्रसमूहः सूक्तम्। प्रकृतिशक्तीनां देवतानां वा प्रीत्यर्थं ऋषयः सूक्तानि कृतवन्तः। पतञ्जलिमहर्षे अभिप्रायमनुसृत्य वेदचतुष्टयार्थं ११३१ (1131) संहिताः आसन्। किन्तु एतेषां सर्वेषां उपलब्धिः नासीत्। यद्यपि कतिपयानां संहितानां क्षयोऽभवन् तथापि पूर्वकृतपुण्य इव वेदमन्त्राः अधुनापि अक्षयो भूत्वा वर्तन्ते।

मन्त्राणां पठनेन अर्थचिन्तायाः प्रामुख्यो अभवत्। तद्वारा व्याख्यापद्धतिः च अभवत्। व्याख्यापद्धतिः गद्यात्मकम् आसीत्। व्याख्यानानां बाहुल्येन ते साहित्यविभागरूपेण रूपीकृताः। तद्वद् वेदमन्त्राणां अनुबन्धरूपेण ब्राह्मणं, तेषां अनुबन्धरूपेण आरण्यकं, तेषां अनुबन्धरूपेण उपनिषद् च। एकैकायां संहितायां प्रत्येकं ब्राह्मण-आरण्यक-उपनिषत्त्रयं चासन्।

ऋग्वेदमन्त्रेषु प्रमुखतया अभीष्टसिद्ध्यर्थं अनभीष्टनिवृत्यर्थं च देवतां प्रति प्रार्थना भवन्ति। अग्निमित्र-वरुण-इन्द्र-रुद्र-विष्णु-सरस्वतीत्यादयः देवताः, रात्रि- सूर्यः- चन्द्रः- नदी- पर्वत- समुद्राद्याः च मन्त्रैः स्तूयन्ते। यद्यपि मन्त्रेषु अनेकान् स्तूयन्ते तथापि सत्यस्य एकत्वे एव विश्वसति ऋषयः।

वैदिककाले ऋषयः सर्वलोकानां मंगलमेव प्रार्थयति। वेदस्य अत्युदात्तमन्त्रेषु एकः भवति ऐक्यमन्त्रः। "लोकासमस्ता सुखिनो भवन्तु" इति च स्मर्तव्यम्।

**1.3.2. ब्राह्मणम्**

वेदनिर्दिष्टः कर्मप्रतिपादनग्रन्थः ब्राह्मणम्। वेदव्याख्यातृत्वादेव ब्राह्मणस्यापि वेदत्वम्। ब्राह्मणसाहित्यं अधिकं गद्यात्मकं विद्यते। ब्रह्मणप्रतिपाद्यानां विषयाणां त्रेधा विभागः- विधिभागः, अर्थवादभागः, उपनिषद्भागः चेति। विधिभागे यज्ञविषयकप्रयोगात्मक नियमानां वर्णनमस्ति। अर्थवादे उपाख्यानकथादिमाध्यमेन प्रायोगिकरहस्यस्य सूक्ष्मता परिज्ञानं सम्पाद्यते। उपनिषद्भागे आध्यात्मिक दार्शनिकतत्वानि मीमांस्यन्ते। विशेषतो ब्राह्मणग्रन्था गृहस्थाश्रमोपयोगिनः। अपरतश्च ब्रह्मप्रतिपादनात् ब्राह्मणानां ब्राह्मणत्वम्। यज्ञप्रतिपादनमेव ब्रह्मप्रतिपादनम्। ब्राह्मणेषु मन्त्राणां कर्मणां विनियोगानां च व्याख्योपस्थापितास्ति।

ब्राह्मणेषु भाषा गद्यमयी एव। तत्र नवीनानां शब्दानां धातूनां च प्रयोगोऽपि दृश्यते। वेदानां प्रत्येकं पृथक्-पृथक् ब्राह्मणम्। तत्र ऋग्वेदस्य ऐतरेय-शाङ्खायनाख्ये, शुक्लयजुर्वेदस्य

शतपथाख्यं, कृष्णयजुर्वेदस्य तैत्तिरीयाख्यं, सामवेदस्य ताण्ड्यषड्विंश-साम-आर्षेय-दैवत-उपनिषद्-संहितोपनिषद्वंश जैमिनीयाख्यानि, अथर्ववेदस्य गोपथाख्यं च ब्राह्मणानि समवाप्तानि। ब्राह्मणप्रभेदानधिकृत्य संक्षेपेण सामान्येन दीयते - ऐतरेयब्राह्मणम्, शाङ्खायनब्राह्मणम्, शतपथब्राह्मणम्, तैत्तिरीयब्राह्मणम्, ताण्ड्यब्राह्मणम्, षड्विंशब्राह्मणम्, सामविधानब्राह्मणम्, आर्षेयब्राह्मणम्, उपनिषद्ब्राह्मणम्, गोपथब्राह्मणम्.... इत्यादयः।

### 1. ऐतरेयब्राह्मणम्

ऋग्वेदसंबद्धम् ऐतरेयब्राह्मणम् सोमयागप्रतिपादनेन प्राधान्यम् अर्हति। अष्टसु पञ्चिकासु विभक्तं यत्र प्रतिपञ्चिकं पञ्चाध्याय इति समष्टौ चत्वारिंशत् अध्यायाः। अत्र प्राधान्येन विष्णुः स्तूयते तन्महत्वं च प्रतिपाद्यते। ग्रन्थमिदमधिकृत्य सायणेन कृतं भाष्यं प्रसिद्धम्। तथैव षड्गुरुशिष्यस्य लघुव्याख्या अपि प्रसिद्धा। गोविन्दस्वामिना अपि अस्य भाष्यं प्रणीतमस्ति।

### 2. शाङ्खायनब्राह्मणम्

शाङ्खायनब्राह्मणमपि ऋग्वेदसम्बद्धि। त्रिंशत् अध्यात्मकं इदं प्रत्यध्यायं सप्तदशपर्यन्तखण्डाः। विस्तृतरूपेण प्रतिपादनं अस्य वैशिष्ट्यम्। प्रतिपाद्यविषयः तु ऐतरेयवत् सोमयाग एव। अत्र अग्न्याधानविधिः, प्रातःसायंसवनदविधानम्, अग्निहोत्र- दर्शपूर्णमास - चतुर्मास्येष्टयः, रुद्रस्य माहात्म्यं, शिवव्रतविधानं, विष्णोः श्रेष्ठत्वप्रतिपादनं च मुख्यविषयाः। अत्र उदीच्यानां परिनिष्ठितत्वं, गोत्रमहत्वप्रतिपादनं च प्रकीर्णविषयाः।

### 3. शतपथब्राह्मणम्

शुक्लयजुर्वेदसम्बद्धं शतपथब्राह्मणं शताध्यायेषु विभक्तम्। यज्ञानुष्ठानमेव प्रधानप्रतिपाद्य विषयः। इदं तु सम्प्रति समुपलब्धब्राह्मणेषु प्राचीनतमं ब्राह्मणम्। अस्य प्रथमकाण्डे हविर्यज्ञः पूर्णमासदर्शयागौ, द्वितीयकाण्डे अग्न्याधेय-पुनराधेय-अग्निहोत्र-अग्न्युपस्थान पिण्डपितृयज्ञादयः, तृतीये चतुर्थे च अग्निष्टोमः, पञ्चमे राजसूयः, षष्ठेसप्तमेऽपि चयनम्, अष्टमे चितिरेव, नवमे सञ्चितिः, दशमे अग्निरहस्यम्, एकादशे अग्न्याधानादिकालाः, द्वादशे दीक्षादिक्रमः, त्रयोदशे अश्वमेधादि निरूपणं, चतुर्दशे धर्माद्युपनिषत् निरूपणमिति प्रतिकाण्डविषयनिरूपणम्। अत्र सायणस्य भाष्यं उपलभ्यते।

**4. तैत्तिरीयब्राह्मणम्**

कृष्णयर्जुवेदसम्बन्धे तैत्तिरीयब्राह्मणे त्रीणि काण्डानि सन्ति। प्रथमद्वितीयकाण्डयोः द्वादशाध्यायाः, तृतीये तु त्रयोदशेति सप्तत्रिंशदध्यायाः। संहितायां यज्ञादीनां सविस्तरं वर्णनमस्ति। प्रथमकाण्डे अग्न्याधान-गवानयन-वाजपेय-सोमनक्षत्रेष्टि-राजसूयादीनां वर्णनं, द्वितीये अग्निहोत्रसौत्रामणिबृहस्पतिसववैशादीनां प्रतिपादनम्, तृतीये नक्षत्रेष्ट्यादीनां प्रतिपादनम्, वैश्यक्षत्रियब्राह्मणानां ऋग्यजुःसामादिभ्य उत्पत्तिकथनं शूद्रस्य यज्ञानधिकारकथनं चेति प्राधान्येन प्रतिपादयति। वेदोपवर्णित ज्योतिषविषयस्य रहस्यमपि सविस्तरं वर्णितमस्ति।

**5. ताण्ड्यब्राह्मणम्**

ताण्ड्यब्राह्मणं सामवेदसम्बद्धं पञ्चविंशाभिधया महाब्राह्मणाभिधया संज्ञया अभिधीयते। सामवेदस्य ताण्डीयसंहितासंबद्धत्वेन इदं ताण्ड्यमुच्यते। पञ्चविंशतिरध्यायात्मकत्वाद् पञ्चविंशाभिधया, अत्यन्तविस्तृतत्वाद् महाब्राह्मणमिति च। अत्र नानाविधयज्ञानां विधिः निर्दिष्टः।

आर्षेयब्राह्मणम्, उपनिषद्ब्राह्मणं, वंशब्राह्मणम्, जैमिनीयब्राह्मणम्....इत्यादीनि सामवेदसम्बद्धानि च।

**6. गोपथब्राह्मणम्**

अथर्ववेदसम्बद्धं ब्राह्मणं भवति गोपथब्राह्मणम्। इदं ब्राह्मणं पूर्वोत्तरभागेन विभक्तम्। पूर्वभागे पञ्च, उत्तरभागे षट् प्रपाठकाः च। प्रथमे प्रपाठके ओङ्कारस्य गायत्र्याः च महिमा, द्वितीयादिषु ब्रह्मचारिणः धर्मः, कार्यविधिदीक्षां संवत्सराणां विवेचनम्, अश्वमेधपुरुषमेधादीनां च विविच्य प्रतिपादनमस्ति। उत्तरभागे विविधयज्ञानां तत्संबन्धोपाख्यानं च द्रष्टुं शक्यते।

ब्राह्मणसाहित्यं सुसमृद्धं भवति। स्वप्रकृतगुणैः वेदाभिधेयत्वं लभते। ब्रह्म यज्ञ एव। तेन यज्ञरूपब्रह्मप्रतिपादकत्वाद् इदं ब्राह्मणमिति।

**1.3.3. आरण्यकम्**

ब्राह्मणानां परिशिष्टमेव आरण्यकम्। यज्ञयागादिसम्बन्धम् आध्यात्मिकतत्वनिरूपकम् आरण्यकं विश्वस्यते। तेन एव वेदं 'प्राणविद्या' अपि उच्यते। तादृशानां गूढतत्वानाम् अध्ययनं ग्रामादौ असम्भवमिति अरण्ये एव पठनपाठनव्यवस्थया आरण्यकम् इत्युक्तम् ।

सायणाचार्यमते-

"अरण्याध्ययनादेतदारण्यकमितीर्यते।
अरण्ये तदधीयीतेत्येवं वाक्यं प्रचक्षते।।"

वस्तुतस्तु ब्राह्मणानि गृहस्थसम्बद्ध कर्मनिर्देशकानि तत्परिशिष्टत्वेव आरण्यकानि वनस्थसम्पाद्यकर्मविधिनिर्देशकानि। आरण्यकान्यपि ब्राह्मणसाहित्यवद् प्रतिवेदं सन्तीति विश्वस्यते। किन्तु सम्प्रति पञ्चैव उपलभ्यन्ते।

**1. ऐतरेयारण्यकम्**

ऋग्वेदसम्बद्धकम् ऐतरेयारण्यकं पञ्चधा विभक्तम्। तत्र प्रथमे महाव्रतवर्णनं, द्वितीये प्राणविद्या, पुरुषवर्णनं, तृतीये संहितापदक्रमपाठस्वरव्यञ्जनादि निरूपणं, चतुर्थे महाव्रतान्तरकृत्यवर्णनं, पञ्चमे निष्कैवल्यशास्त्रनिरूपणम्। एषु प्रथमत्रयाणां प्रणेता महिदासः, चतुर्थस्य आश्वलायनः, पञ्चमस्य शौनकः इति कथितः। इदं निरुक्तपूर्ववर्तित्वात् न तथार्वाचीनम् इति।

**2. शाङ्खायनारण्यकम्**

ऋग्वेदसम्बद्धं शाङ्खायनारण्यकं पञ्चदशस्तु अध्यायेषु विभक्तम्। अस्य प्रथमाः षडध्यायाः कौषीतकि उपनिषत्वेन प्रसिद्धम्।

**3. तैत्तिरीयारण्यकम्**

कृष्णयजुर्वेदसम्बद्धं तैत्तिरीयारण्यकं दशप्रपाठकेषु विभक्तम्। अस्य सप्तमाष्टमनवमप्रपठकाः तैत्तिरीयोपनिषदिति ज्ञायन्ते। दशमस्तु महानारायणीयः उपनिषदिति। समुपासनाविधिः इष्टिसञ्चयनं, स्वाध्यायः पञ्चमहायज्ञः चातुहोत्रचितिमन्त्राः, आभिचारमन्त्राः, यज्ञविधिः पितृमेधविषयकमन्त्राः च सविस्तरं प्रतिपादयन्ति।

**4. तलवकारारण्यकम्**

सामवेदसंबद्धं तलवकारारण्यकं चतुर्षु अध्यायेषु विभक्तम्। अध्यायाः तु अनुवाकेषु विभक्ताः च। चतुर्थाध्यायस्य दशमोऽनुवाके केनोपनिषद् अन्तर्भूतास्ति ।

**5. बृहदारण्यकम्**

बृहदारण्यकं शुक्लयजुर्वेदसम्बद्धम्। शतपथब्राह्मणपरिशिष्टत्वेन चतुर्दशकाण्डे चतुर्थ अध्यायादारभ्य नवमाध्यायपर्यन्तं निबद्धमस्ति। अत्र एकत्रिंशत् अध्यायाः। यज्ञादीनाम् अध्यात्मस्वरूपं अत्रापि निर्दिष्टमस्ति। इत्थं आरण्यकसाहित्यम् उपनिषत्साहित्यस्यैकतः पूर्वपीठिका अपरतः च ब्राह्मणसाहित्यस्य परिशिष्टमपि।

## पुनरावृत्तिः (Recap)

- सूक्तानां समुच्चयः संहिता भवति।
- पतञ्जलिमहर्षेः अभिप्रायमनुसृत्य वेदचतुष्टयार्थं ११३१ (1131) संहिता आसन्।
- एकैकायां संहितायां प्रत्येकं ब्राह्मण-आरण्यक-उपनिषत् त्रयं च आसन्।
- ऋग्वेदमन्त्रेषु प्रमुखतया अभीष्टसिद्ध्यर्थं अनभीष्टनिवृत्यर्थं च देवतां प्रति प्रार्थना भवन्ति। अग्नि-मित्र-वरुण-इन्द्र-रुद्र-विष्णु-सरस्वतीत्यादयः देवताः।
- वेदनिर्दिष्टः कर्मप्रतिपादनग्रन्थः ब्राह्मणम्।
- ब्राह्मणप्रतिपाद्यानां विषयाणां त्रेधा विभागः- विधिभागः, अर्थवादभागः, उपनिषद्भागः चेति।
- ऋग्वेदसंबद्धं ऐतरेयब्राह्मणम् सोमयागप्रतिपादनेन प्राधान्यम् अर्हति।
- ऋग्वैदिकसंबद्धं ब्राह्मणग्रन्थः ऐतरेयब्राह्मणम्।
- ऐतरेयब्राह्मणे चत्वारिंशत् अध्यायाः विद्यन्ते।
- शाङ्खायनब्राह्मणमपि ऋग्वेदसम्बद्धि।
- शुक्लयजुर्वेदसम्बद्धं शतपथब्राह्मणं शताध्यायेषु विभक्तम्। पञ्चमे राजसूयः उपलभ्यते।
- कृष्णयर्जुवेदसम्बद्धे तैतिरीयब्राह्मणे त्रीणि काण्डानि सन्ति। प्रथमद्वितीयकाण्डयोः द्वादशाध्यायाः तृतीये तु त्रयोदशेति सप्तत्रिंशदध्यायाः।
- ताण्ड्यब्राह्मणं सामवेदसम्बद्धं पञ्चविंशाभिधया महाब्राह्मणाभिधया संज्ञया अभिधीयते।
- अथर्ववेदसंम्बद्ध ब्राह्मणं भवति गोपथब्राह्मणम्। सम्पूर्णे गोपथब्राह्मणे एकादश प्रपाठकाः सन्ति।
- ब्राह्मणानाम् परिशिष्टमेव आरण्यकम्।
- आरण्यकग्रन्थानां प्रतिपाद्यविषयः प्राणविद्या। "अरण्याध्ययनादेतदारण्यकम्" इति सायणस्य उक्तिः।
- कृष्णयजुर्वेदसम्बद्धं तैत्तिरीयारण्यकं दशप्रपाठकेषु विभक्तम्।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. वेदचतुष्टयार्थं कति संहिताः आसन् ?

2. ब्राह्मणं नाम किम् ?
3. सोमयागप्रतिपादनेन प्राधान्यम् अर्हतः, ऋग्वैदिकसंबद्धं ब्राह्मणं किम्?
4. ऐतरेयब्राह्मणे कति अध्यायाः विद्यन्ते?
5. शाङ्खायनब्राह्मण-सम्बद्धः वेदविशेषः कः?
6. शुक्लयजुर्वेदसंबद्धं ब्राह्मणं किम् ?
7. राजसूययागः शतपथब्राह्मणस्य कस्मिन् काण्डे उपलभ्यते?
8. सामवेदसम्बद्धं ब्राह्मणं किम्?
9. सम्पूर्णे गोपथब्राह्मणे कति प्रपाठकाः सन्ति?
10. आरण्यकग्रन्थानां प्रतिपाद्यविषयः किमस्ति ?
11. "अरण्याध्ययनादेतदारण्यकम्" इति कस्येयमुक्तिः?
12. शतपथब्राह्मणस्य परिशिष्टत्वे लिखितारण्यकस्य नाम किम् ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. संहितायाः प्राधान्यं किम् ?
2. तैत्तिरीयब्राह्मणे कति काण्डानि ? प्रतिकाण्डं कति अध्यायाः ?
3. आरण्यकं नाम किम् ?

## एकैकया खण्डिकया उत्तरं लिखत ।

**(Answer the question in a paragraph)**

1. ऋग्वेदमन्त्रेषु प्रधानदेवताः काः ?
2. ब्राह्मणप्रतिपादने विषयभेदाः के ?
3. कृष्णयजुर्वेदसंबद्धम् आरण्यकं किम् ? कति प्रपाठकाः?

## निर्दिष्टाभ्यासः (Assignments)

1. संहिता-ब्राह्मण-आरण्यक-उपनिषदः इति वेदस्य चत्वारः विभागान् अधिकृत्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. ११३१ (1131)
2. वेदनिर्दिष्टः कर्मप्रतिपादनग्रन्थः ब्राह्मणम्।
3. ऐतरेयब्राह्मणम्।
4. चत्वारिंशत्। (40)
5. ऋग्वेदः।
6. शतपथब्राह्मणम्।
7. पञ्चमकाण्डे।
8. ताण्ड्यब्राह्मणम्।
9. एकादश (11)
10. प्राणविद्या।
11. सायणस्य।
12. बृहदारण्यकम्।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अकादमि, वारणसि।
2. डॉ. पारसनाथद्विवेदि, संस्कृतनिबन्धनवनीत, श्रीराम मेहरा एण्ड कम्पनी, आग्रा।
3. A. A Macdonell, History of Sanskrit Literature, Mothilal Banarasi Dass, New Delhi
4. A B. Keith, Introduction to Sanskrit Literature, Mothilal Banarasi Dass, New Delhi
5. M. Krishnamachariar, A history of classical Sanskrit Literature, Mothilal Banarasi Dass, New Delhi

# Unit - 4
# उपनिषदः

## उद्देश्यानि (Learning Outcomes)

- उपनिषदां प्रतिपादनविषयमधिकृत्य च ज्ञानम्।
- बौद्धिकविकासः जायते।
- उपनिषदां परिचयं प्राप्नोति।

## प्राग्व्यपेक्षाः (Pre requisites)

वेदेषु विद्यमानं सहस्राधिक उपनिषदः सन्ति। किन्तु तेषु अष्टाधिशत उपनिषदः एव अद्य प्रसिद्धः। तेषु दशोपनिषदां व्याख्यानं श्रीशङ्कराचार्यैः कृतम्। उपनिषदां व्याख्यानं विविधरीत्या कृतम्।

## मुख्यपदानि (Key terms)

वेदान्तः, मुख्योपनिषद्, उपनिषद्शब्दस्य निष्पत्तिः, उपनिषदां प्रतिपाद्य विषयः, दश प्रमुखाः उपनिषदः।

## Discussion

### 1.4.1. उपनिषदः।

आध्यात्मिकजगति उपनिषदां महत्वं वर्णनातीतमेव। उपनिषदः वेदानां शीर्षाणि इत्युच्यन्ते। ता एव मोक्षसाधकाः। वैदिकसाहित्यस्य अन्तिमघट्टः भवति इत्यनेन उपनिषद् वेदान्तमिति नाम्नापि प्रसिद्धः भवति। अन्तमित्यस्य श्रेष्ठं इति अपरः अर्थोपि अस्ति। शिष्यार्थं गुरोः रहस्यात्मकं उपेदशो हि उपनिषदः।

'उप' 'नि' इत्युपसर्गपूर्वकात् 'सद्' धातोः क्विप् प्रत्ययात् निष्पन्नं रूपं भवति उपनिषत्। उपनिषदि ब्रह्मविद्यां प्रतिपादयति। उपनिषदः संख्यामधिकृत्य मतभेदाः वर्तन्ते। शङ्कराचार्यभगवद्पादः दशोपनिषदां भाष्यं कृतवान्। अतः ताः 'मुख्योपनिषद्' इति

व्यवह्रियते। ताः तु ईश - केन - कठ - प्रश्न - मुण्ड - माण्डूक्य - तैत्तिरीय - ऐतरेय - छान्दोग्य - बृहदारण्यकसंज्ञकाः।

ऋग्वेदसम्बद्धा ऐतरेयाद्या दश, शुक्लयजुर्वेदसम्बद्धा ईशाद्या एकोनविंशतिः, कृष्णयजुर्वेदसम्बंद्धा तैत्तिरीयाद्याः द्वात्रिंशत्, सामवेदसम्बद्धाः छान्दोग्याद्या षोडश, अथर्ववेद सम्बद्ध। कठाद्या एकत्रिंशदिति प्राधान्येन अष्टोत्तरशतम् उपनिषदः। ता हि कतिचन गद्यात्मिकाः, कतिचन पद्यात्मिकाः कतिचन उभयात्मिकाः च। सर्वोपनिषदां परिचयः न साध्यः, अतः मुख्यत्वेन दशोपनिषदमधिकृत्य संक्षेपेण विवेचयति।

**1. ईशोपनिषद्**

इयं उपनिषद् शुक्लयजुर्वेदसंबद्धाः। चत्वारिंशत् अध्यायगतां माध्यन्दिनशाखासंबद्धा भवति। प्रथमं श्लोकः तु....

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ।।इति।।

यथा उपनिषद् वेदानां शीर्षं तथा ईशोपनिषद् उपनिषदां शीर्षमिति तस्य प्राधान्यं सर्वत्र सम्मतम्। अत्र ज्ञानकर्मणोः समन्वयः साधितः तथैव निष्कामकर्मणः सन्देशः। एवमेव अविद्याविद्याया भेदप्रदर्शनपूर्वकम् अध्यात्मविद्या निरूपितास्ति। यदि कश्चिदपूर्णं जीवनमुपभोक्तुम् इच्छति तदा स कर्म कुर्यादेव। आत्माभीष्टमेव कर्म कर्तव्यं न तु तद्विपरीतम्। पराबाधेन सर्वैः जीवितव्यं न तु परपीडया।

**2. केनोपनिषत्**

सामवेदसंबद्धा इयं केनोपनिषद्। केनेति प्रश्नपूर्वकमारब्धाद् इयं केनेति शब्दिता। अस्य चत्वारः खण्डाः यत्र द्वौ द्वौ पद्यबद्धौ द्वौ च गद्यमयौ। प्रथमे खण्डे निर्गुणोपास्यब्रह्मणः अन्तरं प्रतिपादितम्। द्वितीये ब्रह्मणो रहस्यात्मकरूपनिरूपणम्। तृतीये चतुर्थे च परब्रह्मणः सर्वशक्तिप्रतिपादनमिति अस्याः प्रतिपाद्यविषयाः। जीवात्मनः परमात्मांशत्वप्रतिपादिकेयम् उपनिषद् संवादरूपेण निबद्धाऽस्ति।

### 3. कठोपनिषद्

कृष्णयजुर्वेदस्य कठशाखा सम्बद्धा कठोपनिषद्। अत्र द्वावध्यायौ प्रत्यध्यायं तिस्रो वल्लयश्च। नचिकेतयमसंवादरूपेण परमात्मनां रहस्यमयं तत्वं उद्घाटितमस्ति। काव्यात्मसङ्घटनयोत्कृष्टतमदार्शनिकविषयस्य प्रतिपादनमेव अस्य वैशिष्ट्यम्।

### 4. प्रश्नोपनिषत्

अथर्ववेदस्य पिप्पलादशाखासंबद्धा भवति प्रश्नोपनिषद्। प्रश्नोत्तररूपेण निबद्धत्वात् प्रश्नोपनिषद् इति। अत्र प्राणस्य महिमा तथा तत्स्वरूपं, ओङ्कारस्य उपासना, परब्रह्मण आध्यात्मिकदृष्ट्या उपासनाविधिः इत्यादयः मुख्यप्रतिपाद्यविषयाः।

### 5. मुण्डकोपनिषद्

अथर्ववेदस्य शौनकशाखासंबद्धा भवति मुण्डकोपनिषद्। इयञ्च त्रिषु मुण्डकाख्या विभागेषु विभक्ता। प्रतिमुण्डकं द्वौ द्वौ खण्डे च। तत्र प्रथमे भागे ब्रह्मणो वेदानाञ्च व्याख्या, द्वितीये ब्रहाणः स्वभावस्य वर्णनम्। अस्याः उपनिषदः वैशिष्ट्यं तु पराऽपराविद्याः प्रतिपादनमेव। 'सत्यमेव जयते' इति ज्ञेयवाक्यमपि अस्यामुपनिषदि अन्तर्भवति।

### 6. माण्डूक्योपनिषद्

द्वादशवाक्यात्मिका गद्यनिबद्धेयमुपनिषद् ओङ्कारस्य व्याख्यापरा। जाग्रत्-स्वप्न-सुषुप्ति-तुरीयावस्थस्य चैतन्यस्याधिपत्येन आत्मनो वैश्वानरतैजसप्राज्ञशिवेतिप्रकारनिरूपणमस्य मुख्यविषयः।

### 7. तैत्तिरीयोपनिषद्

कृष्णयजुर्वेदस्य तैत्तिरीयशाखासम्बद्धा भवति तैत्तिरीयोपनिषद्। इयं त्रिषु खण्डेषु शिक्षावल्ली, ब्रह्मानन्दवल्ली, भृगुवल्ली इति नाम्ना विभक्तम्। ब्रह्मप्राप्तिसाधनानां निरूपणं, अन्नप्राणमनोविज्ञानानन्दमयकोशानां प्रतिपादनं, ब्रह्मप्राप्तिसाधनस्वरूपवर्णनं च यथाक्रमं कृतमस्ति।

**8. ऐतरेयोपनिषद्**

ऋग्वेदसम्बद्धा एतरेयोपनिषद् ब्रह्मविद्याप्रतिपादितः। अस्य त्रयोऽध्यायाः सर्वे गद्यात्मकाः भवन्ति। जगतः सृष्टिः, जीवानां जन्मजीवननिधनावस्थानां निरूपणं प्रज्ञानमाहात्म्यं च प्रतिपाद्यविषयाः।

**9. छान्दोग्योपनिषद्**

सामवेदसम्बद्धायां छान्दोग्योपनिषदि अष्टाध्यायः, प्रत्यध्याये अनेके खण्डाः च। परमात्मनो विविधप्रकारेण प्रतीकोपासना अनेकविधाविद्यानां निरूपणम्, ओङ्कारस्य गूढरहस्यविवेचनं च अस्य मुख्योविषयाः।

**10. बृहदारण्यकोपनिषत्**

शुक्लयजुर्वेदस्य माध्यन्दिनशाखासम्बद्धा भवति बृहदारण्यकोपनिषद्। इयं षडध्यायेन विभक्ता। प्रत्येकमध्याया ब्राह्मणेषु च विभक्ताः। अत्र ब्रह्मणः सार्वरूपत्वं, चातुर्वण्यसृष्टिः, अन्नानामुत्पत्तिः, मनोवचनप्राणरूपेण सृष्टेः विभागः, मधुविद्याया उपदेशः, आत्मनो विविधरूपाणां वर्णनं, बह्मात्मनोः शिक्षा.... इत्याद्याः प्राधान्येन प्रतिपाद्यविषयाः भवन्ति।

इत्थं सुसमृद्धं उपनिषत्साहित्यं संस्कृतसाहित्ये वर्तमानं स्थानं वाचातीतमेव। सर्वेऽपि भारतीयाः पाश्चात्यकाः वा समालोचकाः नम्रशिरसा नमन्ति।

अयि मित्राणि....

उपनिषदधिकृत्य वयं पठामः। उपनिषत्साहित्यं वेदानां शीर्षत्वेन आध्यात्मिकजगति महत्वपूर्णेन च शोभते। ईशकेनाद्याः... उपनिषदः सामान्येन ज्ञातं इति मन्ये। विषयभेदं, विद्याविद्यानां निरूपणं, आत्मनः स्वरूपं च, प्रतिपाद्यविषयाः।

विविधरूपाणां वर्णनं, ओङ्कारस्य गूढरहस्यं इत्यादयः सर्वेपि उपनिषदि अन्तर्भूताः।

## पुनरावृत्तिः (Recap)

- 'उप' 'नि' इत्युपसर्गपूर्वकं 'सद्' धातोः क्विप् प्रत्ययात् निष्पन्नं रूपं भवति उपनिषत्।
- वेदान्तमिति नाम्नापि प्रसिद्धा भवति।

- ऋग्वेदसम्बद्धिनः ऐतरेयादयः दश उपनिषदः।
- ईशोपनिषदि अविद्याविद्याया भेदप्रदर्शनपूर्वकम् अध्यात्मविद्या निरूपितास्ति।
- केनोपनिषदि चत्वारः खण्डाः यत्र द्वौ द्वौ पद्यबद्धौ द्वौ च गद्यमयौ।
- कठोपनिषदि नचिकेतयमसंवादरूपेण परमात्मनां रहस्यमयं तत्वं उद्घाटितमस्ति।
- अथर्ववेदस्य पिप्पलादशाखासंबद्धा भवति प्रश्नोपनिषद्।
- 'सत्यमेव जयते' इति आप्तवाक्यः मुण्डकोपनिषदि अन्तर्भवति।
- माण्डूक्योपनिषदि द्वादश श्लोकाः सन्ति।
- कृष्णयजुर्वेदस्य तैत्तिरीयशाखासम्बद्धा भवति तैत्तिरीयोपनिषद्।
- ऋग्वेदसम्बद्धा एतरेयोपनिषद् ब्रह्मविद्याप्रतिपादिता।
- सामवेदसम्बद्धायां छान्दोग्योपनिषदि अष्टाध्यायाः, प्रत्यध्यायं अनेके खण्डाः च।
- शुक्लयजुर्वेदस्य माध्यन्दिनशाखासम्बद्धा भवति बृहदारण्योकोपनिषद्।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. उपनिषद्-शब्दे किं धातुरस्ति?
2. मोक्षसाधकः कः?
3. 'उपनिषद्' इत्यस्य अपरं नाम किम्?
4. ऋग्वेदसम्बद्धिनः ऐतरेयादयः उपनिषदः कति?
5. "मा गृधः कस्यस्विद्धनम्" इति वचनं कस्यामुपनिषदि?
6. अविद्यायाः विद्यायाश्च वर्णनं कुत्र उपलभ्येते ?
7. केनोपनिषदि कति खण्डाः सन्ति ?
8. नचिकेतयमसंवादः कस्यामुपनिषदि वर्तते ?
9. अथर्ववेदस्य पिप्पलादशाखायाः उपनिषत् का?
10. 'सत्यमेव जयते' इति आप्तवाक्यः कुत्रान्तर्भवति?
11. माण्डूक्योपनिषदि कति श्लोकानि?
12. तौत्तिरीयोपनिषत्-सम्बद्धः वेदः कः?

13.ऐतरेयोपनिषदि कतिः अध्यायाः?

14.सामवेदसंबद्धायाः उपनिषदः नाम किम्?

15.बृहदारण्योकोपनिषत्- सम्बद्धः वेदः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. ईशावास्योपनिषदः प्रथमः श्लोकः कः ?
2. प्रश्नोपनिषदि मुख्यप्रतिपाद्यविषयाः के ?
3. तैत्तिरीयोपनिषदि कति वल्लयो भवन्ति? के ?
4. ऐतरेयोपनिषदि प्रतिपादिता विषया के?
5. छान्दोग्योपनिषदि मुख्यविषयाः के ?

## एकैकया खण्डिकया उत्तरं लिखत।

**(Answer the following questions in a paragraph)**

1. उपनिषद्।
2. कठोपनिषदः वैशिष्ट्यं किम् ?
3. के सन्ति दश प्रमुखाः उपनिषदः?

## निर्दिष्टाभ्यासः (Assignments)

1. श्रीशङ्करभगवद्पादेन भाष्यरचनया कति उपनिषदः कृता ? विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. सद्।
2. उपनिषदः।
3. वेदान्तः।
4. दश उपनिषदः।

5. ईशोपनिषदि।
6. ईशोपनिषदि।
7. चत्वारः।
8. कठोपनिषद्।
9. प्रश्नोपनिषद्।
10. मुण्डकोपनिषदि।
11. द्वादश ।
12. कृष्णयजुर्वेदः।
13. त्रयः।
14. छान्दोक्योपनिषद्।
15. शुक्लयजुर्वेदः।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणि दाहालः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदास् अकादमि, वारणसि।
2. डॉ. पारसनाथद्विवेदि, संस्कृतनिबन्धनवनीत, श्रीराम मेहरा एण्ड कम्पनी, आग्रा।
3. A.A Macdonell, History of Sanskrit Literature, Mothilal Banarasi Dass, New Delhi
4. A B. Keith, Introduction to Sanskrit Literature, Mothilal Banarasi Dass, New Delhi
5. M. Krishnamachariar, A history of classical Sanskrit Literature, Mothilal Banarasi Dass, New Delhi

BLOCK -2

# वैदिककालानन्तरं संस्कृतसाहित्यम्

SGOU

# Unit -1
# रामायणम्

## उद्देश्यानि (Learning Outcomes)

- वैदिककालानन्तरं संस्कृतसाहित्यमधिकृत्य सामान्यज्ञानं सिद्ध्यति।
- आदिकाव्यं रामायणमधिकृत्य ज्ञानं लब्धुं शक्यते।
- रामायणस्य कर्ता, कति काण्डानि, तस्य महत्वं च पठितुम् अवसरं लभते।

## प्राग्व्यपेक्षाः (Pre requisites)

आदिकवि वाल्मीकिना विरचितं रामायणं भारतीयानां आदिकाव्यमित्यभिधीयते। रामायणं भारतीयसंस्कारस्य प्रथमस्रोतः भवति। वाल्मीकि रामायणं अत्यन्तं श्रेष्ठम्, सरलम्, हृदयाकर्षकं च भवति। उचितपदप्रयोगेण इदं काव्यं अत्यन्तमाकर्षकं भवति। रामायणं भारतस्य ऐतिहासिककाव्यं भवति। रामयणमहाभारतयोः मध्ये रामायणं एव प्रथमस्थानं अलङ्करोति।

## मुख्यपदानि (Key terms)

आदिकविः, रामायणस्य उत्पत्तिः, सप्तकाण्डाः।

## DISCUSSION

### 2.1.1. रामायणम्

"कूजन्तं राम रामेति मधुरं मधुराक्षरम्।

आरुह्य कविताशाखां, वन्दे वाल्मीकिकोकिलम्।।

लौकिकसंस्कृतसाहित्यस्य आदिकाव्यस्य रामायणस्य ऐतीह्यविषये बहुभिः बहुधा संसूचयति। रत्नाकरो नाम क्रूरकर्मा किरातः सप्तर्षेः कृपया वाल्मीकिः इत्यभिधानेन ज्ञातः इति। केचित् पुराणे भिन्नाभिप्रायं सूचयति। वाल्मीकेः स्थितिकालविषये निश्चितो नास्ति, किन्तु महर्षेः व्यासस्य पूर्ववर्तीति। महाभारते वाल्मीकेः तदा रामायणस्य च चर्चा दृश्यते।

रामायणे हि उत्तरकोसलस्य राजधानी अयोध्या इति कथिता। परन्तु जैनबुद्धग्रन्थेषु पाताञ्जलेऽपि महाभाष्ये सा साकेत शब्देन ज्ञापितास्ति, रामायणे हि साकेतशब्दे न कुत्रापि स्मृतो दृश्यते। कोसलराजधानी रूपेण अयोध्याया एव उल्लेखो न तु साकेतस्य विशालमिथिलयो: पृथक् राज्यत्वेन उल्लेख:। वाल्मीके: आश्रमस्य अस्तित्वमपि रामायणे वर्ण्यते। अयोध्याकाण्डे षट्पञ्चाशत्सर्गे चित्रकूटे वाल्मीके: आश्रमस्यावस्थिति: वर्णितास्ति। बालकाण्डे तु तमसातटे, उत्तरकाण्डे च गङ्गाया नातिदूरत: तस्याश्रमस्य उल्लेख: कृ त:।

अभिगम्याश्रमं सर्वे वाल्मीकिमभिवादयन्।
तान् महर्षि: प्रमुदित: पूजयामास धर्मवित्।।

इत्युक्ते वाल्मीके: रामसमकालिकता प्रष्टव्या भवति। एतत्तु स्पष्टमेव यद् रामायणप्रणयनादपि बहुकालपूर्वमेव रामायणकथा प्रचलिता आसीत्। आनन्दवर्धन: ध्वन्यालोके निदर्शनतया काव्यात्मतया च एवं प्रस्तौति-

"काव्यस्यात्मा स एवार्थस्तथा चादिकवे: पुरा।
क्रौञ्चद्वन्दवियोगोत्थ: शोक: श्लोकत्वमागत:।।"

इत्युक्ते करुणरसमेव अङ्गि: इति। अङ्गत्वेन वीररस:।

वाल्मीकिमहर्षि: माध्याह्निकं सवनम् अनुष्ठातुं तमसातटं जगाम। तत्र च सुखं विहरत: कौञ्चमिथुनाद् एकं व्याधेन निहत:। एतद् दृष्टवा सहसा एव तस्य वदनाद् सरसा सुमधुरा छन्दोमयी वाणी विनिर्गता।

"मा निषाद ! प्रतिष्ठां त्वमगम: शाश्वती समा:।
यत्क्रौञ्चमिथुनादेकमवधी: काममोहितम्।।" इति।

ब्राह्मणा अनुगृहीत: स: महर्षि: परमपावनं विश्वविख्यातं रामायणं रचयित। आदिकाव्यत्वाद् स: आदिकवि इति लोके विश्रुतोऽभवत्।

कवेरस्य रामकथाम् उपजीव्य अनेकै: कविभि: काव्य-नाटक-चम्प्वादयः रचिताः। कैरलीभाषायां तुञ्चत्त् रामानुजन् एषुत्तच्छन् महोदयेन अध्यात्मरामायणं किलिप्पाट्ट् च अरचयत्। वैदेशिकभाषायां अपि रामायणं लिखितवन्तः। काव्योऽस्मिन् आदर्शशिक्षा बहुशो वर्ण्यते। मातृपितृसेवा, पतिभक्ति: पतिधर्म:, पतिव्रताधर्म:, सेवकधर्म:, भ्रातृधर्मः इत्यादि भारतीयसंस्कृति: सम्यक् रीत्या प्रतिपादयति।

रामायणे दशरथस्य पुत्रकामेष्टियागः, रामादिजन्म, रामलक्ष्मणयोः विश्वामित्रानुगमनं, सीतापरिणायः, परशुरामदर्पभंगः, रामाभिषेकविघ्नः, रामस्य वनगमनं, सीतापहरणं, रावणवधः, रामस्य प्रत्यागमनं, रामस्य राज्याभिषेकः, रामराज्यवर्णना च प्रतिपाद्यविषयाः।

उपर्युक्तकथावस्तुः सप्तकाण्डेषु सविस्तरं प्रतिपादयति। बालकाण्डम्, अयोध्याकाण्डम्, आरण्यकाण्डम्, किष्किन्धाकाण्डम्, सुन्दरकाण्डम्, युद्धकाण्डम्, उत्तरकाण्डम् च। एतेषु सप्तकाण्डेषु सविस्तरं प्रतिपादयति।

**1. बालकाण्डम् -**

बालकाण्डे पुत्रकामेष्टियागः, विश्वामित्रस्य यागरक्षा, ताटकावधम्, अहल्यामोक्षं, सीतास्वयंवरं, भार्गवदर्पशमनः.... इत्यादयः विशदयति।

कोसलनाम्नि जनपदे अयोध्यानाम नगर्यां दशरथो नाम राजर्षिः। तस्य कौसल्या कैकेयी सुमित्रा चेति तिस्रः भार्याः अभवन्। अनपत्यतया दुःखितः सः राजा पुत्रार्थं यज्ञकर्म कारयामास। हुतवहात् प्रादुर्भूतो दिव्यपायससम्पूर्णं पात्रं स्वीकृत्य पत्न्यां ददौ। अचिरेणैव तेनस्विनः चत्वारः पुत्राः - रामः, भरतः, लक्ष्मणः, शत्रुघ्नः - अजनयन्। ते पुत्राः वेदेषु शास्त्रेषु च नैपुण्यं सिद्ध्यति।

महामुनि विश्वामित्रः अयोध्यामागत्य यज्ञरक्षार्थं रामं ययाचे। सः कौशिकः "बलां अतिबलां' तथा समग्राणि अस्त्राणि च ताभ्यां उपदिदेश।

महर्षेः आदेशं शिरसा धारयन् ताटकां अवधीत्। तदनन्तरं सिद्धाश्रमं प्राप्य यज्ञं समारेभे। तस्मिन्नवसरे समागतान् सुबाहुमारीचौ हत्वा यज्ञमपालयत्। सन्तुष्टेन कौशिकेन नीयमानः सहानुजः रामः मिथिलापतेः जनकस्य राजधानी सम्प्राप। कौशिकेन प्रचोदितः रामः ऐश्वरं शैवचापं खण्डयति। राजा जनकः दूतैः दशरथं आनय्य रामादिभ्यः कन्यकाः ददौ। संप्रीतः दशरथः स्वपुरौ प्रतस्थौ। तस्मिन्नवसरे धनुर्भङ्गम् आकर्ण्य रोषभीषणं परशुरामं विजित्य राघवः अयोध्यां प्राप। सर्वगुणसम्पन्नया सीतया साकं सुखमध्युवास।

**2. अयोध्याकाण्डम् -**

श्रीरामस्याभिषेकारम्भं, अभिषेकविघ्नं, वनयात्रा, गृहसंगमं, दशरथस्य स्वर्गप्राप्तिः, भरतागमनं, अत्रिमुनेः आश्रमप्रवेशं, इत्यादयः विशदयति। दशरथस्य अनुज्ञया भरतशत्रुघ्नौ मातुलस्य युधार्जितः गेहं प्रययौ। तदनन्तरं राजा दशरथः पौरः च रामस्य अभिषेकाय समारेभे।

सर्वगुणानामाकरं प्रजानामनुरागभाजनं प्रियतमं रामचन्द्रं यौवराज्याभिषेक्तुं आरभते। सर्वत्रापि रामाभिषेकस्य कथैव शुश्रुवे। अयोध्यानगरी प्रमोदसागरे प्लावयामास। गृहेषु चत्वरेषु रथ्यासु चतुष्पथेषु विपणिषु राजमार्गेषु च मण्डनविधिः समन्ततः प्रववृते। महीपतेराज्ञां शिरसा धारयन् रघुवरः स्वमन्दिरेऽभिषेकोचितं व्रतनियममारंभते।

यदृच्छया कुटिला मन्थरा रामाभिषेकं ज्ञात्वा कैकेयीं उपगम्य दूषित:। मन्थरादूषिताशाया कैकेयी महीपालं पुरादत्तं वरद्वये ययाचे। महीपतिः रामस्य वनवासाय भारतस्य राज्यपालनं च तस्याः वरद्वयं अनुजज्ञे। सीतालक्ष्मणसमेता रामः सर्वान् गुरुन् अनुज्ञाप्य सुमन्त्रेण वह्यमानं रथं आरूह्य वनाय निर्ययौ। श्रीरामानुगमनार्थं वनवासोद्यतस्य श्रीलक्ष्मणस्य कृते जनन्या सुमित्रया अयमादेशो लोके अनुपमं वर्तते-

"रामं दशरथं विद्धि मां विद्धि जनकात्मजाम्।

अयोध्यामटवीं विद्धि गच्छ तात यथासुखम्।" इति।

गङ्गातीरे गत्वा गुहेन सत्कृतः सः एकां निशां तत्र उवास। तदनन्तरं भरद्वाजमुनेः समीपं गत्वा तं नत्वा तेन सत्कृत: स: तस्य निर्देशात् चित्रकूटे सुखं अवसत्। सुमन्त्रा: अयोध्यां गत्वा राघवस्य विचेष्टितं राज्ञे न्यवेदयत्। सुमन्त्रोक्तिं श्रुत्वा राजा दशरथ: रामरामेति विलपन् दिवं ययौ।

वसिष्ठोक्त्या भूपतेः देहं संरक्ष्य मातुलालयात् भरतं क्षिप्रमानयन्। भरतः पितुः मरणवार्तां श्रुत्वा शत्रुघ्ननेन सह अस्य संस्कारादिः यथाविधिं चकार। तदा भरत: राज्याय अमात्यैः चोदयामनः अपि पौरजनैः सह रामं अनेतुं वनाय ययौ। वसिष्ठाद्यरपि चित्रकूटस्थं गत्वा सः जटाधरं रामं राज्यं रक्षितुं ययाचे। "अहं चतुर्दशवर्षां नीत्वा पुरीं एष्यामि' इत्युक्त्वा स्वपादुकं दत्वा तम् प्रत्ययापयत्। दीनमानस: भरत: पादुकं गृहीत्वा नन्दिग्रामे स्थितः ताभ्यां वसुन्धरां ररक्ष च। राघव: अत्रिमुने: आश्रमं गत्वा तं समवन्दत। तस्य पत्नी स्वैः भूषणैः सीतां अभूषयत्। तत्र एकां निशां उषित्वा सीतालक्ष्मण संयुतः सन् दण्डकारण्यं विवेश।

**3. आरण्यकाण्डम्-**

अत्र दण्डकारण्य प्रवेशं, विराधवधं, शूर्पणखा वधं, मारीचनिग्रहं, सीतापहरणं, जडायुगति, कबन्धगति, शबर्याश्रमप्रवेशं इत्यादयः विशदयति।

दण्डकारण्यं प्रविष्टः राघवः तापसानाम् आश्रममण्डलं ददर्श। वने व्रजन् सः तदा सदारानुजं आत्मानं हरन्तं विराघं अवधीत्। सः शरभंगाश्रमं प्राप्य तस्य स्वर्गतिं वीक्ष्य मुनिभिः

अर्थितः राक्षसानां वधं प्रतिजज्ञे। तदनन्तरं सुतीक्ष्णां प्रणम्य अनेन पूजितः सः अगस्त्यस्य आश्रमं प्राप्य तं अनमत्। स मुनिश्रेष्ठः रामाय वैष्णवचापं, तूणीरं, तथा ब्रह्मशरं च खड्गं च प्रददौ।

अनन्तरं पञ्चवटीं प्राप्य लक्ष्मणनिर्मितां पर्णशालां सीतया सहितः सुखमध्युवास। तत्र शूर्पणखा राक्षसी आगत्य रामं लक्ष्मणं वा स्वपतिं भवितुं इति स्वेच्छा प्रकटितवती। ते तन्निराकरोत्। कामार्ता सा तिरस्कृतत्वात् सीतां रुषा अभ्यपतत्। लक्ष्मणः रोषात् श्रवणनासिका कृत्तः। क्रुद्धः खरः रामं हन्तुं राक्षससमन्वितः आययौ। तत्क्षणे रामः खरं अनुयायिनं च जघान। शोकान्विता शूर्पणखा लङ्कां गत्वा सर्वं वृत्तान्तं रावणाय न्यवेदयत्।

रावण: सीतां हर्तुं कृतनिश्चयः मारीचस्य साहाय्यं ययाचे। स्वर्णमृगः भूत्वा मारीचः पर्णशालायां समीपे अचरत्। सा तु कनकमृगं आकृष्टा भवति। तं मृगं आहर्तुं भर्तारम् अयाचत। सीतां रक्षितुं लक्ष्मणं नियुज्य मृगमन्वगच्छतु। शरपतनात् मृगाः निजं रूपं प्राप्य "हा सीते, हा लक्ष्मणा' इत्येवं उच्चैः रुदति। रामस्य रोदनं श्रुत्वा ते खिन्नोऽभवत्। सीतादेव्या प्रेरितः लक्ष्मणः रामस्य समीपं प्रययौ। तस्मिन्नवसरे यतिरूपः रावणः सीतां गृहीत्वा आकाशमार्गेण लङ्काम् प्रययौ। सीतादेव्याः रोदनं निशम्य जडायुः रावणं प्राप्य तुण्डनखेन तं प्राहरत्। रावणः पक्षिश्रेष्ठं जडायुं छित्वा भूतले पातयित्वा निजमन्दिरं लङ्कां प्रविवेश। तां जनकात्मजां अशोकवनिकां संस्थाप्य एनां रक्षितुं निशाचरी नियुज्यते। मारीचं हत्वा आगच्छन् राम: सीतापहरणं ज्ञात्वा दु:खार्त: भवति। काननान्तरे विचिन्वान: तौ रामलक्ष्मणौ छिन्नपक्षं जडायुम् अपश्यत्। तेन उक्तां वार्तां श्रुत्वा तदनन्तरं तस्य उदकक्रियां चक्रे। अयोमुखीं श्रवणानासिकां छित्वा, कबन्धं हत्वा (तेनोक्त्या) ऋश्यमूकस्थं सुग्रीवं प्राप। शबर्याश्रमे तया अभिपूजितः तौ पम्पां प्राप।।

**4. किष्किन्धकाण्डम् -**

किष्किन्धाकाण्डे हनुमत् समागमं, सुग्रीवसख्यं, बालीसुग्रीवयुद्धं, सुग्रीवस्य राज्याभिषेकम्, सीतान्वेषणारम्भम्, सागरं लंघयितुं वानरश्रेष्ठस्य मारुतेः महेन्द्राचलप्रवेशं इत्यादयः विशदयति।

सुग्रीवनिर्दिष्टः हनुमान् रामलक्ष्मणौ प्राप्य तयोः वृत्तान्तं ज्ञात्वा तेन तौ समायोजयत्। रामस्य वृत्तान्तं च सुग्रीवाय निवेद्य पावकसन्निधौ तयोः सख्यं च कारयमास। बालसुग्रीवयोः वैरस्य कारणं रामाय निवेदितं, तस्य तद् बलाधिक्यं च निवेदितम्। दुन्दुभेः कायं, सप्तसालान् च राघवः एकेन बाणेन सुदूरं प्रेषयामास चिच्छेदः च। रामसमन्वित: सुग्रीवः किष्किन्धां प्राप्य गर्जयति। सुग्रीवस्य गर्जनं श्रुत्वा कोपिष्ठः बालिः सुग्रीवमपीडयत्। राघवाज्ञया पुनः सुग्रीवः

रणाय बालिं आह्वयति। रामः बाणेन बालिनं भूतौ न्यपातयत्। सः बालि देहं त्यक्त्वा दिवं ययौ। तदनन्तरं सुग्रीवः वानराणां अधिपतिः चकार।

लक्षमणसमेतः रामः मलयवतः समीपं चतुरान् मासान् उवास। तदनन्तरं लक्ष्मणः रामस्य निर्देशात् हनुमत् प्रमुखैः वानरैः सार्धं वानराधिपं आनयत्। ते वनेरान् सीतान्वेषणार्थं नियुङ्क्ते। रामात् अङ्गुलीयकं गृहीत्वा हनुमत् प्रमुखाः वानराः दक्षिणां दिशां गत्वा विन्ध्या पर्वतं आप्नुवान्। अंगदाद्यः प्लवंगमाः सागरं लंघयितुम् नोद्युक्ताः। जांबवप्रशंसाभिः संवर्धितः अनिलात्मजः, महेन्द्राचलं आरुरोह॥

**5. सुन्दरकाण्डम् -**

सुन्दरकाण्डे आञ्जनेयस्य समुद्रलंघनं, मार्गविघ्नं, लङ्कालक्ष्मीमोक्षः, सीतादर्शनं, रावणस्य सीतादर्शनं, हनुमत्सीता संवादः, लङ्कामर्दनं, रावणसभायां हनुमत्प्रवेशः, लङ्कादहनं, आञ्जनेयस्य प्रत्यागमनं च प्रतिपादयति।

पवनात्मजः सकलान्, अमरान् अभिवद्य अर्णवं लंघयितुं गिरेः पुप्लुवे च। मैनाकं समुल्लंघ्य सुरसां अभिवद्य सिंहिकां निहत्य च महोदधे पारं प्राप। अशोकवनिकां गत्वा खिन्नार्तां सीतां ददर्श। तदा रावणः मैथिलीं उपेत्य "मम भार्या भव' इति अयाचत। सीता तन्निराकारात्। अतः कोपिष्ठः सः निर्गतः। तदा मारुतिः रामस्य वृत्तान्तं उक्त्वा अंगुलीयकं ददौ। अंगुलीयकं स्वीकृत्य सा भृशं विलप्य तस्य करे चूडामणिं ददौ। चूडामणिं स्वीकृत्य - हे देवि। विषादं मा। राघवः रावणं रणे हत्वा त्वां नेष्यति इति एनां आश्वास्य सः विनिर्ययौ। मारुतः अक्षयकुमारादीनि बहूनि रक्षांसि रणे अवधीत्। ततः युद्धे शक्रजिता बद्धः पवननन्दनः रामस्य प्रतापं रावणाय न्यवेदयत्। पवनात्मजः लङ्काम् अशेषतः दग्ध्वा सागरं उत्तीर्य वानरान् समुपागमत्। रामस्य समीपं गत्वा आत्मनाकृतं सर्वं निवेदयामास, चूडामणिं ददौ च।

**6. युद्धकाण्डम् -**

अस्मिन् काण्डे लङ्काविवरणं, युद्धयात्रा, रावणकुम्भकर्णयोः सम्भाषणं, रावणविभीषण संभाषणं, शुकबन्धः, रावणशुकसंवादः, रामरावणयोः युद्धं, कुम्भकर्णस्य नीतिवाक्यं, कुम्भकर्णवधं, नारदस्तुतिः, औषधहरणयात्रा, मेघनादवधः, रामरावणयुद्धं, रावणवधं, सीतास्वीकारं, देवेन्द्रस्तुतिः, अयोध्यागमनं, राज्याभिषेकं,.... इत्यादयः मनोहररीत्या विशदयति।

सुग्रीवप्रमुखैः असंख्यैः वानरैः सह राघवः महोदधेः तीरं प्राप। तदा विभीषणः राममुपागमत्। रामः एनं विभीषिणं लङ्काधिपत्ये अभ्यषिञ्चन्। राघवनिर्दिष्टाः नीलप्रमुखः वानराः वृक्षपाषाणपाणयः लङ्कां रुरोध, प्रहरतप्रमुखान् राक्षसान् युधि हत्वा वानरश्रेष्ठाः गर्जिताः। पराक्रमशाली सुग्रीवः, मारुतिः, रामः लक्ष्मणः च अनेकान् राक्षसान् जघ्नुः। इन्द्रजितः तत्रागत्य नागास्त्रेण रामलक्ष्मणौ बन्धितः। तदैव पक्षिराजः गरुडः तौ व्यमोचयत्। राघवेण पराजितः, रावणः युद्धाय कुम्भकर्णं नियुज्यते। किन्तु रामः कुम्भकर्णं जघान। तदनन्तरं अस्त्रकोविदः इन्द्रजित् ब्रह्मास्त्रेण रामलक्ष्मणौ अमोहयत्। तदैव हनुमान् गत्वा औषधीपर्वतमानीय तान् सर्वान् बोधयित्वा तं तत्स्थाने अस्थापयत् च। विभीषणेन साकं सौमित्रिः निकुम्भिलां गत्वा इद्रजितः होमं निषिध्य तं जघान च। पुत्रस्य दारुणान्त्यं ज्ञात्वा क्रुद्धः रावणः रामेण भृशं घोरं युद्धं आरभते। घोरयुद्धेन पीडितः तम् ब्राह्मास्त्रेण जघान। रावणनिग्रहात् सन्तुष्टाः शक्रादयः देवाः राघवस्य उत्तमांगे पुष्पवृष्टिं अकुर्वत। रामः विभीषणं राक्षसानां अधिपतिं अग्निप्रवेशशुद्धां मैथिलीं परिजग्राह। सर्वान् प्लवंगमान् आशु जीवयित्वा विविधैः धनसञ्चयैः अतोषयत्। तदनन्तरं सीतालक्ष्मणसमेताः रामः विभीषण वानरैर्साकं पुष्पकं आरूह्य निर्ययौ। अयोध्यां प्रति गच्छन् ते भरतस्य नन्दिग्रामं ज्ञात्वा उपागमत्। अनन्तरं तापसवेषं सन्त्यज्य प्रीतैः बन्धुजनैः सह अयोध्यां प्रविवेश। अथ रामं यथाविधिं अभ्यषिञ्चत्।

**7. उत्तरकाण्डम् -**

अत्र सीता परित्यागः, सीतादेव्यः वाल्मीकेराश्रमगमनं, लवणासुरवधं, ससुतां सीतादेव्याः प्रत्यागमनं च प्रतिपादयति।

राघवः रावणदूषितां सीतां तत्याज। एतद् श्रुत्वा वाल्मीकिः अन्तरवन्तीं एनां समाश्वास्य निजाश्रमं आनीय तत्रैव ससुखं अवसत्। अथ ऋषिभिः प्रार्थितस्य राघवस्य नियोगेन शत्रुघ्नः लवणासुरं हत्वा तान् अपालयत्। रामः सुवर्णमयीं सीतां कृत्वा यज्ञमाचरेत्। एतत् ज्ञात्वा वाल्मीकिः, ससुतां सीतां आनीय तस्मै ददौ। रामस्य निर्देशात् वानराः पौरैः साकं सरयूतीरे गत्वा देहं त्यक्त्वा दिवं प्रापुः। अथ भरतशत्रुघ्नौ निजं रूपं स्वीकरोति। रामः, मानुषं देहं त्यक्त्वा स्वधामं आविशत्।

एवम् अतिमनोहररीत्या रामायणं विरचितं, आदिकविना वाल्मीकिना। रावणस्य वरलब्धिः, अष्टादशशापः, पूर्वजन्मवृत्तान्तं ससूक्ष्मतया विशदयति।

## पुनरावृत्तिः (Recap)

- आदिकविना वाल्मीकिना विरचितं रामायणं आदिकाव्यं भवति।
- सप्तकाण्डेषु विभक्तेषु अस्मिन् ग्रन्थे दशरथस्य पुत्रकामेष्ठि यागं, श्रीरामादीनां जननम्, विश्वामित्रस्य यागरक्षा, श्रीरामाभिषेकविघ्नं, वनयात्रा, सीतापहरणं, सुग्रीवसख्यं, बालिवधं.... इत्यादयः विशदयति।
- रामायणमवलम्ब्य इतरसाहित्येष्वपि अनेकान् ग्रन्थान् अरचयन्। काव्येऽस्मिन् आदर्शशिक्षा बहुशः वर्ण्यते।
- मातृ-पितृ-भ्रातृ-सेवक धर्मादिः अतीव महत्वपूर्णेन प्रतिपादयति। रामायणस्य महत्वमेवमुच्यते यावत्स्थास्यन्ति गिरयः सरितश्च महीतले। तावत्रामायणकथा लोकेषु प्रचरिष्यति।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. आदिकविः कः?
2. आदिकवेः पूर्वनाम किम्?
3. वाल्मीकिरामायणे कस्य रसस्य प्रधानता वर्तते?
4. रामायणे कति काण्डाः सन्ति?
5. श्रीरामः कस्य महर्षेः यज्ञम् अरक्षत्?
6. विश्वामित्रेण उपदिष्टस्य मन्त्रस्य नाम किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. रामायणे कति काण्डानि सन्ति? तेषाम् नामानि लिखत।
2. अहल्यामोक्षमधिकृत्य लिखत ।
3. लक्ष्मणसमन्वितः रामः प्रथमतय। केन सत्कृतः?
4. लक्ष्मणकृते सुमित्रायाः उपदेश श्लोकं – लिखत।

5. रामरावणयुद्धे विभीषणस्य प्राधान्यं किमिति विशदयत।

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. श्रीराभिषेक विघ्नस्य कारणं संक्षिप्तेन लिखत।
2. भरतस्य भ्रातृभक्तिमधिकृत्य लिखत।
3. रावणाय न्यवेदयत् शूर्पणखा वृत्तान्तं लिखत।
4. सीतापहरणमधिकृत्य टिप्पणिं लिखत।
5. आञ्जनेयस्य लङ्काप्रवेशमधिकृत्य खण्डिकां लिखत।

## निर्दिष्टाभ्यासः **(Assignment)**

1. श्रीरामदेवस्य सीतापरित्यागमधिकृत्य भवत: अभिप्राय: किम्? विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि **(Answer to Objective type Questions)**

1. वाल्मीकिः।
2. रत्नाकरः ।
3. करुणरसस्य।
4. सप्त।
5. विश्वामित्रमहर्षेः।
6. "बलां अतिबलां' ।

## सूचनाग्रन्थाः**(References)**


1. संस्कृतसाहित्येतिहासः। आचार्य लोकमणि दाहलः। कृष्णदास् अक्कादमि, वारणसि।
2. संस्कृतनिबद्ध नवनीतम्। डॉ. पारसनाथद्विवेदि। श्रीराम मेहरा एण्ड कम्पनी, आग्रा।
3. श्रीमद्वाल्मीकिरामायणम्। कालूरि हनुमन्तरावः। Fontline Graphics, Baglingampally, Hyderabad.
4. Balaramarayanam, P.S. Anantanarayana Sastri, R.S. Vadhyar & Sons, Palakkad

5. वाल्मीकिरामायण, सुन्दरकाण्डम्। K. Vijayan, S.B. Press, College Lane, Thiruvananthapuram
6. History of Sanskrit Literature, T.K. Ramachandra Aiyar, R. S. Vadhyar & Sons, Palakkad

SGOU

# Unit - 2
# महाभारतम्

## उद्देश्यानि (Learning Outcomes)

- महाभारतमधिकृत्य ज्ञानं लभते।
- महाभारतस्य कर्ता, कति पर्वाणि, कुरुक्षेत्रयुद्धं, तस्य परिणितफलं च अधिकृत्य पठितुं शक्यते।
- महाभारतस्य मूल्यान् अवगच्छति।

## प्राग्व्यपेक्षाः (Pre requisites)

वेदव्यासविरचितं भवति महाभारतम्। महत्वात् भारवत्वात् च महाभारतम् उच्यते। भरतवंशजानां कौरवानां पाण्डवानां च कथाः वर्णयन्ति चेत् महाभारतनाम्ना अपि अभिधीयते। प्राचीननिर्वचनमनुसृत्य महाभारतम् इतिहासम् इति उच्यते।

## मुख्यपदानि (Key terms)

महत्वाद्भारत्वाद् महाभारतमुच्यते, पुरुषार्थ-चतुष्टयं, अष्टादश पर्वाणि, अङ्गीरसः शान्तः, वीरः अङ्गरसः।

## DISCUSSION

### 2.2.1. महाभारतम् -

"नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्।।"

लौकिकसाहित्यग्रन्थेषु अद्वितीयं भवति महाभारतम्। अस्य ग्रन्थस्य प्रणेता भवति कृष्णद्वैपायनोव्यासः। इदं हि जयसंज्ञकस्य इतिहासस्य भारतसंज्ञकस्य आख्यानस्य च संग्रहत्वात् महाभारतमिति कथितम्। अतः एवोक्तम्-

"महत्वाद्भारवत्वाद् महाभारतमुच्यते" इति। संस्कृतवाङ्मयस्य अनुपमं ग्रन्थमिदं विषयगाम्भीर्येण विपुलकलेवरभरेण महतां भरतानां जन्मादिवृत्तान्तोपवर्णनेन च

महाभारताख्यम् इति नामस्यौचित्यं सुव्यक्तमेव। भारतस्य महत्वं वितन्वानं महाभारतं प्रकाशयितुं प्रयत्न: समारब्ध:।

महाभारते कुरुपाण्डवानां कथा सविस्तरं प्रतिपादयति। निखिल धर्मोपदेश विराजितेऽपि अत्र सर्वेषामेव रसानां सम्यक्तया सर्वेजनान् कृतार्थन् भवति। अस्मिन् ग्रन्थे आर्यसंस्कृते: सर्वमेव जीवन-सर्वस्वं, पुरुषार्थ-चतुष्टयं च दृष्टु शक्यते। सर्वेऽपि धर्मोपदेश:, वर्णाश्रमव्यवस्था, विविधोपाख्यानानि, राजनीति आयोधनकलाकौशलाः च पौनःपुन्येन समावेशित:। आर्यसंस्कृते: सनातनधर्मस्य च महद्ग्रन्थोऽस्ति महाभारतम्। अत्र च वेदानां रहस्यं, उपनिषत् सारः, इतिहासपुराणयो: उन्मेषनिमेषा:, चातुर्वण्यव्यवस्था:, ग्रह-नक्षत्र-तारादि-परिमाण-वर्णनं.... इत्यादय: भणितानि सन्ति। अत एवोक्तम्-

"धर्मे तु अर्थे च कामे च मोक्षे च भरतर्षभ:

यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।"

संसारस्य समेषां विषयाणां संकलनात् सकल शास्त्रीयविषयाणां सारग्रहणात् विश्वकोशरूपेण स्वीकार एवास्य गौरवं वर्द्धयति। काव्यदर्शनं, वैदिकतत्वं, नीतिरहस्यं, आध्यात्मिक रहस्यं, ऐतिहासिक तत्वं,... इत्यादि लोकोपकारयुक्तं विषयान् सुमधुरया रीत्या संगृहीतमस्ति। अत अस्य ग्रन्थरत्नस्य सादृश्यं विश्वस्य अन्यग्रन्थस्य किमपि महत्वं न विभाति।

ग्रन्थस्य अस्य अङ्गीरस:, शान्त:, वीर: तु अङ्गरस:। भौतिकजीवनस्य तुच्छतां निदर्शनमुखेन प्रतिपाद्य मोक्षं प्रति सर्वेषां अनुकूलयति इति शान्तस्य प्राधान्यम्। असौ हि भारतीयसंस्कृते: विश्वकोश:। चत्वार एव पुरुषार्था: साङ्गोपाङ्ग साधिता अन्ते च मोक्षस्य सर्वोपरित्वमपि साधितम्। सर्वेषामपि वर्णानाम् आश्रमाणाञ्च समानरूपेण ग्राहयो असौ ग्रन्थे धर्मस्य नित्यत्वं कामार्थयो: अनित्यत्वं च प्रतिपादयति। तेनैव असौ पञ्चमो वेद: इति कथित:। अस्य आशीतितमो भाग: उपदेशपरं शेषभाग एव कथावस्तुपर: इति आचारशास्त्र रूपेणापि गृह्णते। शान्तिपर्वाणि प्राधान्येन राजधर्म: प्रतिपादितोऽस्ति।

अयं ग्रन्थ: बहुभि: बहुधा व्याख्यातोऽस्ति। अस्य व्याख्यातृषु द्वाविंशति: प्रसिद्धा:। नारायणस्य भारतार्थप्रकाश: अर्जुनमिश्रस्य भारतार्थदीपिका.... इत्यादय:। श्रीमद्भगत्गीता, मनुस्मृतिः, गजेन्द्रमोक्ष:, भीष्मस्तवराज:, विष्णुसहस्रनाम चेति पञ्च सन्दर्भा पञ्चरत्नत्वेन गृहीता:।

महाभारते अष्टादश पर्वाणि सन्ति। आदि – सभ – वन – विराट – उद्योग – भीष्म – द्रोण - कर्ण-शल्य-सौप्तिक – स्त्री – शान्ति – अनुशासन – अश्वमेधिक – आश्रमवासिक – मौसल – महाप्रस्थानिक - स्वर्गारोहण चेति। अत्रहि मूलतः पाण्डयवानां जन्मादारभ्य मोक्षपर्यन्त कथा वर्णितोऽस्ति। पर्वाणि पुन: अध्याय: चेति विभज्यते।

महाभारते अन्तर्गतानि शाकुन्तलोपाख्यानं, मत्स्योपाख्यानं, सावित्र्युपाख्यानं, रामोपाख्यानं, नलोपाख्यानञ्च प्रसिद्धानि। शाकुन्तलोपाख्यानमधिकृत्य कालिदासेन अभिज्ञानशाकुन्तलं नाम नाटकं प्रणीतम्। नलोपाख्यानमादाय श्रीहर्षेण नैषधीयचरितं महाकाव्यं विरचितम्। भासेन महाभारतकथामादाय नाटकचक्रमेव च निमिर्तम्।

रामायणमहाभारतयो: पौर्वापर्यविषये शङ्कां जनयन्ति। तदनुसारेण महाभारतं हि लोकसम्मतचरित्रसंबन्धं भवति। रामायणं तु नितान्तमेव काल्पनिकचरित्रावृतम्।

महाभारतं न केवलं अर्थदिशा, अपि तु शब्ददिशापि निखिलानपि ग्रन्थान् अतिशेते। अत एव च शब्दार्थदृष्ट्या सर्वातिशायिनो ग्रन्थरत्नस्य अस्य महाभारतमिति यथार्थ संज्ञा संराजते। अत्र परमपुरुषाकारस्य पापविनाशकस्य हरिकीर्तनस्य विशेषतो वर्णना विराजते। अथ एवोक्तम्-

"वेदे रामायणे चैव भारते च विशेषत:।
आदावन्ते च मध्ये च हरि: सर्वत्र कीर्त्यते।।"

वेदानां धर्म प्रधानत्वात् कर्मकाण्डसमन्वितात् आध्यात्मिकजटिलविषयबाहुल्यात् आचारशिक्षा परिपुष्टत्वात् च मनोहरश्च भवति। अत एव न केवलं भारते अपि तु विदेशेषु महाभारतस्य महती प्रतिष्ठा वर्तते। भारतीय धर्मशास्त्रे संस्कृत वाङ्मये बहूनि भारत माहात्म्यपराणि पद्यानि प्रतिपथम् अवतरन्ति।

**1.** आदिपर्वम् -

लोमहर्षणपुत्र उग्रश्रवाः सूतः पौराणिको
नैमिषारण्ये शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे।।

इति श्लोकादारभ्य त्रयस्त्रिंशत् द्विशताधिकाध्ययपर्यन्तं आदिपर्वस्य कथावस्तु प्रतिपादयति। समन्तपञ्चकक्षेत्रवर्णनं, अक्षौहिणि सेनाया: परिमाणम्, जनमेजयं प्रति सरमाया: शाप:, जनमेजयकर्तृकं सोमश्रवस: पौरोहित्यवरणम् च आदिभागे विशदयति। तदनन्तरं ऋषिवर्याणां सन्दर्शनं, शाप:, वरप्राप्ति: आश्वासवचनं, पुत्रोत्पत्ति: च विवृणोति। ययाति

शर्मिष्ठयो: एकान्तसंग्रामः, पुत्रोत्पत्तिः, ययातेः स्वपुत्रं पूरुं प्रति कृतस्योपदेशस्य वर्णनं, भीष्मप्रतिज्ञा चित्राङ्गदविचित्रवीर्यो: उत्पत्ति:, विचित्रवीर्यस्य राज्याभिषेकं च वर्णयति। स्वयंवरसमायात् काशिराजकन्यकानां भीष्मकर्तृकमपहरणम्, तत: कुपितानां राज्ञां शल्वनरेश्वरस्य च युद्धे पराजयोऽम्बिकाम्बालिकाभ्यां सह विचित्रवीर्यस्य विवाह:, व्यासकर्तृकेन नियोगेन विचित्रवीर्यक्षेत्रे धृतराष्ट्रपाण्डुविदूराणामुत्पत्ति:, धृतराष्ट्रस्य विवाह:, कुन्त्या दुर्वासस: मन्त्रग्रहणम् सूर्यसंगमेन कुन्त्यां कर्णस्य जन्म, पाण्डुना सह कुन्त्या:, माद्र्याः परिणय: च सविस्तरं विशदयति। कुरुपाण्डवानां जन्मवृत्तान्त:, युधिष्ठिरस्य यौवरराज्याभिषेक:, पाण्डवानां विवाह: वनवासं, सुभद्राहरणं, खाण्डवदहनं, मयासुरसंरक्षणं, जरिताया: विलपनम्, श्रीकृष्णार्जुनयो: यमुनातटप्रवेशनं च आदिपर्वे अति मनोहररीत्या प्रतिपादयति।

**2. सभापर्वम् -**

सभापर्वे श्रीकृष्णस्याज्ञया मयस्य पाण्डवसभां निर्मातुमारभ्यते। तदनन्तरं श्रीकृष्णस्य द्वारकायात्रा मयनिर्मितेरस्य सभाभवने युधिष्ठिरस्य प्रवेश:, इन्द्र-यम-वरुण-कुबेर-ब्राह्मण: च सभाया: वर्णनं, राज्ञो हरिश्चन्द्रस्य माहात्म्यं, युधिष्ठिरं प्रति पाण्डो: संदेश: च विशदयति। तदनन्तरं राजसूयवर्णनं, जरासंधवधम्, कारागृहवासिनां नृपाणां मोचनं, श्रीकृष्णस्य द्वारकां प्रति गमनं च विस्तारयति। अर्जुनप्रभृतीनां दिग्विजयगमनं, अर्जुनकर्तृके बहूनां देशानां नृपाणां च विजय:, इतरभ्रातॄणां दिग्विजय: च वर्णयति। पुन: राजसूयवर्णनं, शिशुपालवधं, पाण्डवान् विजेतुं शकुनिदुर्योधनयो: आसूत्रणं, युधिष्ठिराभिषेकः, द्यूतक्रीडारम्भ:, विदुरकर्तृतकं दुर्योधनभर्त्सनं, दुर्योधनस्य कपटभाषणं श्रुत्वा भीमसेनवस्य रोषं, धृतराष्ट्रस्य युधिष्ठिरं प्रति इन्द्रप्रस्थं गन्तुम् आदेश:, पुन: द्युताह्वानं, पाण्डवानां वनगमनं, धृतराष्ट्रस्य चिन्ता, संजयेन सह तस्य वार्तालाप: च अत्र सभापर्वे विशदयति। एकाशीति (81) अध्यायाः सन्ति।

## 3. वनपर्वम् -

अतिदीर्घे वनपर्वे पाण्डवानां वनवासं विशदयति। नलचरितं, किरातार्जुनीयमुपकथा च वर्णयति। पञ्चदशाधिकत्रिशततमोऽध्यायाः (315) सन्ति।

पाण्डवानां वनगमनं, धनस्य दूषगानि, अन्नप्राप्तये युधिष्ठिरकर्तृकं सूर्योपासनं, द्यूतकालं श्रीकृष्णस्य आगमनं, पाण्डवानां द्वैतवने गमनं, भीमसेनकर्तृकं पुरुषार्थप्रशंसनं, युधिष्ठिरकर्तृकं भीमसेनप्रबोधनं, किरातवेषेण शिवेन सह अर्जुनस्य युद्धं, अर्जुनाय पाशुपतं प्रदाय पशुपतेः प्रस्थानम्, चित्रसेनोर्वशी संवादः, नलदमयन्त्योः गुणानां वर्णनं, दमयन्तीबाहुकयोः वार्तालापः, भीष्मरथप्रश्नमनुसृत्य पुलस्तकर्तृकं विविधतीर्थमाहात्म्य वर्णनं, कुरुक्षेत्रे स्थितानां तीर्थानां वर्णनं, सगरपुत्रोत्पत्तिः, भगीरथस्य तपश्चरणं, ऋष्यश्रृंगस्य लोमपादभवने गमनं, च्यवनमहर्षेः वर्णना च अत्र प्रतिपादयति।

अष्टावक्रस्य जन्मवृत्तान्तम्, भरद्वाजस्य पुत्रशोकेन विलापः, भीमसेनस्य सौगन्धिपुष्पमादाय गमनं, श्रीहनुमद्भीमसेनयोः संवादः, जटासुरवधं, कुबेरस्य गन्धमादन-आगमनं, अर्जुनस्य निवातकवचैः सह संग्रमः, मार्कण्डेयकर्तृकं कर्मफलभोगविवेचनं, बकशक्रसंवादः, पतिव्रता माहात्म्यं, स्कन्धपार्षदानां वर्णनं च।

पाण्डवानां काम्यकवने गमनं, द्रौपदीहरणं, जयद्रथवधम्, अतिबृहत् रीत्या रामकथावर्णनं च। पतिव्रता माहत्म्यं, कुण्डलहरणम् अज्ञातवासानुमति चात्र सविस्तरं प्रस्तौति।

## 4. विराटपर्वम् -

विराटपर्वे द्विसप्ततिरध्यायाः (72) सन्ति। अस्मिन् पर्वे विराटनगरे कर्तुकामानां पाण्डवानां चरितादारभ्य तयोः विवाहं च विशदयति।

विराट नगरे पाण्डवप्रवेशः, युधिष्ठिरकर्तृकं दुर्गादेव्याः स्तवनं, प्रत्यक्षमाविर्भूतायाः देव्याः तस्मै वरप्रदानं, युधिष्ठिरस्य राजसभायां प्रविश्य विराटेन सह संलापः तत्र निवासः च, भीमसेनस्यापि विराटसभायां प्रवेशः, सैरन्ध्रीरूपया द्रौपद्या विराटस्यान्तःपुरं गत्वा सुदेष्णाय सह संलापः, भीमसेनकर्तृके जीमूतस्य वधः, द्रौपदीं दृष्ट्वा कीचकस्य प्रणयप्रार्थनां तस्य भर्त्सनं,

कीचककृतं द्रौपद्याः अपमानम्, भीमसेनं प्रति तस्या: दु:खनिवेदनं, कीचकभीमसेनयो: संग्रामे कीचकवध:, द्रोणस्य, कृपाचार्यस्य च सम्मति:, विराटस्य गवापहरणं, द्रोणेन कृतं अर्जुन-पराक्रमप्रशंसनं, दुर्योधनस्य युद्धाय निश्चय: कर्णस्योक्ति:, भीमस्य सैन्ये शान्तिं ऐक्यं च स्थापयितुं यत्न:, अर्जुनस्य कर्णादीन् प्रत्याक्रमणं, अर्जुनद्रोणाचार्ययो: युद्धं, आचार्यस्य पलायनं, कर्णार्जुनयो: युद्धं, कर्णस्य पराजयं, भीष्मार्जुनयो: युद्धं, अर्जुनेन सह दुर्योधनस्य युद्धं, अर्जुनात् कौरवदलस्य पराजय:, विजयविषये विराट-उत्तरयोः वार्तालाप:, पाण्डवानां विवाह: च अतिविस्तृतया प्रतिपादयति।

**5. उद्योगपर्वम् -**

विराटसभायां श्रीकृष्णस्य प्रवचनादरभ्य अस्मिन् पर्वे षण्णावत्यधिकशततमो (196) अध्याया: सन्ति। अस्मिन् पर्वे विराटसभायां श्रीकृष्णस्य प्रवचनम् बलरामभाषणम्, द्रुपदस्य सम्मति:, श्रीकृष्णस्य द्वारकागमनं, विराटद्रुपदयो: संदेशेन राज्ञां पाण्डवपक्षे युद्धायगमनम्, श्रीकृष्णेनदुर्योधनार्जुनयो: साहाय्यकरणम्, सत्कारेण सुप्रसन्नस्य शल्यस्य दुर्योधनाय वरदानं, युधिष्ठिराय सान्त्वनं प्रदानं च, देवर्षीणामाग्रहेण नहुषस्य देवेन्द्रपदेऽभिषेक:, कामासक्तिचिन्तां आपन्नाय इन्द्राण्य बृहस्पतिना आश्वासनम्, देवतानहुषसंवादो बृहस्पतिना इन्द्राण्या: संरक्षणम् किञ्चिद्कालावधिं प्रार्थयितुं तस्या नहुषसमीपे गमनम्, इन्द्रेण स्वर्गे गत्वा स्वकीयराज्यस्य पालनं, युधिष्ठिरमाश्वास्य शल्यस्य दुर्योधनसन्निधौ गमनम्, द्रुपदपुरोहितवार्तया अनुमोदनं कुर्वता भीष्मेण अर्जुनस्य प्रशंसनं, कर्णस्य आक्षेपपूर्णं वचनं, भीष्मकथनं समर्थयता धृतराष्ट्रेण दूतस्य ससम्मानं प्रस्थापनं, पाण्डवानां प्रभावं प्रतिभां च उपवर्ण्य धृतराष्ट्र संजयद्वारा पाण्डवसन्निधौ सन्देशप्रेणम्, युधिष्ठिरप्रश्नानामुत्तरं विवृण्वत: संजयस्य तं प्रति राज्ञो धृतराष्ट्रस्य सन्देशं श्रावयितुं प्रतिज्ञानम्, युद्धे दोषान् संभाव्य संयोजस्य युधिष्ठिरं ततो विरमयितुं प्रयत्न:, संजयस्य निवर्तनसमये युधिष्ठिरस्य संदेश:, धृतराष्ट्राया विदुरस्य हितोपदेश:, धृतराष्ट्रंप्रति विदुरस्य नीतियुक्तो उपदेश:, कौरवसभायां संजयस्य सव्यसाचिसंदेशमुद्घघोषणम्, संजयेन युधिष्ठिरस्य प्रमुखसहायकानां वर्णनम्, संजयेन धनञ्जयस्य ध्वज अश्वादीनां धर्मराज प्रभृतीनां च

वर्णनम्, धृतराष्ट्रेण स्वपरपक्षयो: बलाबलयो: गुणदोषसमीक्षणपूर्वकं समाख्यानम्, दुर्योधनस्य स्वसामान्यसमुद्धोषणम्, धृतराष्ट्रकर्तृकं दुर्योधनप्रबोधनम्, श्रीकृष्णेन युधिष्ठिरस्य युद्धार्थं प्रोत्साहनम्, भीमसेनस्य शान्तिप्रस्ताव:, अर्जुनवाक्यम्, नकुलस्य निवेदनम्, द्रौपद्या: दु:खनिवेदनं, श्रीकृष्णेन तस्या: समाश्वसनं च, कौरवसभायां श्रीकृष्णस्य प्रभावशालिभाषणम्, भीष्मद्रोणाभ्यां पुनदुर्योधनस्य प्रबोधनं, पाण्डवेभ्यो अर्थराज्यं दातुमादेश:, कौरवपाण्डवरथ्यादीनां वर्णनं, अम्बोपाख्यानवर्णनम्, भीष्मपरशुरामयो: घोरयुद्धम्, च प्रतिपादयति।

**6. भीष्मपर्वम् -**

कुरुक्षेत्रे सैनिकानां स्थिति वर्णनादारभ्य भीष्मकर्णयोः रहस्यपूर्ण: संवाद: द्वाविंशत्यधिकशततमोऽध्यायेन (122) समाकालिता:।

अत्र कुरुपाण्डवानां युद्धनियमानां निर्माणं, धृतराष्ट्रप्रश्नमनुसृत्य संजयकर्तृकं भूमे: महत्ववस्य वर्णनं, पञ्चमहाभूतानां सुदर्शनदीपस्य च वर्णनम्, भारतभूमे: महत्वं च, भारतवर्ष युगमनुसृत्य नराणां आयुर्गुणानां च वर्णनम्, शाकद्वीपवर्णनम्, कौरवसेनाय कोलाहल:, भीष्मरक्षकाणां परिचयश्च, उभयसेनयो: स्थिति: युधिष्ठिरस्य रणयात्रा, कौरव सेनां हन्तुम् अर्जुनं प्रति श्रीकृष्णस्य आदेश:, श्रीमद्भगवद्गीता वर्णनं उभयो: सेनयो: प्रमुखवीराणां शङ्खध्वने: च वर्णनं, निष्कामकर्मप्रतिपादनं, ज्ञानविज्ञानयो: वर्णनं, गीताया: महात्म्यं, उभयो: पक्षयो: सैनिकानां द्वन्द्वयुद्धं, द्वन्द्वयुद्धानां भीकरता, भीष्मविराटयो: अर्जुनाश्वत्थाम्नो: भीमदुर्योधनयो:, अभिमन्युलक्ष्मणयो: च अर्जुनस्य पराक्रम:, भीष्मस्य महत्वं, भीष्मस्य पतनं, प्राणधारणं, भीष्मकर्णयो: रहस्यपूर्ण: संवाद: च विशदयति।

**7. द्रोणपर्वम् -**

रथान् निपतिते भीष्मो कौरवाणां शोकवर्णनादारभ्य पाराशर्येण पार्थं प्रति भगवत: शिवस्य महिम्नो वर्णनपर्यन्तं द्वयाधिकद्विशततमोऽध्याया: (202) सन्ति।

अत्र भीष्मपतनानन्तरं कर्णस्य यात्रा, द्रोणस्य, सेनापतिपदेऽभिषेक:, द्रोणस्य पराक्रमं, भगवत: श्रीकृष्णस्य संक्षिप्तलीलावृत्तवर्णनं, कौरवपाण्डववीराणां द्वन्द्वयुद्धं, शल्येन सह भीमस्य

युद्धं तस्य पराजयं च, धनञ्जयस्य विजयं, सुशर्मादि संशप्तकवीराणां प्रतिज्ञा, अर्जुनस्य युद्धाय तन्निकटे गमनं च, संशप्तकैः सह अर्जुनस्य द्वन्द्वयुद्धं, द्रोणयुद्धविषये दुर्योधनकर्णसंवादः, कौरवसेनायाः पलायनं, अभिमन्यु वधं, चक्रव्यूह निर्माणं, पाण्डवैः सह जयद्रथस्य युद्धं, युधिष्ठिरविलापः, तस्य समीपं व्यासस्य आगमनं, भगवतः श्रीरामस्य चरित्रं, राज्ञः भगीरथस्य, दिलीपस्य, अम्बरीषस्य, रन्तिदोवस्य, भारतस्य, पृथोः, परशुरामस्य.... च वर्णनम्।

अभिमन्युवधादर्जुनस्य विषादः क्रोधश्च, धृतराष्ट्रस्य विलापः, युयुधान युधिष्ठिरयोः संवादः, सात्वकिना कृतवर्मणः पराजयः, सात्वकिना सुदर्शनस्य वधः, घटोत्कचवधं, द्रोणवधं, कौरवसैन्यानां तत्पतीनां च पलायनं, नारायणास्त्रमोक्षं, पाराशर्येण पार्थं प्रति भगवतः शिवस्य महिम्ने वर्णनं च अतिविस्तृतया प्रतिपादयति।

**8. कर्णपर्वम् -**

राधेयवधसूचनया समुत्सुकस्य जनमेजयस्य विस्तृत इतिवृत्तादारभ्य कर्णस्य वधेन परिसमाप्ते अस्मिन् पर्वे षण्णावति (96) अध्यायाः सन्ति। धृतराष्ट्र सञ्जय संवादः, अश्वधाम्नः प्रस्तावनायां कर्णस्य सैनापत्येऽभिषेकः, द्वयोः सेनयोः घोरं युद्धं, अर्जुनादश्वत्थाम्नः पराजयः, कौरवपाण्डव सेनयोः घोरं युद्धम्, सहदेवाद् दुःशासनस्य पराजयः, युधिष्ठिरेण दुर्योधनस्य पराजयः, शल्यं प्रति कर्णसारथ्यस्वीकाराय दुर्योधनस्य प्रार्थना, शल्येन सह कर्णस्य वार्तालापः, श्रीकृष्णार्जुनयोः प्रभावं स्वीकुर्वता कर्णेनाहङ्कारपूर्वक शल्यस्य भर्त्सनं, तं प्रति परशुरामेण केनचित् ब्राह्मणेन च प्राप्तस्य स्वस्य शापस्य प्रकथनम्, कर्णभीमसेनयोः युद्धं, कर्णस्य पलायनं, उभयोः सेनयोः घोरं युद्धं कौरवसेनाया वैक्लव्यं च अति सविस्तरं प्रतिपादयति।

युधिष्ठिरं प्रति कौरवसैनिकानाम् आक्रमणं, युधिष्ठिरस्य अर्जुनं प्रति रोषवचनं, उभयोः पक्षयोः द्वन्द्वयुद्धं सुषेणस्य वधं, कर्णकर्तृकः पाण्डवसेनायाः संहारः तस्य पलायनं च, अर्जुनभीमसेनाभ्यां कौरववीराणां संहारः, कौरवाणां विषादः, भीमसेनादीनां पाण्डवानां प्रहर्षः,

अर्जुनकर्तृके रथसेनाया विध्वंसः, शल्यकर्तृकं रणभूमेर्दिग्दर्शनं कौरवसेनायाः पलायनम्, श्रीकृष्णार्जुनयोः शिबिराय गमनं, कौरवसेनायाः शिबिराय पलायनं, रणभूमौ कर्णे हतं दृष्ट्वा प्रहृष्टेन धर्मराजेन श्रीकृष्णार्जुनयोः प्रशंसनं, धृतराष्ट्र विषादः च अतिविपुलतया रीत्या प्रतिपादयति।।

**9. शल्यपर्वम् -**

अत्र पञ्चषष्टि (65) अध्यायाः सन्ति। कौरवसेनायाः पराजयवार्तां श्रुत्वा धृतराष्ट्रस्य मोह वर्णनादारभ्य दुर्योधनस्य दुश्चस्थापर्यन्तं कथां विस्तारयति।

धृतराष्ट्रं प्रति विदुरस्य आश्वासवचनं, कृपेण दुर्योधनं प्रति प्रबोधनं, राज्ञः शल्यस्य धीरोचितोद्गारः, श्रीकृष्णस्य शल्यवधार्थं युधिष्ठिराय प्रोत्साहनं, उभयपक्षस्य घोरं युद्धं, शल्यस्य पराक्रमः, कौरवपाण्डववीराणां द्वन्द्वयुद्धं, पाञ्चलवीरस्य सुरथस्य वधं, कृतवर्मणः पराजयः, दुर्योधनस्य शौर्यं, कौरवपक्षस्य सप्तशतरथानां संहारः, सात्यकिना संजयस्य ग्रहणम्, श्रीकृष्णार्जुनयोः वार्तालापः, अवशिष्ट्याः कौरवसेनायाः वधः सप्तसारस्वततीर्थस्य उत्पत्ति महत्वं, ऋषीणां प्रयत्नेन सरस्वत्याः शापनिवृत्तिः, स्कन्दस्य रणयात्रा, तारकमहिषासुरादीनां संहारः इत्यादि प्रतिपादनमतिमनोहरं भवति।

अनेकानां ऋषीणां वर्णनवेलायां दधीचि, सारस्वतामुनेः च प्रकीर्तनं दर्शितुं शक्यते। कुरुक्षेत्र सीम्नायाः महत्वं, बलदेववचनाद् भीमदुर्योधनाभ्यां गदायुद्धवर्णनं, भीमकर्तृके दुर्योधनस्य तिरस्कारः, धर्मराजप्रेरणाया श्रीकृष्णस्य हस्तिनपुरे गमनं, तत्र संजयसमक्षे दुर्योधनस्य विलापः .... इत्यादि वर्णना सहृदयमनसि तीव्रविकारोद्भूयते।।

**10. सौप्तिकपर्वम् -**

अष्टादशाध्यायेषु (18) मिलिताः सौप्तिकपर्वे कौरवपक्षस्य त्रयाणां महारथानां गूढप्रवृत्तिः मनोहररीत्या प्रतिपादयति।

एकस्मिन् वने त्रयाणां महारथानां विश्रमः, कृपस्य द्रौणीं प्रति कर्तव्यविषये प्रेरणा, कृपाश्वधाम्नोः संवादः, तथा त्रयाणां पाण्डवशिबिराय प्रस्थानं, शिबिरद्वारे कश्चित् अद्भुतं पुरुषं

दृष्टवा तस्योपरि द्रौणेरस्त्रप्रहार:, द्रौणीकृतं शिवस्तुति:, दुर्योधनस्य दुरवस्थां विलोक्य कृपश्वत्थाम्नो: विलाप:, तेषां सकाशात् पाञ्चालानां वधवृत्तं ज्ञात्वा दुर्योधनस्य प्राणत्यागः... इत्यादि शोकावस्थां ह्लदयभेदकं भवति।

अथ दृष्टद्युम्नसूतमुखात् पुत्राणां पाञ्चालानां च वधवृत्तं निशम्य युधिष्ठिरस्य विलाप:, कृष्णेन सह पाण्डवानां गमनं, भीमेन गङ्गातटं गत्वा युद्धार्थं द्रौणेराह्वानं, द्रौणकर्तृको ब्रह्मास्त्रप्रयोग: श्रीकृष्णच्छापं प्राप्य द्रौणे: वनाय प्रस्थानं, कृष्णाया: शोकप्रशमनम्, सर्वेषां स्वपुत्राणां सैनिकानां च वधविषये श्रीकृष्णं प्रति युधिष्ठिरस्य जिज्ञासा, श्रीकृष्णेन महादेवस्य माहात्म्यप्रतिपादनम्, महादेवप्रकोपन दुरवस्था, पुन:तस्य प्रसादेन सर्वेषां
वैकल्यनिवृत्ति: च अतिसूक्ष्मतया विशदयति।।

**11. स्त्रीपर्वम् -**

अस्मिन् पर्वे सप्तविंशति (27) अध्याया: सन्ति। स्वपुत्रबन्धुजनानां मृतशरीरं दृष्ट्वा, मातृणां विलापं अतीव शोकरीत्या प्रतिपादयति। धृतराष्ट्रस्य विलापं, तं प्रति संजयस्याश्वासनं, शरीराणां अनित्यता, गहनवनस्य दृष्टान्तेन जगतो घोररूपस्य वर्णनं, धृतराष्ट्रस्य शोकातुरता, स्त्रीभि: प्रजाभि: च सहितस्यं राज्ञो धृतराष्ट्रेण समागम:, श्रीकृष्णेन धृतराष्ट्रं निर्भत्स्य तस्य कोपप्रशमनं, धृतराष्ट्रै: पाण्डवैरालिङ्गनं, संग्रामे हतान् वीरान् दृष्ट्वा गान्धार्य: श्रीकृष्ण समक्षे विलाप:, पुन: कुपिताया: तस्या: श्रीकृष्णं प्रति यदुवंशविनाशविषायक: शाप:, कुन्त्या: कर्णस्य जननरहस्य प्रकटनं च विशदयति।।

**12. शान्तिपर्वम् -**

शान्तिपर्वे पञ्चषष्ट्यधिकत्रिंशत्तमो (365) अध्यायो सन्ति। अत्यन्तं बृहत्पर्वे युधिष्ठिरस्य राज्याभिषेकं; भीष्मोपान्तिकं युधिष्ठिरगमनं, भीष्मस्य राजद्धर्भ-आपद्धर्म-मोक्षधर्माणामुपदेशां च प्रतिपादयति।

धर्मराजान्तिके नारदादिमहर्षीणामागमनम्, युधिष्ठिरस्य वानप्रस्थभिक्षुवद् जीवनयापन निश्चय:, राज्ञ: सन्यासो न युक्त: तेन तु तत्कर्तव्यसैव पालनं विधेयमिति भीमसेनस्य प्रवचनम्,

युधिष्ठिरकर्तृकं स्वसिद्धान्त याथार्थ्यप्रतिपादनं, परशुरामकृत क्षत्रियसंहारविषये युधिष्ठिरस्य जिज्ञासा, श्रीकृष्णेन भीष्मगुणानां विस्तारेण वर्णनं, श्रीकृष्ण भीष्णयो: संवाद: च विशदयति।

ब्राह्मणो नीतिशास्त्रस्य पृथोच्चरितस्य च कीर्तनं, वर्णधर्मवर्णनं, आश्रमधर्मस्य कथनं, चतुर्णां आश्रमाणां धर्मफलप्राप्ते: वर्णनं उत्तमाधमै: विप्रै: सह राज्ञो व्यवहार:, कर्तव्यस्य निरूपणं च दृष्टुं शक्यते।

राजधर्मस्य साररूपतया वर्णनं, यमगौतम संवाद:, आपद्धर्म: तपसो महिमा, नृशंस्य लक्षणं, पञ्चभूतसंबन्धिगुणानां विस्तारेण वर्णनम्, अध्यात्मज्ञान निरूपणं, ध्यानयोगस्य वर्णनं, परब्राह्मण: प्राप्तेरुपाय:, धर्माधर्मस्वरूपनिर्णय:, जनकराजं प्रति याज्ञवल्क्यस्योपदेशं शुक्रंप्रति नारदस्य ज्ञानवैराग्ययो: उपदेश:, नारायण माहात्म्य वर्णनं चास्मिन् पर्वे प्रतिपादयति।।

**13. अनुशासनपर्वम् -**

अष्टषष्ठ्यधिकशततमे (168) अध्याये भीष्मपितामहस्य सविस्तरोपदेशं, तस्य स्वर्गारोहणं च प्रास्तौति।

युधिष्ठिरस्य सान्त्वनं, कर्मफलानां वर्णनं, उत्तम ब्राह्मणानां माहात्म्यं, शिवसह्रनाम स्तोत्रं, तत्पाठस्य फलं च, ब्राह्महत्या सदृशानां शापानां निरूपणम्, ब्राह्मणमहत्ववर्णनम्, स्त्रीणां संरक्षणविषये युधिष्ठिरस्य प्रश्न:, च्यवनमहर्षे: वर्णनं, अन्नदानस्य माहात्म्यं, विभिन्ननक्षत्रयोगेषु विभिन्नवस्तुदानमाहात्म्यं मनो: संवादं, पञ्चविधानां दानानां वर्णनं, वानप्रस्थविधि:, पार्वतीकर्तृकं स्त्रीधर्मवर्णनं च अतिशयेन प्रतिपादयति।

अनन्तरं श्रीकृष्णमाहात्म्य वर्णनं, विष्णुसहस्रनामस्तोत्र वर्णनं, श्रीशङ्करमाहात्म्य वर्णनं युधिष्ठिरस्य हस्तिनपुरं प्रति प्रस्थानं, भीष्मस्य स्वदेहपरित्यागे धृतराष्ट्र प्रभृतिभि: तस्य दाह:, कुरुभि: तस्मै गङ्गायां जलाञ्जलिदानं, गङ्गाया: स्वपुत्रस्य कृते शोक:, श्रीकृष्णकर्तृकं तस्यै सान्त्वनप्रदानं च अतीव माहात्म्येन प्रतिपादयति।।

**14. अश्वमेधिकापर्वम् -**

द्विनवतितमो (92) अध्याय: अत्रान्तर्भवति। तत्र धर्मपुत्रस्य चक्रवर्ति पदं, अश्वमेधयागं च विशदयति।

शोकमग्नस्य युधिष्ठिरस्य धरायां पतनं, धृतराष्ट्रेणा तस्य प्रबोधनं, श्रीकृष्णेन व्यासेन च युधिष्ठिराय सान्त्वनप्रदानं, अर्जुनस्य श्रीकृष्णं प्रति गीतोक्तिविषय जिज्ञासा, गुणत्रयाणां वर्णनं; महत् तत्वस्य नामानि परमात्मतत्वस्य महिमा च, आत्मस्वरूप वर्णनं, वसुदेवपृष्टेन श्रीकृष्णेन तस्मै महाभारतयुद्धवृत्तान्तस्य संक्षेपतः कथनं, श्रीकृष्णस्य प्रसूतिगृहे प्रवेश उत्तरायाः विलापः, स्वपुत्रजीवनार्थं तस्या: श्रीकृष्णं प्रति प्रार्थना, श्रीकृष्णस्य धर्ममाहात्म्यवर्णनं च विशदयति।।

**15. आश्रमवासिका पर्वम् -**

अस्मिन् पर्वे एकोनचत्वारिंशत् (39) अध्यायाः सन्ति। धृतराष्ट्रादय: दावाग्नौ दधः, तेषां वृत्तान्तमधिकृत्य तत्र विशदयति।

भ्रातृभि: सहितेन युधिष्ठिरेण गान्धारी धृतराष्ट्रयो: सेवनं, पाण्डवानां तयोरनुकूलं वर्तनं, धृतराष्ट्रेण युधिष्ठिरं प्रति राजनीतेरुपदेश: गान्धार्या सहितेन धृतराष्ट्रस्य वनाय प्रस्थानं, पाण्डवै: पौखौ: च कुन्त्या गान्धार्या धृतराष्ट्रस्य च दर्शनं, व्यासप्रसादेन जनमेजयस्य स्वपितृदर्शनप्राप्तिः, नारदाद् धृतराष्ट्रादीनां दावाग्नौ दधस्य वार्ता श्रुत्वा युधिष्ठिरादिनां विषादः, युधिष्ठिरेण गङ्गायां धृतराष्ट्रस्य गान्धार्या: कुन्त्या: च अस्तिविसर्जनं श्राद्धकर्म समर्पणं च विशदयति।

**16. मौसलपर्वम् -**

अष्टाध्यायेन (8) निबद्धितो अस्मिन् पर्वे यादतववंशानां क्षयम्, द्वारकायां दारुणावस्थां च विशदयति।

युधिष्ठिरेण अपशकुन दर्शनं, यादवानां विनाशस्य वार्ताश्रवणं, द्वारकायां ऋषि शापात् साम्बोदरान् मुसलोत्पत्तिः मदिरानिष्पषेधस्य भीषणाज्ञा, द्वारकायां दारुणान्त्यं दृष्ट्वा भगवत: श्रीकृष्णस्य यादवेभ्य: तीर्थयात्रामादेश:, कृतवर्मादीनां समस्तयादवानां मिथ: संहार:, द्वारकायाम् अर्जुनवासुदेवयो: वार्तालाप:, मौसल-युद्धे मृतानां यादवानां अन्त्येष्ठि संस्कार कृत्वा अर्जुनेन द्वारकावासिनां नरनारीणामानयनम्, व्यास अर्जुनयो: वार्तालाप: च विस्तारयति।

**17. महाप्रस्थानिकपर्वम्।**

त्रयोऽध्याय (3) संकुलित: अस्मिन् पर्वे धर्मपुत्रस्य महामेरुगमनं प्रतिपादयति।

वृष्णीनां श्राद्धं कृत्वा प्रजाजनानाम् अनुमत्य द्रौपदीसहितानां पाण्डवानां महाप्रस्थानं, पाण्डवानां पतनहेतो: वर्णनं, युधिष्ठिरस्य इन्द्रधर्माभ्या सह वार्तालाप:, स्वधर्म दृढीनष्ठा, पार्थिवशरीरेण सह स्वर्गगमनं च विशदयति।

**18. स्वर्गारोहण पर्वम् -**

पञ्चाध्यायेन (5) समकालिते अस्मिन् पर्वे पाण्डवानां स्वर्गारोहणं विशदयति। स्वर्गे नारदयुधिष्ठिरयो: वार्तालाप:, देवदूतेन सार्ध युधिष्ठिरेण मायामयनरकस्यावलोकनं, धर्मेन्द्रयो: युधिष्ठिराय आश्वासनं, देहे परित्यज्य युधिष्ठिरस्य दिव्यलोकप्राप्ति:, तत्र श्रीकृष्णार्जुनादिनां वर्णनं च अतीव श्रेष्ठतया प्रतिपादयति।

भारतीयसंस्कृतेः विश्वकोशेऽस्मिन् ग्रन्थे प्रधानरसो शान्त:, वीर: तु अङ्गरस:। भौतिकजीवितस्य तुच्छता, किन्तु मोक्षं प्रति विपुलरीत्या विशदयति। अत: शान्त: मुख्यो रस:। चत्वारपुरुषार्थ: साङ्गोपाङ्गं विशदयति अन्ते मोक्षस्य सर्वोपरित्वमपि साधितम्।

**पुनरावृत्तिः (Recap)**

- भारतवर्षस्य द्वितीयं महाकाव्यं भवति महाभारतम्।
- अस्य प्रणेता कृष्णद्वैपायनो व्यास:।
- इदं हि जयसंज्ञकस्येतिहासस्य भारतसंज्ञकस्याख्यानस्य च संग्रहत्वात् महाभारतमिति कथितम्।
- महाभारतस्य प्रणयनं रामायणाद् बहुकालानन्तरं सञ्जातं दृश्यते। उभयोरपि ग्रन्थयो: सांस्कृतिको भेद: स भूयासमेव कालमपेक्षते।
- विश्वकोशरूपेण स्वीकारस्य अस्य ग्रन्थे संसारस्य सर्वेषां विषयाणां संकलनं, सकल शास्त्रीयविषयाणां सारग्रहणं च द्रष्टुं शक्यते।
- अष्टादश पर्वेषु निबंन्धित: अस्मिन् ग्रन्थे वेदानां प्राधान्यं जटिलविषयस्य बाहुल्यं आचारशिक्षा च प्रतिपाद्यते।
- अत: विदेशेष्वपि महाभारतस्य अमूल्यत द्रष्टुं शक्यते।
- इतिहास ग्रन्थेषु अन्यतमं भवति महाभारतम्।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. महाभारतस्य कर्ता क: ?
2. अज्ञातवाससमये पाण्डवपत्न्याः द्रौपद्याः नाम किमासीत् ?
3. श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि उपलभ्यते ?
4. महाभारतयुद्धे भीष्मः कतमदिवसे बाणैः प्रसाधिताङ्गो निपपात ?
5. शिवसहस्रनामस्तोत्रं महाभारतस्य कस्मिन् पर्वणि उपलभ्यते ?
6. महाभारते अङ्गीरसः कः?
7. अभिज्ञानशाकुन्तलस्य उपजीव्यं काव्यं किमस्ति?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. महाभारतस्य प्रतिपाद्यविषयं किम् ?
2. महाभारतग्रन्थे कति पर्वाणि सन्ति? नामानि लिखत।
3. पुरुषार्थस्य नामानि लिखत।
4. महाभारतमुपजीव्य लिखिताः ग्रन्थाः के?

## एकैकया खण्डिकया उत्तरं लिखत।

**(Answer the following questions in a paragraph)**

1. 'व्यासोच्छिष्टं जगत्सर्वं' इत्युक्त्या: औचित्यं शोधयत।
2. वनपर्वस्य प्रतिपादनविषयं संगृह्य लिखत।
3. 'महत्वात् भारवत्वात् महाभारतमुच्यते' औचित्यं लिखत।
4. यादवकुलस्य नाशस्य कारणमधिकृत्य भवत: अभिप्रायं विशदयत।

## निर्दिष्टाभ्यासः (Assignment)

1. श्रीकृष्णार्जुनयोः संवादस्य महत्वं प्रतिपादयत।
2. महाभारतस्य महात्म्यम्।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. व्यासः।
2. सैरन्ध्री।
3. भीष्मपर्वणि।
4. दशमे दिवसे।
5. अनुशासनपर्वे।
6. वीरः।
7. महाभारतम्।

## सूचनाग्रन्थाः(References)


1. संस्कृतसाहित्येतिहासः। आचार्य लोकमणि दाहलः। कृष्णदास अक्कादमि, वारणसी।
2. संस्कृतनिबद्धनवनीतम्। डॉ. पारसनाथद्विवेदि। श्रीराम मेहरा एण्ड कम्पनी, आग्रा।
3. श्रीमन्महाभारतम् (मूलमात्रम्)। Volume - I, II, III, IV, गीताप्रस्, गोरखपूर।
4. History of Sanskrit Literature, T.K. Ramachandra Aiyar, R. S. Vadhyar & Sons, Palakkad

# Unit - 3
# पुराणानि - 1

## उद्देश्यानि (Learning Outcomes)

- पुराणम् अधिकृत्य सामान्यपरिचयः।
- पुराणेषु मूल्यान् अवगच्छति।
- पुराणं नाम किम्, तस्य लक्षणम् च अधिकृत्य सामान्यज्ञानं लभते।

## प्राग्व्यपेक्षाः (Pre requisites)

'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति महाभारतोक्त्यानुसारं इतिहासपुराणश्चैव यथार्थमर्थमवगन्तुं शक्यते। पुराणादीनाम् अध्ययनं विना तु वेदानां यथार्थमर्थज्ञानं न भवितुमर्हति। अत पुराणानां वेदमूलकता स्वीक्रियते। वेदा: न केनापि मनुष्येण रचिता:, नापि ईश्वरेण विरचिता:, किन्तु ईश्वरस्य नि:श्वासरूपेण नि:सृता:, सन्ति। पुरावृत्तमेव इतिहास:, सर्गादय: पुराणम्। पुरा नवं पुराणमिति (पुरापि पुराणञ्चेति) व्युत्पत्ति:।

## मुख्यपदानि (Key terms)

पुराणशब्दस्य अर्थः, पुराणस्य पञ्चलक्षणानि, पुराणानां भाषा, पञ्चमोवेद, पुराणानाम् अध्ययनम्।

## Discussion

### 1.1. पुराणपदस्य व्युत्पत्तिः

'पुरा नवम् भवति' इति पुराणशब्दस्य अर्थः यास्केन उक्तः। "पुरा भवं पुराणम्" इति वैयाकरणानां व्युत्पत्तिः। "पुरा परम्परां वक्ति" इति पद्मपुराणे उक्तमस्ति। "व्यासादिमुनिप्रणीतवेदार्थवर्णित पञ्चलक्षणान्वितं शास्त्रम्" इति शब्दकल्पद्रुमकोशे व्याख्यातम्। "पुरा परम्परां वक्ति पुराणं तेन तत् स्मृतम्" इति वायुपुराणे प्रतिपादितम्।

## 1.2. पुराणानि

पुराणानां सामाजिकं महत्वमपि न्यूनं नास्ति। प्रक्तनस्य समाजस्य स्वरूपम् अस्माभि: पुराणै; एवोपलभ्यते। पुराणेतिहासस्य पुष्टि: तत्र उपलब्धै: शिलालेखै: यात्रावर्णनै: च प्रचरति। ऐतिहासदृष्टया पुराणेषु तीर्थनां विशदं वर्णनं विद्यते, तद्वारा विस्तृतस्य भूगोलस्य सम्यग् ज्ञानं भवति। भारतीयदर्शन जीवनस्य, भारतीयाया: सभ्यताया:, विद्याया: वैभवस्य, भारतीयानां ज्ञानगरिम्णा:, उत्कर्षस्य च वास्तविकं ज्ञानं भवितं पुराणम्। पुराणानि च बद्धानां मुमूक्षणां जीवन्मुक्तानाञ्च मानवानां सन्मार्गप्रदर्शकानि सन्ति। वर्तमानकाले धर्मरक्षाया:, वर्णाश्रमव्यवस्था प्रचारस्य, भारतीयसंस्कृत:: उद्बोधस्य, भक्ते: विकासस्य च यद्दर्शनं भवति, तस्य श्रेय: पुराणानामेव अस्ति।

संस्कृतसाहित्ये पुराणानां स्थानं महदुन्नतमस्ति। यत: वेदानन्तरं सर्वप्राचीनानि सर्वप्रधानानि च भवन्ति पुराणानि। ब्राह्माण्डमुत्पाद्य परमेश्वर: प्रथमं वेदज्ञानमेव तस्मै उपदिशति। ब्राहम्णा विविध शास्त्रस्मरण प्रसङ्गे सर्व प्रथमं पुराणान्येव स्मृतानि। मत्स्यपुराणे एवोक्तम्-

"पुराणं सर्वशास्त्राणां प्रथमं ब्राह्मणा स्मृतम्।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गता:।।"

अत: वेदवत् पुराणान्यपि नित्यानि अपौरुषेयणि च सिद्धयन्ति। अत एव पूज्यपादै: श्रिशङ्कराचार्यमहोदयै: बृहदारण्यकभाष्ये स्पष्टमुक्तम्-

'नि:श्वसितमिव नि:श्वसित यथा अप्रयत्नेनैव पुरुषनि:श्वासो भवति एवं पुराणम्'।

महर्षिणा पतञ्जलिना अपि महाभाष्ये – 'वाकोवाक्यमितिहास: पुराणम्" इति। पुराणानि सर्वश्रेणी मनुष्येभ्य: तदधिकारानुसारं कर्मं कर्तुं सन्मार्गसाधनस्योपायं प्रदर्शयन्ति।

## 1.3. पुराणं पञ्चलक्षणम्

पुराणानि विश्वकल्याणाकारिण्य: भारतीय संस्कृते: मूलश्रेतसां वेदानां भाष्यभूतानि सन्ति। भरतीयानां अनुशीलनार्थं पुराणानां पारायणं परमावश्यकिमिति। पुराणानां भाषा प्रसाद-गुण-गुम्फिता, अतिमञ्जुला भावमयी च विद्यते। पुराणं पञ्चलक्षणम्। पञ्चलक्षणं कानि?

'सर्गश्च प्रतिसर्गश्च वंशे मन्वन्तराणि च।

वंशानचरितं चैव पुराणं पञ्चलक्षणम्।।'

पुराणेषु सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितानां एषां पञ्चानां मुख्यतया वर्णनं विद्यते।

**1.3.1. सर्गम्**

श्रीमद्भागवतपुराणानुसारं सर्गस्य स्वरूपमिति-

'अव्याकृत-गुणक्षोभान्महतस्त्रिवृतोऽहम:।

भूतमात्रेन्द्रियार्थानां सम्भव: सर्ग उच्यते।।'

साम्यावस्थापन् अस्य त्रिगुणात्मकस्य प्रधानतत्वस्य प्रकृते: गुणक्षोभान् महत् तत्वं ततो अहङ्कार: तत एकादशेन्द्रिय - पञ्चतन्मात्रा - पञ्चभूतानां सम्भव: सर्ग उच्यते। जगतः सकलवस्तूनां उत्पत्तिः सर्गः।

**1.3.2. प्रतिसर्गम्**

'पुरुषानुगृहीतानामेतेषां वासनामय:

विसर्गोऽयं समाहारो बीजाद् बीजं चराचरम्।।'

पृथिव्यां अज्ञातरूपाणि स्थितानि बीजानि बहुविधगुलमतृणादिरूपेण स्वयं प्रादुर्भवन्ति, तथैव वर्तमानसृष्टे: पूर्वसृष्टौ समुत्पन्नानां जीवानां अवशिष्ट वासनामयै: संस्कारै:, पुन: सृष्टि-रचना-समयेऽनेके पदार्था: तद् भोक्तारो जीवाश्च समुत्पद्यन्ते। सृष्टेर्लयः(प्रलयस्य सृष्टेः) पुनः उद्भस्य च वर्णनं भवति प्रतिसर्गम्।।

**1.3.3. वंशम्**

'राज्ञां ब्राह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वय:।'

रामायणे महाभारते च प्रधानेतिहासे च वंशपरम्पराया: वर्णनं द्रष्टुं शक्यते। बहुभिराक्रमणैरपि अस्य मूलं न नष्टम्। सृष्टिकालादारभ्य स्वस्वरूपं सम्यक् संरक्षयन्ती। सूर्यवंशा-चन्द्रवंश-भृगुवंश-वसिष्ठवंश-गौतमवंश-कश्यपवंश....इत्यादि अनेकवंशा: सन्ति। तेषां सुव्यवस्थिता वंशपरम्परा पुराणेषु एव उपलभ्यते।

### 1.3.4. मन्वन्तरम्

श्रीमद्भागवतपुराणानुसारं मन्वन्तरस्य लक्षणम्-

'मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः।

ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते।।'

भारतीयानामितिहासे यदि मन्वन्तरज्ञानं न स्यात् तर्हि महती अव्यवस्था समुपतिष्ठेत्। स्वयंभूः मनुसमये के ऋषयः? तस्य सहायकाः कस्य पुराणस्य प्राधान्यं, तस्मिन्कालस्य व्यवस्था... इत्यादीनधिकृत्य यथार्थज्ञानं पुराणैर्विना न दृष्टुं शक्यते। तथैव मन्वन्तरं विना एतादृशज्ञानं न भवितुमर्हति।

### 1.3.5. वंशानुचरितम्

'वंशानुचरितं तेषां वृत्तं वंशधराश्च ये।'

सृष्टिश्रृङ्खलायाः सदाचारादि विभागानां च विस्तृतवृत्तान्तमुपलभ्यते। मनुष्याणां समक्षे घोरातिघोरा विपदुपतिष्ठते तदा महान्तेऽपि धर्मविदः किंकर्तव्यविमूढाः भवन्ति, तथा च चेतसि बहुविधाः विचारा उत्पाद्यन्ते। पुण्यकर्मशालिनाम् ऋषीणां धर्मरक्षण तत्पराणां राज्ञां च वंशजा च वर्ण्यन्ते।

श्रीमद्भागवते सर्गादीनां चरितम् एवं दृष्टुं शक्यते।

पुराणेषु ज्ञान-विज्ञान-कर्म-वैराग्य-भक्ति-विश्वास-यज्ञ-दान-तप-यम नियम-संयम-सेवा-दया-दाक्षिण्य-वर्णाश्रमधर्म-पुरुषधर्म-नारीधर्म-सादाचार- अवतारादीनां कल्याणकारिणः सदुपदेशाः सरसया सरलया च भाषया प्रतिपादिताः सन्ति। अत एवोक्तम्-

'इतिहासपुराणादीनि पञ्चमोवेद उच्यते।'

संस्कृतसाहित्ये पुराणानां अतीव गौरवास्पदं स्थानं विद्यते। धार्मिकदृष्ट्या एषां महत्वमधिकमस्ति। सर्वजनहिताय सर्वजनबोधाय च प्रसादगुणोपेतायाः पद्धत्या समाश्रयेण पुराणानां महत्वं प्रतिपदम् आलक्ष्यते। वेदतत्वार्थजातं सारल्येन अवगमयितुमेव एतेषां प्रवृत्तिः। वेदविहितानां धर्माणां सरलसुबोधभाषायां वर्णनायैव पुराणानि विरचितानि।

## 1.4. पुराणस्य प्रयोजनम्

पुराणानि भारतीयानां विश्वकोषाः। भारतीयानां जीवनस्य सर्वेऽपि विषयाः अत्र उपलभ्यन्ते। वेदः भारतीयानां मूलवाङ्मयम्। वेदेषु प्रतिपादितानां विषयाणां विशदीकरणं

पुराणेषु दृश्यते। भारतीयानाम् इतिहासः अपि पुराणेषु अभिवर्णितः। वेदार्थनिर्णयदृष्ट्या पुराणानाम् अध्ययनम् अनिवार्यम्।

### 1.5. पुराणानां महत्त्वम्

भारतीयसंस्कृतेः सभ्यतायाः च अवबोधनाय पुराणानां नितरां महत्त्वमस्ति। पुराणविषये यो निर्देशितः स केवलं आदिमपुराणसम्बन्धको ज्ञेयः, यदा धर्मसिद्धान्ताः तीर्थमाहात्म्यानि धर्माङ्गान्तराणि चेति बहुविधं अर्थजातं न खलु पुराणनिक्षिप्तमभूत्। इदानीं तु पुराणेषु उपदेशप्रकरणानि सङ्ख्यया इतिहासप्रकरणानि अपि वर्तमानानि पश्यामः। तत्र च अनैतिहासिक्यः कथाः, विष्णुदशावतारवर्णनानि, देवपूजाविधयः, पर्व-व्रतनियमाश्चेति नानाविषयाः उपलभ्यन्ते। वेदप्रामाण्येन पुराणप्रामाण्यं खलु प्रख्यायते। वायुपुराणे च वेदपुराणत्वमात्मनः उद्दिष्टम्। पुराणसंख्याविषये मतभेदो नास्ति, सर्ववादिसिद्धं तेषां अष्यदशत्वम्। कस्यापि मानवसमाजस्य इतिहासः तावन्न पूर्णो मन्यते, यावत् तस्य सृष्टेः प्रारम्भकालतः इतिहासो न प्रस्तूयते। पाश्चात्त्य-शिक्षाप्रभाविता विद्वांसो नैतदनुमोदयन्ति स्म, अतएव ते पुराणानि सत्यानि न स्वीकुर्वन्ति स्म, परं सम्प्रति दृष्टिकोणपरिवर्तनं जातम्। सुसंस्कृतया दृष्ट्या भारतीयमितिहासं जिज्ञासमानानां कृते पुराणानि निधय इव। बहुषु पुराणेषु वेदसंहितानाम्ना तेषां व्यवहारो दृश्यते, वेदाध्ययनेन च यत् फलं तदेव, तद् अतिशयानं वा, फलं पुराणाध्ययनेन निगदितम्। चतुर्वेदज्ञाने सति पुराणज्ञानहीनः न श्रेष्ठः।

### पुनरावृत्तिः (Recap)

- "पुरा भवं पुराणम्"।
- वेदकालानन्तरं पुराणानां स्थानं महत्वपूर्णं भवति।
- पुराणानि सर्वश्रेणी मनुष्येभ्यः तदधिकारानुसारं कर्मं कर्तुं सन्मार्गसाधनस्योपायं प्रदर्शयन्ति।
- पुराणानां भाषा प्रसाद-गुण-गुम्फिता, अतिमञ्जुला भावमयी च विद्यते।
- पुराणेषु सर्ग-प्रतिसर्ग-वंश-मन्वन्तर-वंशानुचरितानां एषां पञ्चानां मुख्यतया वर्णनं विद्यते।
- सृष्टेर्लयः(प्रलयस्य सृष्टेः) पुनः उद्भवस्य च वर्णनं भवति प्रतिसर्गम्।
- श्रीमद्भागवतपुराणानुसारं मन्वन्तरस्य लक्षणम् -'मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः।

ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते।।'

- वंशानुचरितस्य लक्षणं- 'वंशानुचरितं तेषां वृत्तं वंशधराश्च ये।'
- 'इतिहासपुराणादीनि पञ्चमोवेद उच्यते।'
- वेदार्थनिर्णयदृष्ट्या पुराणानाम् अध्ययनम् अनिवार्यम् ।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. यास्कमते पुराणलक्षणं किम्?
2. सर्वशास्त्राणां प्रथमं ब्रह्मणा किं स्मृतम्?
3. वेदानन्तरं सर्वप्राचीनानि सर्वप्रधानानि किं भवन्ति ?
4. "वाकोवाक्यमितिहासः पुराणम्" इति कस्य वाक्यमिदम्?
5. सर्गः इत्यनेन किं ज्ञायते?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. पुराणानां भाषा कीदृशी ?
2. पुराणस्य पञ्चलक्षणानि कानि ?
3. सर्गादीनां विवरणं कुत्र दृष्टुं शक्यते ?
4. प्रतिसर्गः इति शब्देन किं ज्ञायते?
5. मन्वन्तरस्य लक्षणं किम् ?
6. वंशानुचरितस्य लक्षणं किम् ?

## एकैकया खण्डिकया उत्तरं लिखत।

**(Answer the following questions in a paragraph)**

1. वंशमधिकृत्य लघुटिप्पणिं लिखत।
2. पुराणानां मुख्यप्रयोजनं किम्?

| |
|---|
| 3. पुराणानां महत्वं लिखत। |

## निर्दिष्टाभ्यासः (Assignment)

| |
|---|
| 1. भरतीयानां जीवन सम्प्रदाये पुराणस्य स्वाधीनं महत्वं च विशदयत। |

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. 'पुरा नवम् भवति'
2. पुराणम्।
3. पुराणानि।
4. पतञ्जलिना
5. जगतः सकलवस्तूनां उत्पत्तिः सर्गः।

## सूचनाग्रन्थाः (References)


1. संस्कृतसाहित्येतिहासः। आचार्य लोकमणि दाहलः। कृष्णदास अक्कादमि, वारणसि।
2. संस्कृतनिबद्धनवनीतम्। डॉ. पारसनाथद्विवेदि। श्रीराम मेहरा एण्ड कम्पनी, आग्रा।
3. History of Sanskrit Literature, T.K. Ramachandra Aiyar, R. S. Vadhyar & Sons, Palakkad

# Unit - 4
# पुराणानि - 2

## उद्देश्यानि (Learning Outcomes)

- पुराणम् अधिकृत्य सामान्यपरिचयः।
- अष्टशतपुराणेषु अष्टादशपुराणान्यधिकृत्य अवगमनम्।
- पुराणेषु मूल्यान् अवगच्छति।
- कति पुराणानि, अष्टादशपुराणेषु व्यासस्य वचनं, चाधिकृत्य पठनम्।

## प्राग्व्यपेक्षा: (Pre requisites)

सत्यवतीसुतः वेदव्यासः एव अष्टादशपुराणानां कर्ता। किन्तु ब्रह्मा पुराणानां प्रवर्तकः इति पूर्वतनप्रसङ्ग उक्तमस्ति। अतः परस्परविरोधः अस्तीति न चिन्तनीयम्। कालक्रमे ब्रह्मणः पञ्चमं मुखं यथा नष्टं तथैव पुराणानि अपि नष्टानि। वेदानां विभागकर्ता सत्यवतीसुतः, कृष्णद्वैपायनः यथा वेदोद्धरणम् अकरोत् तथैव पुराणोद्धरणमपि अकरोत्। पुराणानां कर्ता वेदव्यासः इत्यत्र पुराणानां परिष्कर्ता इति अर्थः विद्वद्भिः उक्तः। वेदव्यासमहर्षिः उग्रश्रवाः इति सूताय पुराणानि उपादिशत्। एषः उग्रश्रवाः रोमहर्षणस्य पुत्रः। एष एव पुराणानि लोके प्रसारितवान्। अतः सर्वेषु पुराणेषु सर्वाः कथाः "सूत उवाच" इति आरब्धाः भवन्ति।

पुराणस्य पञ्च भेदाः सन्ति। महापुराणानि, पुराणानि, उपपुराणानि, पुराणसंहिता, इतिहासश्चेति। गुणसंख्याकालाधारेण पुराणानि त्रिधा विभज्यते। पुराणानां संख्याविषये मतभेदो नास्ति। सर्ववादिसिद्धं तेषाम् अष्टादशत्वम्।

## मुख्यपदानि (Key terms)

पुराणानां संख्या, अष्टादशपुराणानि, अष्टादशपुराणान्यधिकृत्य नामानि, पुराणानां श्लोकसंख्या, उपपुराणानि।

## Discussion

पुराणानां संख्यामधिकृत्य भिन्नाभिप्राय: अस्ति चेत् अष्टादशपुराणानि इति सर्वसम्मतमेव। तत्तु-

'मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम्।

अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते।'

मद्वयं-मत्स्यपुराणं, मार्कण्डेयपुराणं, भद्वयमिति- भविष्यपुराणं, भागवतपुराणं, ब्रत्रयं इत्युक्ते ब्राह्म- ब्रह्माण्ड-ब्रह्मवैवर्तकपुराणानि, वचतुष्टयमित्यस्य वराह-वायु-वामन-विष्णु पुराणानि, अ- अग्नि, ना-नारद, प- पद्म, लि-लिङ्ग, ग-गरुड, कू-कूर्म, स्क-स्कन्ध, पुराणानि च। किन्तु विष्णुपुराणे तु-

ब्राह्मं पाद्मं वैष्णवञ्च शैवं भागवतं तथा।
तथाऽन्यान्नारदीयञ्च मार्कण्डेयञ्च सप्तमम्।।
आग्नेयमष्टमञ्चैव भविष्यं नवमं तथा।
दशमं ब्रह्मवैवर्त्तं लैङ्गमेकादशं स्मृतम्।।
वाराहं द्वादशं चैव स्कन्दं चात्र त्रयोदशम्।
चतुर्दशं वामनकं कौर्मं पञ्चदशं तथा।।
मत्स्यं च गारुडं चैव ब्रह्माण्डञ्च ततः परम्।
महापुराणान्येतानि ह्यष्टादश महामुने।।(विष्णुपुराणे -3/6221-24)

पुराणानां श्लोकविषये च महान् मतभेदो दृश्यते। मत्स्ये सहस्राणि चतुर्दश, मार्कण्डेये सहस्राणि नव, भागवते चतुर्विंशति सहस्राणि, भविष्ये पञ्चशतोत्तर चतुर्विंशतिसहस्राणि, ब्रह्मे त्रयोदश सहस्राणि, ब्रह्मवैवर्तके अष्टादशसहस्राणि, ब्रह्माण्डे द्वादशसहस्राणि, वामने सहस्राणि दश, वराहे सहस्राणि चतुर्विंशति, वैष्णवे सहस्राणि दश, वराहे सहस्राणि चतुर्विंशति, वैष्णवे सहस्राणिं त्रयोविंशतिः, वायवे चतुर्विंशति सहस्राणि, आग्नेये सहस्राणि षोडश, नारदीये पञ्चविंशत्सहस्राणि, पाद्मे पञ्च पञ्चाशत्सहस्राणि, लिंगे एकादशसहस्राणि, गरुडे अष्टादशसहस्राणि, कूर्मेऽष्टादशसहस्राणि, स्कन्दे शतोत्तरैकाशीतिसहस्राणि इति।

अष्टादशैव वा तेभ्यामधिकानि वा उपपुराणानि च दृश्यन्ते।

पुराणेषु कतमत् प्राचीनं कतमत् अर्वाचीनम् इत्यपि संशयोऽस्ति। तेषां क्रमो विष्णुपुराणे निश्चित:। अत्र ततश्च भागवत, नारद, मार्कण्डेय, आग्नेय, भविष्य, लिंग, वराह, स्कन्द, वामन, कूर्म, मत्स्य, गरुड, ब्रह्मवैवर्तानि क्रमेण। केचित् तु वायु मत्स्य आद्ये मान्यन्ते, भविष्यञ्च अन्तिमम्। आराध्यदेवातिरिक्तं तत्र तत्र समान एव विषया: प्रतिपादिता: दृश्यन्ते सर्ग विसर्गादय:।

पुराणानां प्रतिपाद्यविषयस्य तु सुदीर्घा सूचि: सञ्जायते। तानि भारतीयसंस्कृते: विश्वकोश: एव। सर्ग, विसर्ग, वंश, मन्वन्तर, वंशानुचरितादि विषयास्तु पुराणत्वे लक्षणावच्छेदका:। किन्तु प्रतिपाद्यविषयस्तु आर्यसम्मत जीवनदर्शनमेव। भारतीय जीवपद्धते: सर्वोऽपि पक्ष: पुराणेषु प्रतिपादितोऽस्ति। तेषां भेदे हेतु: भङ्ग्यन्तरमेव।

पुराणानां न केवलं धार्मिकदृष्या अपि तु ऐतिहासिक-भौगोलिक सामाजिक-शास्त्रीयदृष्ट्यापि महत्वं अपरिहार्यं लक्ष्यते। वेदेषु यदेव संक्षेपत: कथितं तस्वैव विस्तार: पुराणेषु दृश्यते। पुराणानि अनादृत्य नैव सनातनधर्मस्य गति:। पुराणानि मूलतो नीतिग्रन्था एव। विषयप्रतिपादकानि पुराणानि वेदापेक्षया सरलानि सुकुमारमतिग्राह्याणि च। अष्टादशपुराणेषु कानिचित् कानिचित् पुराणानि उपस्थाप्यन्ते।

### 1. विष्णुपुराणम्

वैष्णवानां प्रधानं शास्त्रं विष्णुपुराणम्। विष्णुपुराणं एकं एतादृशं पुराणं यत्र सर्वाण्यपि सर्गप्रतिसर्गादीनि दशैव लक्षणानि घटन्ते। तत्तु साहित्यक दार्शनिक-ऐतिहासिक दृष्ट्यापि महत्वशाली। शङ्कराचार्योऽपि अस्मादेव उद्धारणं गृह्णाति।

आषाढमासस्य पौर्णमीदिने जलधेनुचित्रसमेत विष्णुपुराणग्रन्थं दानं क्रियते चेत् विष्णुपदं प्राप्यति इति अभिप्रायोऽप्यस्ति।।

### 2. भागवतपुराणम्

पुराणेषु प्रचुरप्रचारोर्भवति भागवतपुराणम्। विष्णुभक्तानां प्रियतमं ग्रन्थं भवति। अत्र अष्टादशसहस्राणि श्लोकानि सन्ति। अस्मिन् द्वादशस्कन्धेषु विष्णो: दशावतारकथा सविस्तरं प्रतिपादयति। दशमस्कन्धे श्रीकृष्णावतारं अत्यन्तमास्वाद्यं भवति।

### 3. नारदपुराणम्

अत्र सनलकुमारं प्रति नारदस्य वचनं प्राधान्येन विशदयति। पञ्चविंशतिसहस्राधिक श्लोके नारद: बृहत्कल्पधर्मा: उपदिशति।

**4. गरुडपुराणम्**

गरुडपुराणमपि 'भारतीयशास्त्रसंहते' संग्रह ग्रन्थ एव। गरुडाय विष्णोरुपदेशमेव अत्र प्रतिपाद्यविषय:। नक्षत्रशास्त्रं, वैद्यं, व्याकरणं, अमूल्यरत्नानां प्राधान्यं चात्र विशदयति। प्रतिपाद्यविषयस्य उत्तरार्थे प्रेतकल्प: च सूचयति।

**5. पद्मपुराणम्**

पञ्चपञ्चाशत्सहस्त्र श्लोकसमन्विते अस्मिन् पुराणे षट् काण्डा: सन्ति। सृष्टिकाण्डं, भूमिकाण्डं, स्वर्गकाण्डं, पाटलकाण्डं, उत्तरकाण्डं, क्रियायोगकाण्डं च। कालिदासस्य शाकुन्तल रघुवंशादि ग्रन्थरचनानन्तरं पद्मपुराणमधिकृत्य प्रतिपादयति।

**6. वराहपुराणम्**

विष्णो: वराहावतारवर्णनमेव अत्र प्रतिपाद्यविषयम्। अनेकमन्त्राणि पुण्यस्थानानि चात्र परामर्शयति।

एतानि षट्पुराणानि विष्णुसंबद्धोर्भवति।

**7. ब्राह्मपुराणम्**

दक्षोपदेशमेव प्रधानविषयम्। पञ्चपञ्चाशत् सहस्त्राधिक श्लोकोऽयं ब्राह्मणा कृतमुपदेशमिति।

**8. ब्रह्माण्डपुराणम्**

एतद् अपि ब्राह्मोपदेशमिति। परशुरामावतारं राधाकृष्णयो: परामर्शं चात्र दृष्टुं शक्यते।

**9. ब्रह्मवैवर्तकपुराणम्**

ब्रह्मकाण्डं, प्रकृतिकाण्डं, गणेशकाण्डं, कृष्णजन्मकाण्डं इति चतुर्काण्डेषु, सावार्णिमनोरुपदेशं प्रतिपाद्यविषयमिति दृष्टुं शक्यते।

**10. मार्कण्डेयपुराणम्**

प्राचीनपुराणेष्वेकं भवति मार्कण्डेयपुराणम्। इन्द्र-सूर्य-अग्नि देवानां अनेक कथानि अत्र प्रतिपादयति। दुर्गादेव्या: कीर्तनमप्यस्ति।

SGOU

**11. भविष्यपुराणम्**

स्वरूप-विषय-भावादि दृष्ट्या भविष्यपुराणं विप्रतिपत्तिं भजते। किन्तु अत्र भाविकालप्रवचनं दृष्टुं शक्यते। कदाप्रभृति भविष्यकालपुराणानं, कियत्कालपर्यन्तमिति च निर्णेतुं कठिनमेव। सामान्यत: परिक्षित्सम्य: तस्य कृते मानकत्वेन गृहीतो दृश्यते।

**12. वामनपुराणम्**

विष्णो: वामनावतारमेव अस्य प्रतिपाद्य विषय:। प्रतिपाद्यविषये वराहावतारस्य साम्योऽप्यस्ति। शिवपार्वत्यो: परिणयं अतिमनोहररीत्या वर्णयति।

एते षट् ब्राह्मदेव संबद्धपुराणानि इति।

**13. वायुपुराणम्**

वायुदेवस्य पुराणं वायुपुराणम्। वायुपुराणस्य परामर्शं बाणभट्टस्य ग्रन्थे दृष्टुं शक्यते। शिवस्तुते: प्रतिपादनं च अत्राप्यस्ति।

**14. लिंगपुराणम्**

शिवस्य अष्टाविंशति अवतारवर्णनम् पुराणमिदम्। शिवलिङ्गार्चनं विशेषेण प्रतिपादितम्।

**15. स्कन्धपुराणम्**

सप्तसु खण्डेषु विभक्तं इदं पुराणं स्वरूपदृष्ट्या विस्तृतं भवति। अत्र सर्वेषामेव भारतवर्ष स्थितानां तीर्थानां सुविपुलं वर्णनमस्ति। सुब्रह्मण्यस्य (स्कन्धस्य) तारकासुरवधवर्णनं अतिविपुलेन प्रतिपादयति।

**16. अग्निपुराणम्**

अग्निदेवस्य वसिष्ठोपदेशमेव प्रतिपाद्यविषयम्। रामकृष्णयोरवतारं चात्र विशदयति। इतरपुराणान्यपेक्षया काव्यालंकारं, ज्योतिशास्त्रं, शिल्पकला च प्रतिपादनविषयेऽन्तर्भवति।

**17. मत्स्यपुराणम्**

अवतारमूर्तेर्मत्स्यस्य उपदेश: पुराणम्। मत्स्यावतारकथा अत्र सविस्तरं प्रतिपादयति। बुद्धजैनमतं, नाट्यशास्त्रं च प्रतिपादयति।

**18. कूर्मपुराणम्**

पातालदेशे कूर्ममूर्ति: इन्द्रद्युम्नस्य कथाकथनस्य सन्दर्भमेव प्रतिपाद्य विषयम्। अत्र सप्तद्वीपानाम्, सप्तसमुद्रानाम् च परामर्शं दृष्टुं शक्यते। कूर्मपुराणस्य चतुर्संहितास्ति इति वदति। किन्तु ब्रह्मसंहिता नाम एकैव लभ्यमान:। एतत्संहितायां व्यासगीता ईश्वरगीता च अन्तर्भवति।

एते षट् शैवसंबद्धपुराणानि।

एतदतिरिक्त अष्टादश उपपुराणानि च दृश्यन्ते। सनत्कुमारं, नारसिंहं, नारदीयं, शिवं, दुर्वासस्, कापिल, मानव, उशनस्, वारुण, कालिक, सांब, सौर, आदित्य, माहेश्वर, देवीभागवत, वासिष्ठ, पारशर्य, मारीचाख्यानि उपपुराणानि।

इत्थं सुसमृद्धं पुराणसाहित्यं भारतीयजीवनदर्शनस्य दर्पण: शाश्वतकोश: च। अष्टशतपुराणानि च प्रसिद्धम्। किन्तु अष्टादशपुराणानि प्रचुरप्रचारं भवति। अत एवोक्तम्।

अष्टादश पुराणेषु व्यासस्य वचनद्वयम्।
परोपकार: पुण्याय पापाय परपीडनम्।।

**इतिहासपुराणेषु वैदिकप्रभावः**

"इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति महाभारतउक्त्यानुसारं इतिहासपुराणै: च वेदानां यथार्थमर्थमवगन्तुं शक्यते। पुराणादीनाम् अध्ययनेन विना तु वेदानां यथार्थ अर्थज्ञानं न भवितुमर्हति। अत एव पुराणानां वेदमूलकता स्वीक्रियते। वेदा: च न केनापि मनुष्येण रचिता:, नापि ईश्वरेण विरचिता: सन्ति, किन्तु ईश्वरस्य नि:श्वासरूपेण निसृत: सन्ति।

**पुनरावृत्तिः (Recap)**

- पुराणानां संख्यामधिकृत्य भिन्नाभिप्राय: अस्ति चेत् अष्टादशपुराणानि इति सर्वसम्मतमेव।
- पुराणानां प्रतिपाद्यविषय: सुदीर्घा च।
- अष्टादशपुरणानि त्रिधा विभज्यते - विष्णुसंबन्धि षट्, ब्राह्मसंबन्धी षट्, शेष: षट् शैवसंबन्धी च भवति।
- विष्णुपुराणम्, भागवतपुराणम्, नारदपुराणम्, गरुडपुराणम्, पद्मपुराणम्, वराहपुराणम् एतानि षट्पुराणानि विष्णुसंबद्धोर्भवति।
- ब्रह्मपुराणं, ब्रह्माण्डपुराणं, ब्रह्मवैवर्तकपुराणं, मार्कण्डेयपुराणं, भविष्यपुराणं,

वामनपुराणं एते षट् ब्रह्मदेव संबद्धपुराणानि।

- वायुपुराणं, लिङ्गपुराणं, स्कन्धपुराणं, अग्निपुराणं, मत्स्यपुराणं, कूर्मपुराणं एते षट्पुराणानि शैवसंबद्धपुराणानि।
- सर्गादि पञ्चलक्षण समन्वय: पुराणानां धार्मिक-ऐतिहासिक - सामाजिक शास्त्रीयदृष्ट्यापि महत्वम् अपरिहार्यं लक्ष्यते।
- समग्र: सनातनधर्म: अतिविस्ताररीत्या पुराणेषु दृष्टुं शक्यते।
- इत्थं सुसमर्थं पुराणसाहित्यं भारतीयजीवनदर्शनस्य दर्पण: शाश्वतकोशश्च।।
- सनत्कुमारं, नारसिंहं, नारदीयं, शिवं, दुर्वासस्, कापिल, मानव, उशनस्, वारुण, कालिक, सांब, सौर, आदित्य, माहेश्वर, देवीभागवत, वासिष्ठ, पारशर्य, मारीचाख्यानि अष्टादश उपपुराणानि।

## वस्तुनिष्ठप्रश्ना: (Objective type Questions)

1. कति पुराणानि सन्ति?
2. 'म' द्वयं किम् ?
3. कति उपपुराणानि सन्ति?
4. ब्राह्मसंबद्धपुराणानि कानि?
5. शिवसंबद्धपुराणानि कानि?
6. 'द्वादशस्कन्धाः' कस्मिन् पुराणे सन्ति?
7. ब्रह्म-प्रकृति-गणेश-कृष्णजन्मकाण्डश्चेति चत्वारः खण्डाः कस्य पुराणस्य सन्ति?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. 'अष्टादशपुराणस्य भागत्रयं लिखत।
2. शिवसंबद्धपुराणानि लिखत।
3. विष्णुसंबन्धपुराणानि कति? ते के?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. अष्टादश उपपुराणानि कानि ?
2. इतिहासपुराणेषु वैदिकप्रभावं अधिकृत्य लिखत।

## निर्दिष्टाभ्यासः (Assignment)

1. अष्टादशपुराणानि अधिकृत्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. अष्टादश।
2. मत्स्यपुराणं, मार्कण्डेयपुराणम्।
3. अष्टादश।
4. ब्राह्मसंबन्धी षट्।
5. षट् शैवसंबन्धी।
6. ब्रह्मवैवर्तपुराणस्य।

## सूचनाग्रन्थाः (References)


1. संस्कृतसाहित्येतिहासः। आचार्य लोकमणि दाहलः। कृष्णदास अक्कादमि, वारणसि।
2. संस्कृतनिबद्धनवनीतम्। डॉ. पारसनाथद्विवेदि। श्रीराम मेहरा एण्ड कम्पनी, आग्रा।
3. History of Sanskrit Literature, T.K. Ramachandra Aiyar, R. S. Vadhyar & Sons, Palakka

# BLOCK - 3

# काव्यप्रपञ्चः

SGOU

# Unit -1
# भारतीयकाव्यसङ्कल्पः

## उद्देश्यानि (Learning Outcomes)

- काव्य-शिक्षणं छात्राणं मानसिकविकासाय, कल्पनाशक्तेः रचनात्मकप्रवृत्तेश्च विकासाय, सौन्दर्यानुभूतये च उपयुज्यते।
- काव्यार्थस्यभावस्य च अवगमने क्षमता।
- काव्यसौन्दर्यानुभूतिः।
- विभिन्नानां काव्यशैलीनाम्, कवेः व्यक्तित्वस्य काव्यमहत्वस्य च परिचयः।
- उदात्तभावानां, जीवनादर्शानां च परिचयेन नैतिकविकासः।
- संस्कृतशब्दभण्डारस्य विकासः सूक्तिभण्डारस्य विकासः।
- व्याकरणनियमानां सामान्यज्ञानम् ।
- विवेचनात्मकशक्तेः समीक्षात्मकशक्तेः रचनात्मकशक्तेः धार्मिकज्ञानस्य अध्ययनशक्तेः च विकासः।

## प्राग्व्यपेक्षाः (Pre requisites)

मानवः चेतनास्मपन्नः संवेदनशीलप्राणी चास्ति। तस्य मनः शरीरमाधृत्य, दुखेन, सुखेन, प्रेम्णा. दयया, क्रोधेन, आशया च चलायमानं भवति। तथा - प्रकृत्या प्रतिक्षणं परिवर्तनेन सौम्यं, मनोरमं, विविधरूपैः च भावं गृह्णाति। काव्येन मानवस्य भावात्मिकविकासो भवति। काव्यम् अस्माकं भावानाम् उत्सर्जनमस्ति।

## मुख्यपदानि (Key terms)

काव्यं, कविः, सहृदयः, काव्यप्रयोजनं, काव्यभेदाः, महाकाव्यम्, पञ्चमहाकाव्यानि, प्रमुखसंस्कृतकवयः, गद्यसाहित्यम्, सन्देशकाव्यानि।

**DISCUSSION**

## 1.1.1. भारतीय कव्यसङ्कल्प:

साहित्ये सुपरिचितं भवति 'काव्यम्'। मानवानां सुपरिचितमिदं नाम। अस्य काव्यस्य किं स्वरूपं इत्याकांक्षा सर्वेषामपि मनसि जायते एव। किं नाम काव्यम्? अथवा किं वा काव्यस्वरुपम्? कवयः इति कविः। कवेः कर्म भवति काव्यम्। कवेः सर्वाण्यपि कर्माणि काव्यानि इति वक्तुं शक्यते? नैव। तर्हि किं काव्यं भवति? भारतीयसंकल्पानुसारं कला, साहित्यं च काव्यमेव। भारतीयकाव्यपरंपरायाः आधारोपि वैदिकसाहित्यमेव भवति। तत्र कविः मेधावी, क्रान्तिदर्शी इत्यर्थे संकल्पितो भवति। वर्णनानिपुणस्य कवेः असाधारणं वर्णनारूपं वालोकोत्तरवर्णनानिपुणं कवि कर्म वा भवति काव्यम्। तत् च सर्गात्मको भवति। सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दं प्रभुसंमितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्संमितार्थतात्पर्यवत् पुराणेतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापरप्रवणतया विलक्षणं यत् काव्यं लोकोत्तरवर्णनानिपुणकवि कर्म।

अपारे काव्यसंसारे कविरेवप्रजापतिः।
यथास्मै रोचते विश्वं यथेदं परिवर्तते।। (आनन्दवर्धनाचार्यः)

यथा कवेर्वाणी एतद्विधं लोकोत्तरं बलमश्नुते सैव 'काव्यकला' इति कथ्यते बुधैः। तच्च काव्यं दृश्यकाव्यं श्रव्यकाव्यम् इति भेदाद् द्विविधम्। दृश्यं तत्र अभिनेयं, श्रव्यं तु पाठ्यमेव। दर्शनप्रधानं भवति दृश्यकाव्यं ,श्रवणप्रधानं काव्यं श्रव्यकाव्यम्।

किं तावत्काव्यमिति विचारचर्यायां अनेकानि काव्यलक्षणानि विचारपथे अवतरति। काव्यलक्षणविषये संस्कृतज्ञानाम् एकाभिप्रायो न विद्यते। काव्यलक्षणं तु विद्वांसो बहुधा भिन्नं – भिन्नं प्रतिपादयन्ति। काव्यस्य प्रयोजनं कृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशम् एव। एतस्मिन् विषये प्राचीनकालादारभ्य आधुनिककालपर्यन्तं आलङ्कारिकैः स्वस्वविचारान् समुपस्थापिताः। तत्र केचन मम्मटाचार्यं, विश्वनाथम्, जगन्नाथं च साधितं मन्यन्ते। मम्मटाचार्यमते काव्यलक्ष्णं प्रस्तूयते –

- "तददोषौ शब्दार्थौसगुणावनलंकृति पुनः क्वापि।।"

अर्थात्शब्दार्थौ अदोषौ सगुणौ सर्वत्र सालंकृतौ क्वचित् अस्पुटालङ्कारौ अपि काव्यं भवति। आचार्य विश्वनाथकविराजमतानुसारं काव्य लक्षणोऽयं प्रायो विद्वद्भिः प्रशस्यते-

- "वाक्यंरसात्मकं काव्यम्।।"

पण्डितराजदिशा-

- "रमणीयार्थप्रतिपादकः शब्दः काव्यम्।"(जगन्नाथः - रसगङ्गाधरः)
- “संक्षेपात् वाक्यमिष्टार्थव्यवच्छिन्ना, पदावली काव्यम्।”- (अग्निपुराणम्)
- “शरीरं तावत् इष्टार्थव्यवच्छिन्ना पदावली।”- (दण्डी- काव्यादर्शः)
- “शब्दार्थौ काव्यम्।”- (रुद्रटः-काव्यालङ्कारः)
- “काव्यशब्दोऽयं गुणलङ्कारसंस्कृतयोः शब्दार्थयोः वर्तते।”-

  (वामनः- काव्यालङ्कारसूत्रवृत्तः)
- “काव्यस्य आत्मा ध्वनिः।”- (आनन्दवर्धनः)
- “निर्दोषं गुणवत् काव्यं अलंकारैरलंकृतम् रसान्वितम् कविः कुर्वन् कीर्तिं प्रीतिं च विदन्ति।”( भोजराजः)
- “गुणालंकाररीतिरससहितौ दोषरहितौ शब्दार्थौकाव्यम्।”- (वाग्भटः)
- “निर्दोषा लक्षणवती सरीतिर्गुणभूषिणा, सालंकाररसानेकवृत्तिर्वाक् काव्यनामभाक्।”–

  (जयदेवः -चन्द्रालोकम्)

### 1.1.2. काव्यप्रयोजनम्

सर्वाण्यपि कार्याणि फलोन्मुखानि भवन्ति। अत्रापि प्राचीनानि एतानि काव्यलक्षणानि निरूप्यानन्तरं ‘प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते’ इत्यतः काव्यस्य प्रयोजनम् किमित्याकांक्षायाम् उच्यते मम्मटाचार्यः–

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।। इति।

काव्यं हि यशसे, अर्थलाभाय, व्यवहारज्ञानाय, अमाङ्गलिक निवारणाय पापविनाशाय, काव्यश्रवणेन पठनेन च अनिर्वचनीय- अलौकिकानन्दानुभवाय, कान्तासंमितकर्त्तव्योपदेशाय च परमुपयोगिभवति। तत्र सद्यः परनिर्वृतिः – रसास्वादानन्दानुभूतिः परमं प्रयोजनमिति च वर्णयति। भामहेन अप्युक्तं यद् उत्तमकाव्यनिबन्धनात् धर्मार्थकाममोक्षाणां प्राप्तिर्भवति, कलासु वैचक्षण्यं समायाति, कीर्तिर्मिलति, आनन्दोपलब्धिः भवति।
यथा-

धर्मार्थकाममोक्षाणां वैचक्षण्यं कलासु च ।

करोति प्रीतिं कीर्त्तिञ्च साधुकाव्यनिबन्धनम्।।

एवं काव्यं जीवितस्य व्याख्यानं भवति, समाजस्य दर्पणं च। मानवीयभावानायाः अभिव्यक्तिः हृदयाह्लादकरीत्या क्रियते। शब्दयोजना, वृत्तबन्धः, अलङ्काराणां चमत्कारः, भावसौन्दर्यं, रीतिवैचित्र्यं, रसनिर्भरता च काव्यमास्वादयोग्यं कुर्वन्ति।

### 1.1.3. काव्यभेदाः

काव्यलक्षणं, काव्यप्रयोजनं च उक्त्वा अनन्तरं कतिविधानि काव्यानि इति संशये काव्यभेदान् निरुपयति। काव्यस्य घटनाक्रमानुसारं, अर्थप्रतीत्यनुसारं वर्णनास्वरूपानुसारं च बहुधा विभज्यन्ते। दृश्य-श्रव्य, गद्य-पद्य-मिश्र, ध्वनिगुणीभूतव्यङ्ग्यचित्र, महाकाव्य-खण्डकाव्य-स्तोत्रकाव्य-शास्त्रकाव्य-गद्यकाव्य-रूपकादिभेदात्। काव्यस्वरूपस्य आधारं गृहीत्वा काव्यस्य भेदद्वयम् उच्यते-

दृश्यश्रव्यत्व भेदेन पुनः काव्यं द्विधा मतम्।। ( विश्वनाथकविराजः)

काव्यशास्त्रे दृश्यकाव्यानामुदयः प्रचीनकालादेव अजायत। वैदिकयुगे दृश्यकाव्यानाम् अस्तित्वं प्रामाणितं च। दर्शनप्रधानं काव्यं भवति दृश्यकाव्यम्। तत्र दृश्यकाव्यस्य अभिनेयत्वं रूपाणामारोपाच्च तद् दृश्यकाव्यं रूपकमुच्यते। श्रोतव्यमात्रमेव श्रव्यकाव्यम्। श्रोतुं योग्यं श्रव्यम्। तच्च गद्यं पद्यं चेति द्विविधम्। यत्र छन्दसाबद्धानि पदानि सन्ति तथोक्तं काव्यं पद्यकाव्यम् इत्युच्यते। छन्दोबद्धरहितं काव्यं तु गद्यं भवति।

प्रायेण अलनङ्कारशास्त्रसमीक्षाप्रकारेण, शैली- अर्थ- बन्धानां दृष्ट्या च काव्यानां भेदप्रभेदान् आलङ्कारिकाः कल्पयन्ति। अर्थदृष्ट्या उत्तममध्यमाधमा त्रयो भेदाः। केचनालङ्कारिकाः चित्र-गुणीभूतव्यङ्ग्य-ध्वनिभेदान् वर्णयन्ति। कतिपयाः काव्ये वस्तुविषययोः आधारे प्रबन्ध-मुक्तक-खण्डकाव्यपदेनापि कथ्यन्ते।

**पुनरावृत्तिः (Recap)**

- कवेः कर्मं भवति काव्यम्।
- वर्णनानिपुणस्य कवेः असाधारणं वर्णनारूपं वालोकोत्तरवर्णना निपुण कवि कर्मं भवति काव्यम्।
- अपारे काव्यसंसारे कविरेव प्रजापतिः यथास्मै रोचते तथा विश्वं परिवर्तते।
- काव्यं जीवितस्य व्याख्यानं भवति, समाजस्य दर्पणं च। मानवीय भावानामभिव्यक्तिः हृदयाह्लादकरीत्या क्रियते।
- शब्दयोजना, वृत्तबन्धः, अलङ्काराणां चमत्कारः, भावसौन्दर्यं, रीतिवैचित्र्यं, रसनिर्भरता

च काव्यमास्वादयोग्यं कुर्वन्ति।

- काव्यस्वरूपस्याधारेण दृश्यश्रव्यत्वभेदेन काव्यस्य भेदद्वयम्।
- दर्शनप्रधानं काव्यं भवति दृश्यकाव्यम्। तत्रदृश्यकाव्यस्य अभिनेयत्वात् रूपाणामारोपाच्च रूपकमुच्यते। श्रोतव्य मात्रमेव श्रव्यकाव्यम्।
- काव्यं गद्यं पद्यं चेति द्विविधम्। यत्र छन्दसाबद्धानि पदानि सन्ति तथोक्तं काव्यं पद्यकाव्यमित्युच्यते। छन्दोबद्धरहितं काव्यं तु गद्यं भवति।
- मम्मटाचार्यमते काव्यलक्ष्णं -"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुन: क्वापि" इति।
- विश्वनाथकविराजस्य मते काव्यलक्षणं तु 'वाक्यं रसात्मकं काव्यम्' इति।
- पण्डितराज जगन्नाथस्य मते काव्यलक्षणं- 'रमणीयार्थप्रतिपादक: शब्द: काव्यम्' इति।
- सद्यपरनिर्वृतिः-रसास्वादानन्दानुभूति: परमं प्रयोजनं भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. काव्यस्य द्वौ भैदौ स्तः?
2. मम्मटाचार्यमते काव्यलक्ष्णं किम् ?
3. 'वाक्यं रसात्मकं काव्यमिति काव्यलक्षणं' केन प्रयुक्तं भवति ?
4. रमणीयार्थप्रतिपादक: शब्द: काव्यम्- इति काव्यलक्षणं कस्य आचार्यस्य उक्तिः?
5. दर्शनप्रधानं काव्यं किं भवति ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. दृश्यश्रव्यकाव्ययोः भेदः कः?
2. गद्य-पद्य काव्ययोः भेदः कः?
3. काव्यस्य परमं प्रयोजनं किम्?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. काव्यस्य किं प्रयोजनम्?
2. काव्यभेदाः के ?

## निर्दिष्टाभ्यासः (Assignment)

1. संस्कृत साहित्ये काव्यसङ्कल्पः काव्यस्वरूपं काव्यभेदाः च उपन्यस्यत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. दृश्यकाव्यम्, श्रव्यकाव्यम्।
2. "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"।
3. विश्वनाथकविराजः।
4. पण्डितराज जगन्नाथः।
5. दृश्यकाव्यम्।

## सूचनाग्रन्थाः (References)


1. A history of Sanskrit literature: A B Keith
2. Indian Kavya literature: A K Warder
3. Samskrita Saahityacharitram: Dr. K Kunjunniraja & Dr. M S Menon
4. Samskritasaahityacharitram, Acharya sree Ramachandra Misra.


SGOU

# Unit - 2
# पञ्चमहाकाव्यानि

## उद्देश्यानि (Learning Outcomes)

- महाकवि कालिदासस्य, कृतीनां परिचयम्।
- संस्कृतगद्यसाहित्ये कतिपयानां ग्रन्थानां परिचय: कार्य:।
- महाकाव्यानाम् उत्पत्तिं विकासं च ज्ञायते।
- पञ्चमहाकाव्यनि अधिकृत्य परिचय:।
- संस्कृतसन्देशकाव्यानां परिचयम्।

## प्राग्व्यपेक्षा: (Pre requisites)

महाकाव्यं हि संस्कृत - साहित्य - जगतः सर्वोत्कृष्टरत्नम्। महतां महत्तरं च काव्यं महाकाव्यम्। अलोकसामन्यप्रतिभाविशेषैः एव महाकवित्वं संपादयितुं शक्यते इति आनन्दवर्धनाचार्य:। महाकाव्यस्य विकासः कदा प्रभृत्यभूत् इति निश्चयेन वक्तुं न पार्यते। एतावदेव निश्चितं यत् वाल्मीकिः हि लौकिकसंस्कृतसाहित्यस्य आदिकविः। रामायणं हि आदिकाव्यम्। यद्यपि महाभारतेऽपि काव्यात्मकत्वं परिलसन्ति तथापि तत्र काव्यलक्षणं न घटते रामायणवत्। पुराणेतिहासेषु प्रतिपादितानां देवानां राजर्षीणां चरितं वा कवि कल्पितेतिवृत्तं वा शास्त्रविषयं वा महाकाव्यरचनायां विषयत्वेन स्वीकार्यो भवति।

संस्कृतकाव्यानाम् उदयः यद्यपि प्रशान्तपावनेषु तपोवनेषु अजायत, तथापि तस्य विकासो राज्ञां प्रासादेषु अभूत् इति कथनं प्रायेण सत्यमेव। राजभिः कविसमादरः कृतमासीत्। एवमेव काव्यरचनायां प्रेरणा च। राजानः कवीन् आर्द्रियन्त। तस्मिन् काले राज्ञाम् आश्रये कवित्वं प्रस्फुरितं च। राज्ञां प्रेरणामाश्रित्यैव सर्वांशतः संस्कृते महाकाव्यानां विकासमभजत। संस्कृतमहाकाव्यानि रामायण महाभारतेतिहासादि कथां बीजभावेनाश्रयन्ति। संस्कृतकाव्यधारायां कालिदासादि कवीनां अनेकानि काव्यानि पुराणेतिहासान् आश्रित्य भवन्ति। लौकिकानां इतिवृत्तानां स्वीकरणेन एवमेव वेदेषु वर्णितानां कथानाम् आधारेणापि लौकिककाव्यप्रणयनम् अजायत।

'एक एव भवेदङ्गी शृङ्गारवीर एव वा' इत्युक्तत्वात् मुख्यरूपेण एको रसो भवति इतरेपोषकत्वेनापि विद्यन्ते। संस्कृतभाषाकाव्यानां विकासस्यालोचनायां प्रक्रन्तायामिदं न

विस्मर्त्तव्यं यदत्र साहित्ये प्रथमं रसं निबद्धुमध्यवसायः प्रवर्त्तते स्म। आदिकाव्ये रामायणे तु वाल्मीकिना करुणरसस्य धारा प्रवहिता सा सततं स्यन्दमाना एव स्थास्यति। कालिदासप्रभृतयः महाकवयः स्वेषु काव्येषु रसनिबन्धनेव्याप्रियमाणा आसन्। अनन्तरकालोत्पन्नाः कवयः रससापेक्षाः सन्तोऽपि ज्ञानगरिमामुपदर्शयितुं कविताम् अरचयन्। तादृशेषु प्रधानो भवति श्रीहर्षः। यद्यपि श्रीहर्षस्य काव्ये ज्ञान गरिमान्तर्लीनो प्रतिभाति, तथापि रसपेशलता सर्वत्र दृश्यत एव। संस्कृतसाहित्ये अनेकानि महाकाव्यानि भवन्ति अपि तेषु पञ्चमहाकाव्यानि नितरां प्राधानानि। "सर्गबन्धो महाकाव्यमुच्यते ...." इति लक्षणानुसारं अष्टाधिक सर्गाः भवितव्याः। अत्र हि एको नायकः सुरः, क्षत्रियः, बहवो वा सद्वंशक्षत्रिया भूपा नायकाः। नायकेन हि धीरोदात्त प्रकृतिकेन भाव्यम्। शृङ्गारवीरशान्तानां एको अङ्गीरसः, अन्ये रसाः अङ्गान्येव भवेयुः। इतिवृत्तं तु ऐतिहासिकं वा सज्जनकथाश्रितं भवेत् एवमेव चतुर्वर्गफलोपेतं भवेत् काव्यप्रयोजनम्।

## मुख्यपदानि (Key terms)

कालिदासः, रघुवंशः, कुमारसंभवः, भारवि, किरातार्जुनीयम्, माघः, शिशुपालवधम् , श्रीहर्षः, नैषधीयचरितम्।

## Discussion

### 1.2.1. पञ्चमहाकाव्यानि

संस्कृतसाहित्ये 'लघुत्रयी, बृहत्रयी, पञ्चमहाकाव्यानि इति विभागत्रयं वर्तते। तेषु पन्चमहाकाव्यानि कानि, तेषां कर्तारः के इति ज्ञातुमवसः उचितः।

- कुमारसंभवम् - कालिदासः।
- रघुवंशम् - कालिदासः।
- शिशुपालवधम् – माघः।
- नैषधीयचरितम् – श्रीहर्षः।
- किरातार्जुनीयम् – भारविः।

भारते संस्कृतसाहित्ये अनेकानि महाकाव्यानि सन्त्यपि काव्यपठनाय मुख्यरूपेण आश्रियमाणानि काव्यानि भवन्ति कालिदास-भारवि-माघ-श्रीहर्षादीनाम् महाकाव्यानि। कालिदासस्य ऋतुसंहारं, कुमारसंभवं, रघुवंशं च मिलित्वा 'लघुत्रयी' इतिनाम्ना, भारवेः

किरातार्जुनीयम्, माघस्य शिशुपालवधं, श्रीहर्षस्य नैषधीयचरितं च मिलित्वा बृहत्रयी इति नाम्ना च प्रथितो भवति। कालिदासस्य भारवेः दण्डिनश्च कवित्वमेलनं माघे भवन्ति। उक्तञ्च –

'उपमा कालिदासस्य भारवेरर्थगौरवम्
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः' इति।

**महाकवि कालिदासः (A.D.4 & 5 C.)**

काव्यमार्गे नाटकमार्गे च स्वप्रतिभां प्रकटितः संस्कृतसाहित्ये सर्वातिशयत्वेन विलसति महाकवि कालिदासः। कविशिरोमणिः कविकुलगुरुः कविश्रेष्ठः इत्यादिभिः नामाभिः प्रथितः। सोऽयं राष्ट्रकविः कालिदासः, रघुवंश-कुमारसंभवञ्चेति द्वे महाकाव्ये ऋतुसंहारं मेघसन्देशमिति द्वे खणडकाव्ये, त्रीन् दृश्यकाव्य ग्रन्थान्, अभिज्ञानशाकुन्तलं नाटकं, विक्रमोर्वशीयं नाटकं, मालविकाग्निमित्रं नाटकञ्च विरचितवानिति विद्वांसः अभिप्रयन्ति। कालिदासस्य जन्मस्थानं काश्मीरः वङ्गभूमि: राजस्थानं उज्जयिनी वेति निश्चयेन वक्तुं न शक्यते। अस्य महाकवेः जीवनकालविषयेऽपि विदुषां मते सुदृढः निर्णयो न विद्यते। कविरयं महाराज विक्रमादित्यस्य राजसभायां प्रतिष्ठितो विद्वान् इति केचन। कालिदासकाव्येषु अलौकिकम्, अपूर्वम्, असाधारणम् च सौन्दर्यं दरीदृश्यते। प्रकृतेः यथातथावर्णना सर्वेषां हृदयापहारी भवति। तस्य काव्येषु कश्मीरतः कन्याकुमारीपर्यन्तं वर्तमानम् अपूर्वं स्वाभाविकं च सौन्दर्यवर्णनम् उपलभ्यते। तस्य काव्यानि आलोचनामृतानि भवन्ति। तस्मात् काव्यरसं निपीय जनहृदयम् आनन्देन आन्दोलितम् भवति। 'कालिदासतुल्यः कालिदास एव इत्यनन्वयत्वंम्' तस्य अलौकिक प्रतिभां साधूकरोति। तत्तुल्यः कोऽपि कविः नासीत्। उक्तम् च-

पुराकवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासः।
अद्यापि तत्तुल्यकवेरभावात् अनामिका सार्थवती बभूव॥

कवेरस्य काव्यरचनायाः कौशलम् पद्येषु इव नाटकेष्वपि दृश्यन्ते। कालिदासेन मानव सहचरीरूपेण एव प्रकृतेः चित्राणं कृतमस्ति। यदा तस्य कथापात्राणि सामाजिकान्हृष्यन्ति तदा प्रकृतिः अपि प्रफुल्ला भूत्वाहर्षिता भवति, कथापात्राणि यदा दुःखमनुभवन्ति तदा प्रकृतिरपि रोदितीव चित्रयति। यथा अभिज्ञानशाकुन्तले चतुर्थेऽङ्के शकुन्तला यदा कण्वाश्रमात् पतिगृहं प्रयाति तदा तस्या वियोगे मृगा घासचर्वणं विस्मरन्ति, मयूरास्तस्याः शोके नृत्यं त्यजन्ति। किमन्यत् वृक्षलतादयः रुदन्त्यः पत्ररूपाणि अश्रूणि मुञ्चन्ति-

उद्गलितदर्भकवला मृगाः परित्यक्तनर्तना मयूराः।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रूणीव लताः।।

कालिदासकाव्ये मानवमनसोऽपि गम्भीरचित्रणं द्रष्टुं शक्नुमः। कालिदासस्य काव्यानि धवनिप्रधानानि उत्तमकाव्यानि भवन्ति। वैदेशिकाः कालिदासं द्वितीयं शेक्स्पीयर् इति मन्यन्ते।

कालिदासकाव्यानां प्रमुखं वैशिष्ट्यम् उपमासौन्दर्यम् एव अस्ति। 'उपमा कालिदासस्य' इत्याभाणकम् प्रसिद्धमेव। तस्य उपमायाः एकम् उदाहरणं दृश्यताम्-

संचारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः।।

अत्र रघुवंशे इन्दुमतीस्वयंवरं वर्णितमस्ति। इन्दुमतीम् अत्र चलन्ती दीपशिखाम् इव चित्रीकरोति। वरणमालां गृहीत्वा इन्दुमती यस्य नृपस्य सम्मुखं याति स स प्रथमं तु प्रसन्नमनाः भवन्ति किन्तु यदा सा अग्रे गच्छति तदा तेषां मुखं म्लानतां याति। यथा दीपप्रकाशशून्याः प्रासादाः भवेयुः तथा। अत्र उपमया एव कविना नृणां अवस्थां स्फुटं प्रदर्शिताः। अनया उपमया एव कालिदासः दीपशिखाकालिदासः इति बहुमतिम् अधिगतः। "कविकुलगुरुः" "वाग्देवताविलासः" इत्याद्युपाधिभिः निखिलधरातलमण्डले तस्याद्वितीयता वितता भवति।

## 1. रघुवंशम्

रघुवंशम् हि कालिदासस्य प्रौढतमं काव्यम्। संप्रति अस्य काव्यस्य एकोनविंशतिः सर्गाः उपलभ्यन्ते। काव्येऽस्मिन्ततोप्यधिकाः सर्गाः विद्यन्ते इति केचन विश्वसन्ति। हि काव्येऽस्मिन् ग्रन्थसमाप्तिसूचकाभावात् ततोप्यधिकाः सर्गाः भवन्ति इत्यभिप्रयन्ति। काव्यमिदं वागर्थप्रतिपत्तये पार्वतीपरमेश्वरयुगलवन्दनया प्रारभ्यते। कोसलेन्द्रः दिलीपः सश्रीकोऽपि अनपत्यतया दुःखितः सन् वसिष्ठाश्रमं गच्छति। तदर्थं सुरभी शापनिवारकं नन्दिनीपरिचरणं वरिष्ठः आदिशति च। दिलीपस्तु स्वसमर्पित देहेन नन्दिनीं परिचरति। संतुष्टा नन्दिनी पुत्रप्राप्तिरूपं वरं तस्मै ददाति। गच्छताकालेन सुदक्षिणा रघुं प्रसूते। रघोरपि अजः, अजस्य दशरथाख्यः पुत्रः क्रमेणपृथ्वीम् अपालयताम्। दशरथस्य पुत्रेकामेष्टियागेन रामभरतलक्ष्मणशत्रुघ्नाख्याः चत्वारः पुत्राः भवन्ति। दशरथस्य अनन्तरं रामः, रामस्य अनन्तरं कुशः, ततः अदितिः इत्येवं सप्तानां राज्ञां परम्परां सप्तदशसर्गेषु वर्णितो भवति। तदन्वये एव अग्निवर्णस्य राज्ञो जन्म।

प्रथमसर्गे इक्ष्वाकुवंश महत्वं प्रतिपाद्य द्वितीये नन्दिनीपरिचर्या वर्णनं, तृतीये सुदक्षिणायाः वर्णनं, चतुर्थे रघुदिग्विजयवर्णनं, षष्ठे इन्दुमतीस्वयम्वर सभावर्णनं सप्तमे अजस्य इन्दुमत्या सह विवाहवर्णनं, अष्टमे अजविलापः, नवमे वसन्तवनं, मृगया वर्णनं, दशमे भगवत्स्तुतिः, त्रयोदशे भूगोलवर्णनं, चतुर्दशे सीतापरित्यागः षोडशे अजस्य अयोध्याप्रत्यागमनं, जलविहारवर्णनं च

सप्तदशे राज्याभिषेकवर्णनमतिथेः, एकोनवदशे अग्निवर्णस्य कामकेलिवर्णनं च कव्येऽस्मिन् समुल्लेखिताः विषयाः।

वियोगिनीवृत्ते प्रथमतया विलापकाव्यस्यावतरणं महाकविकालिदासेन रेघुवंशे अष्टमे सर्गे कृतो विद्यते। विकारविचाराभि व्यक्तिं प्रकटमानानि अनेकानि श्लोकात्मकानि संभाषणानि अपि काव्येऽस्मिन् कविना वर्णितानि। वीररसप्रधानं महाकाव्यं भवति रघुवंशम्। वीररसस्य धर्मवीरं, दयावीरं, दानवीरं, युद्धवीरम् इत्येवं नायकभेदमनुसृत्य भेदानपि अत्र सन्ति। अनुप्रासादीनां शब्दालङ्काराणां प्रयोगादिशयमपि काव्ये सुलभतया भवन्ति।

**2. कुमारसंभवम्**

महाकविकालिदासस्य महत्तरं शृङ्गरकाव्यं भवति कुमारसंभवम्। नायिका पार्वती, नायकश्चमहेश्वरः। नायिकायाः पार्वत्याः परमेश्वरं विषयीकृत्य अङ्कुरितं, पल्लवितं, पुष्पितं, भग्नं, पुनरुत्थितं फलितं च शृङ्गारं काव्येऽस्मिन् वर्णितो भवति। सप्तदशसर्गेषु निबद्धमिदं महाकाव्यं कालिदासस्य कोमलकल्पनायाः अपूर्वमुदाहरणम्। अस्य काव्यस्य अन्तिमःनवसर्गाः केनचित् कालिदासोत्तरभवेन प्रथिता इति मन्यन्ते। काव्यमिदं हिमालयवर्णनारूप वस्तुनिर्देशात्प्रारब्धमस्ति। कमनीयेऽस्मिन् महाकाव्येजीवनसंबद्धाम् सर्वाम् अपि कलाम् समायोजितो विद्यते। उत्तरस्यां दिशि देवतात्मा नगाधिराजः हिमालयः अस्ति। हिमालयाद्धि मेनकायां पार्वती जन्म गृह्णाति। बाल्यात्परे वयसि प्राप्ता सा पिनाकपाणिं पतिमाप्तुं तपोनिरतं तं सेवते। एतस्मिन्नेवान्तरे तारकासुरपीडिताः देवास्तत्प्रतिकाराय परमेष्ठिनंशरणं गच्छन्ति। ततश्च इन्द्रः वसन्तसहायेन कामदेवं शिवसमाधिभङ्गाय प्रेरयति। तथा कुर्वन् कामश्च महादेवस्य तृतीयनेत्रोत्थितवन्हिना भस्मावशेषः क्रियते। ततश्च निराशा पार्वती स्वाभिलाषपूर्त्तये तपश्चरति। प्रसन्नश्च शंभुः तस्याः अभिलाषं पूरयति। सप्तर्षिप्रार्थितो हिमालयः सुतां शम्भवे समर्प्पयति। तयोर्विवहेसंपन्ने नवदम्पती स्वेच्छानुसारं विहरतः। तयोरेकान्तं शक्रचोदितो वीतिहोत्रो कपोतरूपेण विघ्नयति। स्खलितश्चशम्भोर्वीर्यं धारयितुमसमर्थोऽनलस्तद्गङ्गायां निक्षिपति। गङ्गाऽपितत्तेजोऽसहमाना तच्छरवणे प्रक्षिपति। ज्वलच्च तत्सेव्यमानाः कृतिका गर्भं धारयन्ति। ततश्चकुमारः स्कन्दो जनिं गृह्णाति। सः मघोनप्रेरणया तारकासुरं निहन्ति। इति कुमारसम्भवकथा।

सर्वतोभावेन कमनीयतमेऽस्मिन् काव्येसर्वेऽपि श्लोकाः भावाभिव्यक्तिं प्रकटयन्ति। उदात्तैः वर्णनैः संपन्नं भवति महाकाव्यमिदम्। सुन्दराणि एवमेव मनोरञ्जकानि अनेकानि वर्णनानि सन्ति अस्मिन् काव्ये। आदौ तावत्हिमालयस्य स्थावरशरीरस्य वर्णनं पार्वत्याः जननं, बाललीला,

विद्याभ्यासः, आरुढयौवनायाः पार्वत्याः अङ्गप्रत्यङ्गवर्णनं, एवमेव पार्वत्याः पादादिकेशान्त वर्णना च प्रख्यतानि एव।

कुमारसंभवकथाभागस्य मूलत उपजीव्योग्रन्थः शिवपुराणं, तस्य प्रथमखण्डस्य नवमाध्यायत ऊनविंशत्यध्यायपर्यन्तं प्रतिपादितं तारकासुरवधमाश्रित्य महाकविना कालिदासेन काव्यमिदं विनिर्मितम्। एवं च कालिदासो वल्मीकीरामायाणमाश्रित्य यथा रघुवंशं चकार तथैवरामायणस्य सप्तत्रिंशसर्गे वर्णितं कुमारजननोदन्तमाधृत्य कुमारसंभवं निर्ममे।

**3. भरवेः किरातार्जुनीयम् (A.D. 6 C.)**

कौशिकगोत्रोत्पन्नस्य नारायणस्वामिनः पुत्रो भवति भारविः। संस्कृतमहाकाव्य परंपरायां कालक्रमदृष्ट्या भरवेः तृतीयं स्थानं भवति। सः तु संस्कृतकाव्यजगति अलंकृतशैल्याः प्रथमोन्नायकः पण्डितयुगप्रवर्त्तकश्च। तस्य प्रसिद्धं पञ्चमहाकाव्येष्वन्यतमं च भवति किरातार्जुनीयम्। काव्यसर्वस्वभूतयोर्भावकक्षापेक्षयोः समन्वयापेक्षया कवेः पाण्डित्य प्रदर्शनमेव प्राधान्येनावलम्बते। महापण्डितस्य अस्य ऐतिह्यविषये स्पष्टतया न किमपि वक्तुं शक्यते। केचनामुं दाक्षिणात्यं, कतिपये तु उत्तरखण्डभवं इति कथयन्ति। एतावदेव निश्चीयते कविरसौमाघपूर्ववर्ती कालिदासपरवर्ती च इति। चालूक्यवंशस्य पुलिकेशिनो द्वितीयस्य शासनकाले रविकीर्त्तिनासमुल्लिखिते शिलालेखे कविरसौ स्मृतो भवति इति द्रष्टुं शक्यते। अवन्तीसुन्दरीकथानुसारेण भारविः विष्णुवर्धनेत्याख्यस्य राज्ञः सभापण्डितः आसीदिति ज्ञायते। न केवलं स्थितिकालविषये किन्तु देशविषयेऽपि विदुषां न एकाभिप्रायो विद्यते। राजशेखरानुसारेणासौ विशालायां परीक्षित आसीत्। किन्तु नैतावतास्य देशो निर्णेतुं शक्यते। अधिकांशतः पण्डिताः अमुं दाक्षिणात्यं मन्यन्ते किन्तु अस्य शरत्हिमालययोः वर्णनं औत्तरीयमेव सूचयति। अस्य हि सह्याद्रि प्रसंगमालोक्य केचित्तं महाराष्ट्रीयं मन्यन्ते। भारविः शैव आसीत्।

संप्रति भरवेः कृतित्वेन किरातार्जुनीयमेव लभ्यते। एतदनुमीयतेयदेतादृशस्य महाप्रतिभासम्पन्नस्य कवेः तदितराः अपि कृतयः कालेन प्राप्नुयुः। किरातार्जुनीयं हि सर्वविध लक्षणोपेतं महाकाव्यम्। अत्र हि संप्रति अष्टादश सर्गाः समुपलब्धाः सन्ति। महाभारतस्य वनपर्वणि उल्लिखितस्य अर्जुनस्य पाशुपतास्त्र प्राप्तिवृत्तान्तमादाय रचितमिदं महाकाव्यम्। द्यूते पराजितो युधिष्ठिरः सानुजः सभार्यः संविदानुसारेण वनवासनिमित्तं द्वैतवनं प्रविशति। तत्र स्थितः स दुर्योधनवृत्तान्तज्ञानाय कञ्चित् किरातं चाररूपेण हस्तिनापुरं प्रेषयति। ज्ञातवृत्तश्च स द्वैतवनमागत्यसर्वं युधिष्ठिराय निवेदयति। युधिष्ठिरोऽपितत्सर्वं भ्रातृभ्यः श्रावयति। विपक्षस्य उत्कर्षमसहमाना पाञ्चालीपतिं धिक्कृतवती सती युद्धाय प्रेरयति च। प्रियोक्तंद्रढयन् भीमोऽपि तं धैर्यमपहाय विक्रमाय प्रेरयति। युधिष्ठिरश्च तं सान्त्वयन्नेव व्यासेन अर्जुनाय दिव्यास्त्रलाभाय

प्रेषयितुं निर्दिश्यते। तत्परामर्शानुसारमेव अर्जुनः तपसे यक्षेण सह हिमालयं प्रविशति। इन्द्रकीलपर्वतं प्राप्य तपसि रतोऽर्जुनः विघ्नैः प्रतिहन्यमानोपि स्वलक्ष्यान्नैव विचलति। तं परीक्षितुम्शिवःकिरातवेषेण तत्रागच्छति। उभावेव समकालं मायाविनं शूकरं प्रहरतः। तस्य निधनकारणमादाय तयोर्विवादः अजायत। युद्धे पराजितोप्यर्जुनः स्वप्रयासं नैव उपेक्षति। तेन कारणेनैवतृप्तः महादेवः तस्मै पाशुपतास्त्रं ददाति।

**भरवेः काव्यशैली**

'भरवेरर्थगौरवम्' प्रथितमेव। अतः एव मल्लिनाथोऽपि टीकाप्रारम्भे –नारिकेल फलसंमितं वचोभारवेरित्याह। बहोरपि अर्थराशेः अल्पेन शब्देनाभिधाने भारविः अभ्यस्तकुशलः इति सर्वेषां विदुषां विचिन्तनम्। भीमभाषणप्रशंसायां युधिष्ठिरेण उक्तम्-

स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहतं क्वचित् । ।

ऋतूनां जलक्रीडायाश्चन्द्रोदयस्य च वर्णने महती कवित्वप्रतिभा कविना प्रदर्शिता। कथ्यते हि भारविः भाषा – भाव – सौन्दर्य - रससिद्धि वर्णनाचातुरी – शास्त्रीय - पाण्डित्यादि विविधपक्षाणामेकाश्रय इति। तस्य हि भावनाचातुरिः, शब्दप्रयोगः, अर्थगौरवं, उदात्तकल्पना च कविषु श्रेष्ठं भावयन्ति। सहि सर्वानेव रसान् साधु साधयति। एवमेव विविधानि च्छन्दांसि च। तस्य भाषायां माधुर्यप्रौढतयोरपूर्वः समन्वयो दृश्यते। अलङ्काराणां यथावसरोपन्यासे चित्रकाव्यनिर्माणे च प्रतिभाधनः भवति भारविः

चित्रकाव्यप्रणयनस्य त्वयं प्रवर्थक एव। कवेरस्य व्याकरणपाण्डित्यमपि सर्वानतिशेते। छन्दप्रयोगस्यापि महत्कौशलमस्य काव्येषु द्रष्टुं शक्यते। 'षाड्गुण्यप्रभावा नीतिर्वंशस्थेन विराजते' इति क्षेमेन्द्रस्य उक्तिः वंशस्थोपनिबद्धां भारवेः नीतिचर्चामालोक्यैवप्रवृत्ता स्यादिति संभाव्यते। कवेः वंशस्थचारुत्वं प्रदर्शयन् क्षेमेन्द्रः कथयति-

वृत्तच्छत्रस्य सा काऽपि वंशस्थस्य विचित्रता।
प्रतिभा भारवेर्येन सच्छायेनाधिकीकृता। ।

अनेन एकस्मिन् एव सर्गे षोडशविधानि वृत्तानि प्रयुक्तानि भवन्ति। अप्रसक्तानां उद्गाता प्रभृति वृत्तानां प्रयोगोऽपि साधु प्रयुङ्क्तः। अलङ्कारप्रयोगेऽपि कविप्रतिभा अद्वितीया एव। अस्य भाषा सरला हृद्या च विद्यते। सूक्तिप्रियेण कविना सूक्तिमुक्तानां मालामेव ग्रथ्नाति। तस्य काव्यस्य अधिकांशो हि सूक्तिमयः। "हितं मनोहारि च दुर्लभं वचः", "न वञ्चनीयाः प्रभवोऽनुजीविभिः"इत्यादयः तेषु प्रमुखाः।

भरवेः अर्थगौरवं प्रथितमेव। सः सुदीर्घमपि पन्थानं स्वल्पेनैव प्रयासेन पारयति। ललितपदावल्या अर्थगाम्भीर्यस्य च मञ्जुलसमन्वयः काञ्चन मणिसंयोगमनुहरति।

'दीपशिखा कालिदासः','घण्डा माघः' इव 'आतपत्र भारविः' इत्युच्यते। भारविः कर्मणि विश्वसति न तु भाग्ये। ग्राम्य-जीवितचित्रणसमये ग्रामीणः राजनीतौ तु अमात्य इव, गोपालनविषये च गोपालश्च यथातथात्वं द्रष्टुं शक्नुमः।

**4. माघस्य शिशुपालवधम् (A.D. 8 C.)**

शिशुपालवधप्रणेतुर्माघस्य पितामहः सुप्रभदेवः गुर्जरशासकस्य वर्मलातनाम्नो नृपस्य मन्त्री आसीत्। माघस्य पिता दत्तको विद्वान् दानप्रसिद्धश्चासीत्। माघस्य जन्म प्रसिद्धे मीनमल्लनगरे आसीदित्युच्यते। वसन्तगढनामके स्थाने एकः शिलालेखः प्राप्तः, स हि ६२५ई० वर्षे उत्कीर्णो विद्यते। तत्र वर्मलात इति नाम लिखितं, अतः सप्तमशतकप्रारंभो भवति माघस्य समयः इति निश्चीयते। भारवेः अर्थतोनुकरणं माघकाव्ये प्राप्यत इत्यत भारवेरनन्तरकालीनः इत्यनुमीयते।

माघस्यैतिह्य विषयेस्वल्पमपि आभ्यन्तरप्रमाणमपि लभ्यन्ते शिशुपालवधस्य अन्ते कवि वंशवर्णनसन्दर्भे समुपस्थापितः। तदनुसृत्यमाघो हि सुप्रभदेवाख्यस्यपौत्रः दत्तकस्य पुत्रः चेति।

माघस्यशिशुपालवधं नाम महाकाव्यं जगति प्रसिद्धं भवति। 'नवसर्गगते माघे नवशब्दो न विद्यते'। 'माघे मेघे गतं वयः' इत्याद्युक्तिभिः प्रशंसितस्य अस्य महाकाव्यस्य प्रणेता माघः संस्कृतमहाकविषु सुप्रधानो भवति। कालिदासो हि रससिद्धः कविः, भारविस्तु कलापक्षपोषकः, अश्वघोषो हि दार्शनिकः। कथ्यते हि माघे सर्वेऽपि कवयः एकीभूय स्थिताः। तस्य काव्ये हि कालिदासस्य इव रसचमत्कारः, अश्वघोषस्य स्वाभीष्टदर्शनासिद्धिः, भारवेः अर्थगौरवं, भट्टेः व्याकरणप्रयोगपरता च परस्परं समन्विता विद्यन्ते। 'माघे सन्ति त्रयो गुणाः'- इति कथनेन माघस्य कालिदासस्य –भारवेः – दण्डिनः च एकायतनी भूतं स्वरूपमाख्यायते। काव्येऽस्मिन् वीरः मुख्यरसः शृङ्गारः च अङ्गम्। कोमलपदावल्या शब्दजालं विस्तारितो भवत्यत्र कविना। अस्य हि सुसंघटिता भाषा भावाभिव्यक्तये नितान्तं सक्षमा दृश्यते। कवेः सूक्ष्मेक्षिका पाटवमपि सर्वानतिशेते। अस्य चित्रालङ्कारवर्णना वैचित्र्यं भारविं भट्टिं चातिशेते।

पण्डितैः कथ्यते हि 'नवसर्गगते माघे नव शब्दो न विद्यते'। अस्य कथनस्य प्राधान्यम् किमित्युक्ते आदौ कविना नवनवानां शब्दानां बाहुल्येन प्रयोगकृतोस्ति। नवतामेव माघोरमणीयतायाःस्वरूपंकल्पयति। उक्तं च कविनैव -

'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः'(४/१७)।

सहृदयाः कथयन्ति यत् माघः भाषायां पाण्डित्येन सह परिष्कारः, कोमलतया सह माधुर्यं, ओजसा सह सशक्तता, अर्थगाम्भीर्येण सहस्फूर्तिरपि द्रष्टुं शक्यते इति।

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।

इत्युक्तिः प्रसिद्धा। दीपशिखाकालिदासः इव आतपत्रो भारविः इव घण्डामाघः इत्युक्तिः माघस्य शैलीं रञ्जयति। श्लोकेनानेन कवेः घण्डामाघ इति नाम प्राप्तवान्-

महाकाव्येऽस्मिन् द्वाविंशतिसर्गाः सन्ति। काव्येऽत्र युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वधो मुख्यतया वर्णितः। महाभारतोक्तां कथां वर्णनमाहात्म्येन चमत्कारशैल्या च पूर्णतां यापितो विद्यते। नारदाद्युधिष्ठिरयज्ञवृत्तान्तं श्रुत्वा कृष्णः ससैन्यस्तत्र गच्छति। तत्र च कृष्णस्याग्रपूजाविरोधिनमुद्धतं शिशुपालं स निहन्ति। एतावतीमेव कथां स्वप्रतिभाविलासात् विस्तृतेषु विंशतिसर्गेषु वर्णितो विद्यते। माघकवेर्विपुला वर्णनाशक्तिरत्र पल्लवितो जाता, उत्प्रेक्षालङ्कारप्रयोगचातुर्येण स्वप्रभावं प्रकाशितं च कविवरेण।

माघेन काव्ये बहूनां छन्दसां प्रयोगोऽपि कृतोविद्यते। अस्यापि वंशस्थं अतीव प्रियतरं भवति। श्रमसाध्यमपीदं काव्यं चमत्कारपूर्णमिति कवेः प्रतिभां स्पष्टीकरोति। संक्षिप्तकथाश्रयेण काव्यप्रवर्त्तनं संस्कृतपण्डितानां महान् आनन्दविषयमेव भवति। व्याकरणस्य विविधप्रयोग वैशिष्ट्यमपि काव्ये प्रयुक्तो विद्यते। काव्येऽस्मिन् स्पष्टता, मधुरता, ऊर्जस्वलता च सर्वत्र प्रकटीभवन्ति। वीरोक्तिषु त्वस्य विशिष्टा प्रभावशालिता दृश्यते।

माघकाव्ये किरातार्जुनीयम् अनुक्रियमाणमिव दृश्यते, काव्यद्वयं श्री शब्देन प्रारभते। चतुर्थसर्गे वृत्तभेदोऽपि उभयोः सममेव। किरातार्जुनीये शिवः माघे च हरिः स्तूयते। शिशुपालवधस्य प्रथमे सर्गे नारदागमनं श्रीकृष्णेन तदादरः नारदेन शिशुपालवधाय प्रोत्साहनं शक्र सन्देशकथनं च वर्णयति। द्वितीयेसर्गे कृष्णबलदेवोद्धृतानां गुप्तमन्त्रणाउद्धवपरामर्शानुसारेण युधिष्ठिरस्य यज्ञे गमनाय निर्णयः प्रतिपाद्यते। तृतीयसर्गे श्रीकृष्णस्य प्रस्थानं द्वारकासेनासमुद्रादीनां वर्णनं, चतुर्थे रैवतकपर्वतवर्णनं, पञ्चमे सैन्यशिबिरवर्णनं, षष्टे षट्ऋतुवर्णनं, सप्तमे वनविहारवर्णनं, अष्टमे जलक्रीडावर्णनं, नवमे चन्द्रोदय- शृङ्गारविधानादिवर्णनं, दशमे दानगोष्ठीरात्रिक्रीडावर्णनं, द्वादशे प्रस्थानवर्णनं यमुनावर्णनञ्च, त्रयोदशे कृष्णपाण्डवसमागमः श्रीकृष्णस्य नगरप्रवेशवर्णनं च, चतुर्दशे राजसूययज्ञक्रमः श्रीकृष्णस्याग्रपूजा, पञ्चदशे शिशुपालक्रोधो युद्धाय संनद्धता च राज्ञां, षोडशे दूतसंवादः, सप्तदशे युद्धप्रयाणम्, अष्टादशे युद्धवर्णनं, नवदशे सर्गे युद्धवर्णनं, चित्रालङ्कारयोजना च, विंशत्या शिशुपालस्य वधश्च।

## 5. श्रीहर्षस्य नैषधीयचारितम् (A.D.12 C.)

संस्कृतसाहित्ये नितान्तं प्रसिद्धं तथा विस्तृतं च महाकाव्यं भवति श्रीहर्षस्य नैषधीयचरितम्। श्रीहर्षो हि संस्कृतसाहित्यस्य वरेण्यकविष्वन्यतमः। श्रीहर्षकविना स्वकाव्ये "ताम्बूलद्वतयमासतञ्जलभते यः कान्यकुब्जेश्वरात्" इति कथनेन कविरयं १२२५-१२५२ मितवैक्रमाब्दानभितः शासतः कान्यकुब्जेश्वरस्य गहडवालवंशस्य गोविन्दचन्द्र प्रपौत्रस्य विजयचन्द्रपुत्रस्य जयचन्द्रस्य सभापण्डितः आसीत् इत्यनुमीयते। श्रीहर्षश्च प्रथमं विजयचन्द्रस्य तदनन्तरं जयचन्द्रस्य च सभापण्डितः आसीत्।

पञ्चमहाकाव्येषु अन्तिम: चेदपि बृहत्त्रयीषु प्रधानं भवति श्रीहर्षस्य नैषधीयचारितम्।'नैषधं विद्वदौषधं'- इत्युक्तिः अस्य महाकाव्यस्य महत्वं घोषयति। कविम् एवमेव काव्यमधिकृत्य च काव्यादेवव्यक्ततां लभन्ते इत्याश्वासकमेव भवति।

**श्रीहर्षस्य ग्रन्थाः**

- स्थैर्यविचारणप्रकरणम्
- विजयप्रशस्ति
- खण्डनखण्डखाद्यम्
- गौडोर्विंशकुलप्रशस्तिः
- अर्णववर्णनम्
- हिन्दप्रशस्ति:
- शिवशक्तिसिद्धिः
- नवसाहसाङ्कचरितचम्पू:
- नैषधीयचरितम्

**नैषधीयचरितम्**

दण्डिना महाकाव्यलक्षणे प्रतिपादितं महाकाव्यसंकल्पवीक्षणं संपूर्णतया नैषधीयचरिते प्रकथितो विद्यते। कथाकथनापेक्षया सुदीर्घेण एवमेव प्रौढतरेण वर्णनया काव्यमिदं सुवर्णितो वर्तते। अत्र काव्ये निषधराजस्य नलस्य चरित्रं, नल-दमयन्त्योः अनुरागकथां सविस्तरं उपवर्णितम्। नलदमयन्ती कथायाः अतिप्राचीनता विद्यते। प्रत्येकस्मिन् सर्गे वर्णितं वृत्तान्तं कवेः विस्तृतं प्रौढञ्च ज्ञाननिधिं सूचयति। तत्रापि विशेषतः सप्तदशसर्गं तस्य दर्शन प्रावीण्यं, व्याकरण निष्णातत्वञ्च प्रमाणयति। महाभारते प्रतिपादितं नलोपाख्यानम् उपसृत्य कविना अस्य महाकाव्यस्य रचना विहिता। महाभारते परिमितैः २०० श्लोकैः वर्णितं नलोपाख्यानं कवेः अद्वितीयप्रतिभया द्वाविंशति: सर्गात्मक २८२६ श्लोकेषु विकासितः महाकाव्यत्वेन परिणमितश्च।

केवलैः श्लोकैः वर्णित नलदमयन्त्योः विवाहवर्णनं १०-१४ सर्गेषु ५०० अधिकश्लोकैः विस्तरेण उपवर्णयन्ति। पूर्ववर्तिकान्यपेक्षया स्त्रीसौन्दर्यचित्रणमस्मिन् काव्ये सजीवतया भवति। सरसा वर्णनाशैली शृङ्गाररसपोषकत्वेन सहृदयहृदयानावर्जयति। श्रीहर्षकवितायां नारीरूपस्य वर्णनमतीवसजीवम्। चतुर्थे सर्गे विप्रलम्भशृङ्गारस्य वर्णनमपि परमरमणीयम्। अस्यकवेः उत्प्रेक्षाचमत्कारसहकृत:गाढबन्धत्वकृतश्चमत्कारो विस्मयमावहति ।

राजनि नले दमयन्तीम् अनुरक्ते दमयन्तीचिन्तया दूयमानेस्वारामम्पर्यटति सति तेन हंसो गृह्यतेदयया मुच्यते च। प्रत्युपकारभावनया हंसः दमयन्तीसमीपे नलस्य स्तुतिं करोति। तदानीं दमयन्त्याः पूर्वराग उदयते। दमयन्त्याः पिता विदर्भः तस्याः स्वयम्वरं घोषयति। तस्मिन्नवसरे दमयन्त्याः कामुकोऽपि तत्रायाति। धृतनलस्वरूपाः चत्वारः इन्द्र-यम-वायु-कुबेराः पञ्चमो नलश्च। सर्वेषां समरूपतया दमयन्ती विचित्रां दशां प्रपद्यते। सभावर्णनाय तत्रोपस्थिता देवी सरस्वत्यपि श्लेषवर्णनया दमयन्तीं व्यामोहयति। अन्ते तु दमयन्त्याः दृढानुरागेण पातिव्रत्येन च संतुष्टा देवाः विशिष्टचिह्न प्रकटनेन परिचाययति। नलदमयन्त्योः सुखसङ्गमेन परिसमाप्यते काव्यमिदम् ।

यद्यपि नैषधकाव्यं सौमबद्धताया अभावात् एकस्यैव शब्दस्य शब्दान्तरेण आवर्तनाच्च माघ किरातार्जुनीयापेक्षया न्यूनमर्यादां मन्तव्यं भवति तथापि नैषधे रसोल्वणत्वं सर्वातिशयेन भवति। उक्तं च – 'उदिते नैषधे काव्ये क्वमाघः क्व च भारविः ?'

## पुनरावृत्तिः (Recap)

- महाकाव्यं हि संस्कृत - साहित्य - जगतः सर्वोत्कृष्टरत्नम्। महतां महत्तरं च काव्यं महाकाव्यम्।
- वाल्मीकिःहि लौकिकसंस्कृतसाहित्यस्य आदिकविः। रामायणं हि आदिकाव्यम्।
- संस्कृतसाहित्ये प्रथितानि पञ्चमहाकाव्यानि भवन्ति कालिदासस्य रघुवंशं, कुमारसंभवं, माघस्य शिशुपालवधम्, श्रीहर्षस्य नैषधीयचरितं, भारवेः किरातार्जुनियं च।
- कालिदासस्य ऋतुसंहारं , कुमारसंभवं, रघुवंशं च 'लघुत्रयी' इति नाम्ना विख्यातः।
- भारवेः किरातार्जुनीयं, माघस्य शिशुपालवधं, श्रीहर्षस्य नैषधीयचरितं च मिलित्वा बृहत्रयी इति नाम्ना प्रसिद्धः।
- कालिदासः चत्वारः श्रव्यकाव्यग्रन्थाः (रघुवंश-कुमारसंभवश्चेति द्वे महाकाव्ये ऋतुसंहारं मेघसन्देशमिति खणडकाव्ये) त्रय: दृश्यकाव्यग्रन्थाः (अभिज्ञानशाकुन्तलं नाटकं, विक्रमोर्वशीयं नाटकं, मालविकाग्निमित्रं नाटकं)च विरचितवान्।

- पञ्चमहाकाव्येष्वन्यतमं भवति भारवेः किरातार्जुनीयम्। कविरसौ माघपूर्ववर्ती कालिदासपरवर्ती च।
- अवन्तीसुन्दरीकथानुसारेण भारविः विष्णुवर्धनेत्याख्यस्य राज्ञः सभापण्डितः आसीदितिज्ञायते।
- महाभारतस्य वनपर्वणि उल्लिखितस्य अर्जुनस्य पाशुपतास्त्रप्राप्तिवृत्तान्तमादाय रचितमिदं महाकाव्यम्।
- भारविः भाषा-भाव- सौन्दर्य- रससिद्धि वर्णनाचातुरी-शास्त्रीय-पाण्डित्यादि विविधपक्षाणामेकाश्रय इति। तस्य हि भावनाचातुरिः शब्दप्रयोगः, अर्थगौरवं, उदात्तकल्पना च कविषु श्रेष्ठं भावयन्ति।
- कविरयं 'आतपत्र भारविः' इति पण्डितैः विशिष्यते।
- 'नवसर्गगते माघे नवशब्दो न विद्यते'। 'माघे मेघे गतं वयः' इत्याद्युक्तिभिः प्रशंसितस्य अस्य महाकाव्यस्य प्रणेता माघः संस्कृत महाकविषु सुप्रधानो भवति।
- माघस्यशिशुपालवधं नाम महाकाव्यम् जगति प्रसिद्धं भवति।
- 'माघे सन्ति त्रयो गुणाः'- इति कथनेन माघस्य कालिदास –भारवि- दण्डीनां एकायतनीभूतं स्वरूपमाख्यायते।
- अस्य हि सुसंघटिता भाषा भावाभिव्यक्तये नितान्तं सक्षमा दृश्यते। कवेः सूक्ष्मेक्षिकापाटवं चित्रालङ्कारवर्णनावैचित्र्यं चातिशेते।
- पण्डितैः कथ्यते हि 'नवसर्गगते माघे नव शब्दो न विद्यते'। अस्य कथनस्य प्राधान्यम् किमित्युक्ते आदौ तावत् नवसर्गेषु कविना नवनवानां शब्दानां बाहुल्येनप्रयोग कृतोस्ति।
- घण्डामाघः इत्युक्तिः माघस्य शैलीं रञ्जयति।
- काव्येऽत्र युधिष्ठिरस्य राजसूये यागे श्रीकृष्णेन कृतः शिशुपालस्य वधो मुख्यतया वर्णितः। महाभारतोक्तां कथां वर्णनमाहात्म्येन चमत्कारशैल्या च पूर्णतां यापितो विद्यते।
- संस्कृतसाहित्ये नितान्तप्रसिद्धं तथा विस्तृतं च महाकाव्यं भवति श्रीहर्षस्य नैषधीयचरितम्।
- कान्यकुब्जेश्वरस्य गहडवालवंशस्य गोविन्दचन्द्रप्रपौत्रस्य विजयचन्द्रपुत्रस्य जयचन्द्रस्य सभापण्डितः आसीत् श्रीहर्षः इत्यनुमीयते।
- पञ्चमहाकाव्येषु अन्तिमः चेदपि बृहत्रयीषु प्रधानो भवति श्रीहर्षस्य नैषधीयचरितम्।
- 'नैषधं विद्वदौषधम्'- इत्युक्तिः अस्य महाकाव्यस्य महत्वं घोषयति।
- कविं काव्यं चाधिकृत्य च काव्यादेव व्यक्ततां लभन्ते इत्याश्वासकमेव भवति।

- अत्र काव्ये निषधराजस्य नलस्य चरित्रं, नल-दमयन्त्योः अनुरागकथां सविस्तरं उपवर्णितम्।
- नलदमयन्तीकथायाः अतिप्राचीनता विद्यते। प्रत्येकस्मिन् सर्गे वर्णितं वृत्तान्तं कवेः विस्तृतं प्रौढञ्च ज्ञाननिधिं सूचयति ।
- महाभारते प्रतिपादितं नलोपाख्यानं उपसृत्य कविना अस्य महाकाव्यस्य रचना विहिता।
- महाकाव्येऽस्मिन्द्वाविंशतिः सर्गाः सन्ति। मुख्यः रसः शृङ्गारः भवति

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. लौकिकसाहित्ये आदिकविः कः? आदिकाव्यं किम्?
2. रघुवंशस्य इतिवृत्तं कस्मात् स्वीकृतं भवति ?
3. रघुवंशमहाकाव्ये कति सर्गाः भवन्ति ?
4. महाकविकालिदासस्य महत्तरं शृङ्गारकाव्यं किंभवति ?
5. 'आतपत्र' इतिविशेषभूषितः कविवरः कः?
6. महाकविना भारविनाविरचितं महाकाव्यम् किम् ?
7. महाकविरयं कस्य राज्ञः सभापण्डितत: आसीत्?
8. 'नारिकेलफलसंमितं वचोभारवेरित्याह'-इति कस्य उक्तिः भवति ?
9. किरातार्जुनीये कति सर्गाः सन्ति?
10. महाकविमाघविरचितं प्रख्यातं महाकाव्यं किम्?
11. शिशुपालवधे कति सर्गाः सन्ति?
12. शिशुपालवधमहाकाव्ये मुख्यः रसः कः?
13. माघस्य विशेषतया प्राप्तंनाम किं भवति ?
14. शिशुपालवधमहाकाव्यस्य इतिवृत्तं कस्मात् स्वीकृतं भवति?
15. श्रीहर्षविरचितस्य पञ्चमहाकाव्येष्वन्यतमस्य काव्यस्य नाम किं भवति?
16. नैषधीयचारिते कति सर्गाः सन्ति?
17. नैषधीयचारितस्य मुख्यः रसः कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
### (Answer the following questions in one or two sentences)

1. 'लघुत्रयी' इति नाम्ना प्रथिताः ग्रन्थाः के भवन्ति?

2. बृहत्रय्यां वर्तमानाः ग्रन्थाः के ?
3. संस्कृत साहित्ये पञ्चमहाकाव्यानि कानि?
4. पञ्चमहाकव्येषु महाकविकालिदासविरचितेमहाकाव्ये के ?
5. कालिदासविरचितानि नाटकानि कानि?
6. 'लघुत्रयी' इति नाम्ना प्रथिताः ग्रन्थाः के भवन्ति?
7. किरातार्जुनीयस्य इतिवृत्तं कस्मात् स्वीकृतं भवति?
8. 'नवसर्गगते माघे नवशब्दो न विद्यते' इत्युक्तिः कथं प्राप्तं भवति?
9. नैषधीयचारितस्य प्रतिपाद्यः विषयः कः?
10. नैषधीयचारितस्य नायकः कः, नायिका का?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. कालिदासेन विरचिताः श्रव्यकाव्यग्रन्था के?
2. संस्कृत साहित्ये पञ्चमहाकाव्यानि कानि?
3. पञ्चमहाकाव्येषु रघुवंशस्य प्राधान्यं विशदयत।
4. 'उपमाकालिदासस्य' इत्युक्तिं परिशोधयत।
5. रघुवश-कुमारसंभवयोः पौर्वापर्यं चर्चां कुरु।
6. कालिदासस्य काव्यशैलीम् उपवर्णययत।
7. 'नैषधं विद्वदौषधम्'- इत्युक्तिः कस्य महाकाव्यस्य महत्वं घोषयति?
8. 'उदिते नैषधे काव्ये क्वमाघः क्व च भारविः ?

## निर्दिष्टाभ्यासः (Assignment)

1. महाकवेः कालिदासस्य जीवनकालंकृतित्वं च संक्षेपेण प्रतिपादयत।
2. महाकाव्यानाम् उत्पत्तिं विकासं च उपपादयत।
3. पञ्चमहाकाव्यनि अधिकृत्य उपन्यस्यत।
4. श्रीहर्षस्य व्यक्तित्वम् कवित्वं च अधिकृत्य उपन्यस्यत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. वाल्मीकिः। रामायणम्।

2. रामायणात्।
3. एकोनविंशतिसर्गाः।
4. कुमारसंभवम्।
5. महाकविभारविः।
6. किरातार्जुनीयम्।
7. विष्णुवर्धनस्य राज्ञः।
8. प्रख्यातटीकाकारस्य मल्लिनाथस्य।
9. अष्टादश सर्गाः।
10. शिशुपालवधम् (माघम्)
11. द्वाविंशतिसर्गाः।
12. वीररसः।
13. घण्डामाघः।
14. महाभारतात्।
15. नैषधीयचारितम्।
16. द्वाविंशतिः।
17. शृङ्गारः।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणि दाहालः, संस्कृतसाहित्यतिहासः, कृष्णदास अकादमि, वारणसि।
2. A history of Sanskrit literature: A B Keith
3. Indian Kavya literature: A K Warder
4. Samskrita Saahityacharitram: Dr. K Kunjunniraja & Dr. M S Menon.
5. Samskrita Saahityacharitram, Acharya sree Ramachandra Misra.

# Unit - 3
# गद्यकाव्यानि

## उद्देश्यानि (Learning Outcomes)

- गद्यसाहित्यस्य सामान्यज्ञानं लभते।
- गद्यकाव्यानां विभागं अधिकृत्य ज्ञानं वर्धते।
- गद्यसाहित्यग्रन्थानां परिचयः।

## प्राग्व्यपेक्षाः (Pre requisites)

वृत्तबन्धरहितं वाक्यं गद्यमिति निगद्यते। वृत्तबन्ध सहितन्तु पद्यं भवति। संस्कृतसाहित्ये गद्यपद्ययोरयमेव भेदो भवति। परन्तु आधुनिककाले पाश्चात्यरीतिमाश्रित्य सरलं व्यावहारिकं वाक्यं गद्यं इति व्यवह्रियते। तत्र काव्यगुणानपेक्षया विषयस्य प्राधान्यं भवति। गद्यकाव्येऽपि काव्यगुणाः, विशिष्टाशैली च दृश्यन्ते। अतः एव 'गद्यं कवीनां निकषं वदन्ति' इति गद्यरचनां प्रशंस्यते। संश्लिष्टता, संक्षिपता च संस्कृतगद्यशैल्याः विशेषता। विस्तृतविषयस्य संक्षेपेण कथने अल्पस्य विषयस्य विस्तृतरूपेण वर्णने च गद्यं सक्षमं माद्यमं भवति। पद्ये इव गद्येऽपि माधुर्यं, ओजः च विद्यते।

## मुख्यपदानि (Key terms)

गद्यसाहित्यम्, सुबन्धुः- वासवदत्ता, गुणाढ्यः - बृहत्कथा, बाणभट्टः - हर्षचरितं, कादम्बरी, दण्डीः, दशकुमारचरितम्, अवन्तीसुन्दरीकथा, धनपालः, तिलकमन्जरी, कृष्णपण्डितः, रत्नावली, क्षेमेन्द्रः, बृहत्कथामञ्जरी, सोमदेवः, कथासरित्सागरः।

## DISCUSSION

### 3.1.1. गद्यसाहित्यम्

संस्कृतसाहित्ये पद्यमिव गद्यमपि परमप्रकर्षं साहित्यं भवति। वैदिक साहित्येषु गद्यस्य प्रयोगः प्रचुरप्रचारमासीत्। किं गद्यमित्यपेक्षायाम् आचार्य दण्डी कथयति - 'अपादपदसन्तानोगद्यम्' इति। वस्तुतः पदानां वृतापेक्षया प्रयोगो यत्र विद्यते तत्पद्यं, यत्र तु

वृत्तबन्धरहितेन स्वातन्त्र्येण प्रयोगो भवति, तत् गद्यं च भवति। गद्यं तु भाषायाः प्राकृतिकं स्वरूपं भवति, तद्विपरीतं पद्यं तु तस्य निर्मितस्वरूपम्। यथा गद्यते तद् गद्यम्। उदा:-अहं विद्यालयं गच्छामि। अत्र वाक्ये हि अनियतवर्णावसानं भवति अथवा वर्णानां संख्या विषये नियतत्वं न विद्यते इत्यर्थः। पद्यं तु नियतवर्णावसानं पादबद्धमेव च भवति। संस्कृत गद्यसाहित्यं पद्यसाहित्यादपि प्राचीनत्वं कथयति। गद्यं पद्यस्य व्याख्यानरूपं इति केचन कथयन्ति। तत्तु तेषां बुद्धिविभ्रमः एव। ओजोभूयस्त्वमेव गद्यम्। गद्यसाहित्यस्य प्रारम्भिकं रूपं भाषित भाषाया निकामं संवदतेस्म। पश्चात्काले पद्य साहित्ये इव गद्येऽपि कृत्रिमता समुदिता।

गद्यकाव्यं द्विविधं-कथा आख्यायिका चेति। तत्र कथा हि कविकल्पित वस्तुपात्रादिविषया यथा-ब्रृहत्कथा। आख्यायिका तु ऐतिहासिकवृत्ताधारा। कथा हि स्वयं नायकेन वा अन्येनापि कथिता भवति। आख्यायिका तु स्वयं नायकेनैव कथिता स्यात्। आख्यायिका उच्छवासाख्येषु विभागेषु विभक्ता भवति। तत्र वक्त्रा परवक्त्र वृत्तपीत पद्यान्यपि भवन्ति किन्तु कथायां नैव। कथायां तु कन्याहरण-संग्राम-विप्रलम्भ-सुर्योदय-चन्द्रोदय प्रभृतिविषयाणां विस्तृतवर्णनं उपपादित: भवति। सुबन्धु प्रारंभिता गद्यकाव्यपरम्परा आढ्यराज - हरिचन्द्र -गुणाढ्य–बाणभट्ट-दण्डि-धनपाल-वादीभसिंह-अगस्त्य-वामनभट्ट-अनन्त-अम्बिकादत्त-विश्वेश्वर-क्षमाराव-रामशरण प्रभृतिभिर्विचक्षणैः प्रतिपालिता एवमेव संवर्धिताः स्वरूपपरिणामैः नूतन-स्वरूपं प्राप्ताः च।

### 3.2.2. कतिपयानां गद्यसाहित्यग्रन्थानां परिचयः

सुबन्धुः - वासवदत्ता।

गुणाढ्यः – बृहत्कथा।

बाणभट्टः - हर्षचरितं, कादम्बरी च।

दण्डीः - दशकुमारचरितम्, अवन्तीसुन्दरीकथा।

धनपालः – तिलकमन्जरी।

कृष्णपण्डितः – रत्नावली।

क्षेमेन्द्रः – बृहत्कथामञ्जरी।

सोमदेवः – कथासरित्सागरः।

### 1. वासवदत्ता - सुबन्धुः (6th A D)

संस्कृतगद्यसाहित्य जगति प्रथम्यः भवति सुबन्धुः। वासवदत्ता नामक एकमेव ग्रन्थः सुबन्धोः कृतित्वेन प्रसिद्धिम् अवाप। वासवदत्ता हि गद्यसाहित्ये प्रकटीकृतेषु गौरवान्वित कृतिषु

प्रथमः मुख्यश्च। अस्य स्थितिकालविषये पण्डितानां न एकाभिप्रायो विद्यते। केचित् तं बाणप्रभावितं एव बाणपरवर्त्तिनं मन्यन्ते, केचित्तु बाणमेव सुबन्धु अनुगामिनं मत्वा बाणपूर्ववर्त्तिनं मन्यन्ते। कल्पितेतिवृत्तं स्वीकृत्य विरचितेऽस्मिन् आख्यायिकायाम् उदयनाकथा प्रसिद्धं वासवदत्ता नामकरणं कृतो वर्तते। शब्दालङ्कारसौष्ठवैः वासवदत्तां तुलयितुं नान्योग्रन्थः विद्यते इति तदध्ययनेनावगन्तुं शाक्यते।

अत्र काव्ये वासवदत्ता कन्दर्पकेतोः अनुरागकथां वर्णितास्ति। एकदा कन्दर्पकेतुः कुसुमपुरराजकन्यां स्वप्ने पश्यति। स्वप्नेदृष्टायां तस्याम् आकृष्टः कन्दर्पकेतुः तदन्वेषणाय मकरन्देन सह चलति। देशान्तरं परिभ्रमन् सः विन्ध्याचलं प्राप्नोति। तस्मिन्नेव समये कुसुमपुरराजपुत्री कन्दर्पकेतुं स्वप्ने दृष्ट्वा तमन्वेषणाय सारिकां प्रेषयति। विन्ध्याटव्यां शुकसारिका संवादं श्रुत्वा कन्दर्पकेतुः वासवदत्ताविषयं जानाति। तं देशं गत्वा तया सह मिलित्वा तौ मायाश्व मारुह्य चलत:। तत्र निद्रामुपगतं कन्दर्पकेतुं विहाय कियन्मात्रदूरं वनसौन्दर्यदर्शनाय गता सा किरातैः अवरुद्धा जाता। कथञ्चित् तेषां सकाशात् सा पलायिता, स्त्रीनिषिद्धं मुनेराश्रमं प्रविश्य शिलायां परिणता भवति। प्रबुद्धः नायकः तामन्विष्य तत्रैव प्राप्य तामन्वेषणाय प्रयतते। अन्ते सा तस्य स्पर्शेन पूर्वशरीरं प्राप्नोति। ततस्ते स्वपुरं गत्वा सुखं जीवति इति कथा।

सिद्धहस्तः कविः भवति सुबन्धुः। श्लेषेवक्रोक्तिकथने च सर्वातिशायित्वेन संमतः एव। अनुप्रासोपमालङ्कारप्रयोगेऽपि सः प्रशस्त एव।

सारसवत्ता विहता नवका विलसन्ति चरति नो कङ्कः ।
सरसीव कीर्तिशेषं गतवतीभुवि विक्रमादित्ये । ।

इति कविना स्वीये ग्रन्थे उक्तवत् अस्य स्थितिकालः षष्ठशतकस्य पूर्वभागः इत्यनुमीयते। अत्र स्मर्यमाणः विक्रमादित्यः कः इत्याकाङ्क्षायां हूणराजस्य पराजेता बालादित्यसखो यशोवर्म एवायं विक्रमादित्य इति अनुमीयते। यशोवर्मणः समयश्च षष्ठशतकस्य मध्यभाग इति निर्णयन्ति। बाणभट्टः सुबन्धोः कथां 'धिया निबद्धेयमतिद्वयी कथा' इति रीत्या स्मरति इत्यतः बाणः सप्तमशतकोत्पन्नः इति, तत पूर्ववर्त्तित्वेन सुबन्धोः षष्ठशतकपूर्वभागित्वं निर्णयति।

**2. बृहत्कथा- गुणाढ्यः (6th C. A. D)**

संस्कृतभाषायां अतिसंपन्नं कथावाङ्मयं विद्यते। भारतीयसाहित्येषु अतिप्राचीनं कथासमाहारं भवति गुणाढ्यस्य 'बृहत्कथा'। मानवसांस्कारिक चरित्रभूमिकायाम् अतिप्राचीनोऽयं कथाग्रन्थः इति डा.एस्. एन्.प्रसादमहाशयः अभिप्रैति। निर्भाग्यात् ग्रन्थोऽयं नोपलभ्यते। दण्डिना बाणेन पतञ्जलिना च महादादरेण प्रस्तूयते ग्रन्थममुमधिकृत्य। ब्रृहत्कथामुपजीव्य लिखितानि कथासंग्रहाणि भवन्ति -

- बुधस्वामी - बृहत्कथासंग्रहं
- क्षेमेन्द्रः - बृहत्कथामञ्जरी
- सोमदेवः - कथासरित्सागरः
- अभिनन्दः - बृहत्कथाश्लोकसंग्रहः

एतेषां ग्रन्थानां आधारेणैव बृहत्कथां समवगन्तुं शक्यते।

'पैशाची' प्राकृतभाषायां विरचितोऽयं ग्रन्थः इति प्रसिद्धिः। पैशाची तु दक्षिणा पथस्य प्रादेशिकभाषा भवति। गुणाढ्यः तु प्रतिष्ठानपुरस्य राज्ञः सातवाहनस्य सभापण्डितः आसीत्। एकदा स तु व्याकरणशिक्षणावधौ शर्ववर्मणः कातन्त्र्यव्याकरणकारेण पराजितः। संस्कृतं प्राकृतञ्चोभयमयीं वाचं समुत्सृज्य पैशाचीमाश्रित्य बृहत्कथां कृतवानित्यस्य काव्यस्य प्रथिता रचना चरित्रकथा। सातवाहस्य स्थितिकालः मितविक्रमानन्तर प्रथमद्वितीयशत कान्तराले भवति इत्यभिप्रैति। तेन गुणाढ्यस्योपि स्थितिः अनेनैव कालेन संवादिता भाव्यमिति अभिप्रयन्ति समालोच्यकाः।

**बृहत्कथा गद्यमयी उत कथामयी?**

ग्रन्थोऽयं अधुना न प्राप्यते इत्यतः एतत् निश्चयेन वक्तुमशक्यं यत् बृहत्कथा गद्यमयी उत कथामयी असीदिति। तादृश चिन्तायाः कारणं किमित्युक्ते बृहत्त्कथामुपजीव्य अधुना लभमानाः कृतयः गद्यपद्योभयाश्रिताः भवन्ति। कथासरित्सागरमाश्रित्य रचनैषा पद्यमयी दृश्यते। तत्र कथितं च-

तथैव च गुणाढ्येन पैशाच्या भाषया तया।
निबद्धा सप्तभिर्वर्षैः ग्रन्थलक्षाणि सप्तसा ।। इति।

किन्तु बुधस्वामिनः बृहत्कथा श्लोकसंग्रहादिदं पद्यमयमासीदित्यनुमीयते। बृहत्कथायां हि काणभूतिकथिताः सप्तकथाः निबद्धा आसन्। आचार्यदण्डिना कथायाः उदाहरणत्वेन बृहत्कथां स्मृता वर्तते। 'कथायां सरसं वस्तु गद्यैरेव निबन्ध्यते'। अतः बृहत्कथा गद्यमयी संभवति इत्यभिप्रयति। हेमचन्द्रोऽपि बृहत्कथातः गद्यविशेषमुद्धृत्य गद्यमयत्वं समर्थयति।

**कथायाः किं वैशिष्ट्यम् ?**

लोकप्रियसाहित्ये प्रथमकृतित्वेन भारतीयसाहित्यकलायाः भण्डागारभावेन, अनन्तरकाले साहित्योपजीवितत्वेन च बृहत्कथायाः प्राधान्यं नितान्तं प्रस्ताव्यमेव। भारतीयेतिहासस्य अप्रकाश्यमानेषु कालेषु समालोचितानां दर्शनधारां सभ्यतां स्थितिं च स्पष्टीकर्तुमपि ग्रन्थोऽयं उपकरोति ।

कथायाः उद्भवभूमिः भारतवर्षमेव। अधुनाधुनकाले पाश्चात्यानां मध्ये कथायाः गौरवं स्वीकुर्वन्ति। किन्तु लोककथासाहित्ये कथायाः आधारं भरतीयकथात् एव इति अभिमानार्हः विषयः एव। पाश्चात्यकथायाः इतिहासं चरित्रं च अवगतवन्तः पण्डितैरामनन्तियत् भारतभूमिरेव कथायाः उत्पत्तिक्षेत्रमिति। पञ्चतन्त्रेण विश्वसाहित्ये महदुपयोगिः दानं कृतमासीत्। संस्कृत साहित्ये कथायाः प्रकारद्वयमासीत्।

- उपदेशात्मककथा:
- मनोरञ्जककथा:

बृहत्कथा गुणाढ्यस्य आत्मकथाख्यानेन प्रारब्धं स्यात्। सप्तविद्याधराणां कथा भवति बृहत्कथा इति पुराणाख्यानेषु प्रतिपाद्यते। शिवः पार्वतीं कथां वदति । सा कथा तु पुष्पदत्तेन अनुचरेण श्रूयते। स: तु तस्य पत्नीं ज्ञापयति। जायया कथा सर्वैरपि ज्ञाता इत्यतः पार्वती पुष्पदत्तं शशाप। तस्य सहोदरः माल्यवानपि तमेव शापं प्राप। पार्वत्या शापमोक्षमपि परिकल्पितम्। भूमौ मर्त्यो भूत्वा 'काणभूतिं' यथा मिलति तथा तं बृहत्कथां उपदिशतु। एवमेव काणभूतितः बृहत्कथां पठित्वा जनसामान्येषु प्रचारयिष्यतः माल्यवतोऽपि शापमोक्षं लब्धम् इति।

पुष्पदत्तः कौशाम्ब्यां वररुचेः पुत्रत्वेन जनिमलभत। व्याकरणपण्डितोऽयं वानप्रस्थावसरे काणभूतिं मिलित्वा विद्याधरकथां तस्मिन् उपदिस्य शापमुक्तिं संपादितः। माल्यवान् तु गुणाढ्यत्वेन जनिमलभत। सातवाहनराजस्य मन्त्रिपदम् अलंकृत्य अन्ते काणभूतिं संप्राप्य सप्तविद्याधरकथां गृहीतः। ततः एकलक्षात्मकश्लोकान् स्वरक्तैः लिखित्वा पुस्तकरूपेण राज्ञे समर्पितवान्। पैशाचीभाषायां रक्तेन लिखितत्वात् च राज्ञा निराकृतश्च। निराशया गुणाढ्यः स्वकृतिं अग्नौ ज्वालितः। किन्तु सप्तमकथां ज्वालयितुमुद्युक्ते शिष्याः तं निरुद्ध्य संरक्षिताश्च। कथामिमां श्रुत्वा पश्चात्तापविवशः राजा बृहत्कथां पठित्वा प्रचारितः इति तत्सम्बन्धी कथा।

**बृहत्कथाम् उपजीव्य रचितानां साहित्यानां परिचयः**

- बुधस्वामी – बृहत्कथाश्लोकसंग्रहः।
- क्षेमेन्द्रः – बृहत्कथामञ्जरी।
- सोमदेवः – कथासरित्सागरः।
- अज्ञानकर्तृक – सिंहासनद्वात्रिंशिका।
- शिवदासः – गद्यपद्यात्मिकया संग्रहीतं वेतालपञ्चविंशतिः।
- अज्ञानकर्तृकः – शुकसप्ततिः।

**3. बाणभट्टः (7. A .D)**

- कादम्बरी
- हर्षचरितम्

संस्कृतगद्यसाहित्यचरित्रे प्रख्यातो भवति बाणबट्टः। पद्यं वद्यं गद्यं हृद्यं इत्युक्तिः बाणस्य गद्यरचनया प्रचलिता स्यात्। श्लेषघटनात्मकेशब्दगुम्फने रस-अलङ्कार- सदर्थ -कथावर्णनेषु सिद्धहस्तत्वात् पञ्चाननविशेषमण्डित: भवति बाणबट्टः। कवेरस्य कृतौ सुबन्धोरिव श्लेषघटना, कालिदासस्येव रसपाकः, भारवेरिव अर्थगौरवं, गुणाढ्यस्येव कथावर्णनं, भर्त्रुमेठस्येवालङ्कारसिद्धिः च सुसंघटिता वर्तते।

स्थाणीस्वरस्य श्रीहर्षस्य सभापण्डितोऽयं कविः इति हर्षचरिते कविना एव प्रस्तौति।

तथापि नृपतेर्भक्त्या भीतो निर्वहाणाकुलः।
करोम्याख्यायिकाम्भोधौजिह्वाप्लवनचापलम् ।।

स्थाणीश्वरो श्रीहर्षः ६६३ मितवैक्रमाब्दे राज्येऽभिषिक्तः। एवं प्रकारेण हर्षचरिते बाणेन स्ववंशपरिचयः प्रदत्तो भवति। बाणभट्टेन गद्यकृतित्वेन ग्रन्थद्वयमेव प्रणीतं हर्षचरितं, कादम्बरी चेति।

**बाणबट्टस्य इतरे कृतयः**

- चण्डिकाशतकम्
- पार्वतीपरिणय:
- मुकुटताडितम्

कान्यकुब्जेश्वरस्य आस्थानकवित्वेन प्रथितस्य बाणस्य सर्वेऽपि कृतयः तन्मयत्वपूर्णैः वर्णनैः यथा तथजीविताविष्करणैः, रसपूर्त्या वचोविलासैः च अनवरतां शोभन्ते। 'हृदयवसति पञ्चबाणस्तुबाणः' इत्यनेन कविना प्रयुक्तं प्रथितं च।

**हर्षचरितम्**

हर्षचरितं तु बाणेन विरचितं सरसं काव्यं भवति। करोम्याख्यायिकाम्बोधौ जिह्वाप्लवनचापलम्' इति हर्षचरितोक्तादिशा हर्षचरितस्याख्यायिका ग्रन्थस्वरुपत्वं प्रतीतम्। काव्येऽस्मिन् कविना स्वचरितमानेतुं प्रयासः कृतो भवति। अष्टोच्छ्वासेषु विभक्तेऽस्मिन् ग्रन्थे आद्ये त्रये स्वीया कथा लिखिता, चतुर्थादुच्छ्वासादारभ्य समाप्तिपर्यन्तं हर्षस्य चरित्रं च उपवर्णितम्। हर्षस्य पितरौ यशोमती-प्राभाकरवर्धनौ आस्ताम्। 'ओजः समासभूयस्त्वमेतत्

गद्यस्य जीवितम्’ इति आलङ्कारिकाणाम् अभिमतं बाणे संघटते। एवमेव कविरयं पाञ्चालीरीतेर्भक्तः। व्यञ्जनाप्रयोगे वक्रोक्तेः प्रयोगे च सकलकविमूर्धन्योबाणो विराजते। प्रौढया आलङ्कारिकवर्णनया ग्रथितोयं ग्रन्थः संस्कृतगद्यसाहित्ये प्रशोभते।

**कादम्बरी**

गद्यसाहित्ये कथासाहित्ये च अन्तर्भवति। बाणबट्टेन विरचिता कादम्बरी। अपूर्णस्य अस्य ग्रन्थस्य उत्तरभागः बाणपुत्रेण भूषणभट्टेन विरचितम् इत्युच्यते। ‘कादम्बरीरसज्ञानेन आहारोऽपि न रोचते’ इत्युक्तिः अस्याः कथायाः रसनीयताम् उद्घोषति। बृहत्कथा कादम्बरीं प्रणेतुं प्रेरकोऽभूत् इत्यनुमीयते। कथापात्राणम् अनेकजन्मवृत्तान्तकथोपस्थापनया आख्यानसंकेतैः च संकीर्णे एवमेव वैचित्र्यपूर्णे ग्रन्थे विदिशाधिराजस्य शूद्रकस्य कथया प्रारभते। बाणेन विरचितेषु ग्रन्थेषु कादंबरी सर्वातिशायिनी प्रशस्ततरा च। कादम्बर्याः पात्रचित्रणं, रसविपाकः, वस्तुविन्यासः च सर्वातिशयत्वेनैव भवति। ‘बाणोच्छिष्टं जगत्सर्वम्’ इत्युक्तिः अन्वर्थमेव इति रचनासौ साधूकरोति। पाञ्चालीरीत्या गुम्फितकाव्यमिदं व्यञ्जनाप्राधान्येन वक्रोक्तिविलासेन च परिलसति।

**4. क्षेमेन्द्रस्य बृहत्कथामञ्जरी (11. C.A.D)**

बृहत्कथायाः पुनराख्येनेषु क्षेमेन्द्रस्य ‘बृहत्कथामञ्जरी’ सविशेषपरामर्शमर्हति। अभिनवगुप्तस्य शिष्यो क्षेमेन्द्रः काश्मीराधिपस्य अनन्दस्य आस्थानविद्वान् आसीत्। ‘औचित्यविचारचर्चा’, ‘कविकण्ठाभरणम्’ इत्येतौ साहित्यशास्त्रग्रन्थौ ‘शशिवंशम्’ ‘अमृतरङ्गम्’ इत्यादीनि काव्यानि रामायण-महाभारत-बृहत्कथा इत्येतेषां काव्यपुनराख्यानमञ्जर्यादयश्च प्रख्यातानि भवन्ति। अष्टादश लम्बकेषु विभक्तेषु बृहत्कथामञ्जर्याः कथाघटना उपकथाभिः गुम्भिताः। प्रत्यैकस्या: उपकथायाः अन्ते प्रधानकथां सम्सूचयन् अनुसंधानभागा: अपि व्यरचयन्।

**5. कथासरित्सागरः – सोमदेवः (11.C.A .D)**

सोमदेवविरचितं कथासरित्सागरं बृहत्कथायाः काश्मीरीयोऽन्यः पुनराख्यानो भवति। काश्मीरशासकस्य अनन्तनृपतेः खिन्नायाः पत्न्या सुर्यमत्या मनोविनोदार्थं काश्मीरीदेशवासी सोमदेवपण्डितः कथासरित्सागरं प्रणीतवान्।११० मितवैक्रमाब्दाभ्यर्णे बृहत्त्कथायाः एव साररूपेण कथासरित्सागराख्यो ग्रन्थः प्रणीतोस्ति। अत्र हि अष्टादश लम्बकानि, १२४ तरङ्गाः द्वाविंशति सहस्रश्लोकाश्च सन्ति। वाल्मीकीरामायणे इव स्वच्छः एवमेव सरलां शैलीम् अवलम्ब्य विरचितेऽस्मिन् ग्रन्थे साहित्यमहिमा अतिशेते।

6. **कृष्णपण्डितः**

धर्माधिकारि वंशस्य श्रीकृष्णपण्डितस्य रत्नावली आधुनिकगद्यकाव्येषु नृपायते। गन्धर्वकुमार्याः रत्नावल्याः रत्नचूडाख्येन नागराजकुमारेण सह परिणयो उपवर्णितः। सर्वैरेव काव्यगुणैः समलङ्कृतः भवत्ययं ग्रन्थः। बाणकाव्येष्विव दीर्घसामासान्वित वाक्यानि, सुबन्धुरिव श्लेषप्रयोगबाहुल्यं दण्डिनः इव पदलालित्यं च काव्येऽत्र संमिलितो वर्तते।

7. **धनपालः (10 C.A.D)**

समालोचकैः स्तूयमानः काव्यग्रन्थो भवति धनपालस्य तिलकमन्जरी। कविरसौ धारानरेशस्य मुञ्जस्य सभापण्डितः सर्वदेवस्य प्रपुत्रः च आसीत् इति ग्रन्थादेवावगम्यते। १०३० मितवैक्रमाब्दमभितः रचितेऽस्मिन् ग्रन्थे राजपुत्र्याः तिलकायाः राजपुत्रेण समरकेतुना सह प्रेमकथा उपवर्णिता भवति।

8. **दण्डी (7. C.A.D)**

आचार्यदण्डी विरचितत्वेन प्रसिद्धं भवति दशकुमारचरितम्। अवन्तिसुन्दरीकथा इत्येका अन्या कथापि तस्यैव कृतित्वेन प्रसिद्ध भवति। दण्डिनः स्थितिकालविषयेऽपि चरित्रकाराणां संधिग्धत्वं विद्यते।

दशकुमारचरितस्य पूर्वपीठिका, दशकुमारचरितं, उत्तरपीठिका चेति भागत्रयो विद्यते। केचित् भाषागतसौन्दर्यमवलंब्य चरितभागमेव दण्डिप्राणीतं इति मन्यन्ते। दशानां कुमाराणां अतिपौरुष पराक्रमवर्णनमेवास्य ग्रन्थस्य विषयः। मगधराजकुमारस्य राजवाहनस्य तन्मन्त्रिणां नवानां देशविशेषसञ्चरणानुभवानां मनोहरवर्णनमत्र दृश्यते। दण्डिनः कल्पनाशक्तिः बहुमुखी प्रतिभा च प्रथिता। अस्य सुबन्धोरिव प्रत्यक्षश्लेषवर्णना न विद्यते चेदपि बाणस्य काव्येष्विव चमत्कारवर्णप्रयोगः विद्यते। पदप्रयोगे तु प्रसादमाधुर्यपदानि ललितललितायितभावेन गर्भितान्येव। अनुप्रासयमकादिविन्यासेऽपि कविः श्रेष्ठः। दण्डिनः पदलालित्यं इत्युक्तिः अस्य रचनायां सुघटते एव। दण्डिनः अपराकृतिर्भवति अवन्तिसुन्दरीकथा। ग्रन्थोऽयं हर्षचरितमिव कतिपयैः पद्यैरारभ्यते। 'ओजः समासभूयस्त्वं गद्यस्य जीवितमिति' अवन्तिसुन्दरीकथायां अन्वर्थो भवति।

## पुनरावृत्तिः (Recap)

- वृत्तबन्धरहितं वाक्यं गद्यमिति निगद्यते।
- गद्यकाव्ये काव्यगुणाः, विशिष्टाशैली च दृश्यन्ते। अतः एव 'गद्यं कवीनां निकषं वदन्ति' इति गद्यरचनां प्रशंस्यते।

- किं गद्यमित्यपेक्षायां आचार्य दण्डी कथयति –'अपाद पदसन्तानो गद्यम्' इति।
- गद्यकाव्यं द्विविधं कथा आख्यायिका चेति।
- संस्कृतगद्यसाहित्यजगति प्रथमः भवति सुबन्धु। वासवदत्तानामक एकमेव ग्रन्थः सुबन्धोः कृतित्वेन प्रसिद्धिम् अवाप। अत्र काव्ये वासवदत्ताकन्दर्पकेतोः अनुरागकथां वर्ण्यति।
- बाणभट्टः सुबन्धोः कथां 'धिया निबद्धेयमतिद्वयी कथा' इति रीत्या स्मरति इत्यतः बाणः सप्तमशतकोत्पन्नः इति, तत पूर्ववर्त्तित्वेन सुबन्धोः षष्ठशतकसपूर्वभागित्वं निर्णयति।
- भारतीय साहित्येषु अतिप्राचीनं कथा समाहारं भवति गुणाढ्यस्य 'बृहत्कथा। 'पैशाची' प्राकृत भाषायां विरचितोऽयं ग्रन्थःभवति बृहत्कथा। गुणाढ्यः तु प्रतिष्ठानपुरस्य राज्ञः सातवाहनस्य सभापण्डितः आसीत्।
- आचार्येण दण्डिना कथायाः उदाहरणत्वेन बृहत्कथा स्मृता वर्तते। 'कथायां सरसं वस्तु गद्यैरेव निबन्ध्यते'।
- संस्कृतगद्यसाहित्यचरित्रे प्रख्यातो भवति बाणबट्टः। पद्यं वद्यं गद्यं हृद्यं इत्युक्तिः बाणस्य गद्यरचनया प्रचलिता स्यात्।
- श्लेषघटनात्मके शब्दगुम्फने रस-अलङ्कार- सदर्थ- कथावर्णनेषु सिद्धहस्तत्वात् पञ्चाननविशेषमण्डितो बभूव बाणबट्टः।
- स्थाणीस्वरस्य श्रीहर्षस्य सभापण्डितोऽयं कविः इति हर्षचरिते कविः प्रस्तौति।
- बाणबट्टेन ग्रन्थद्वयमेव प्रणीतम् हर्षचरितं,कादम्बरी चेति। हर्षचरितं तु बाणेन विरचितं सरसं काव्यं भवति।
- 'ओजः समासभूयस्त्वमेतत् गद्यस्य जीवितम्' इति आलङ्कारिकाणाम् अभिमतं बाणे संघटते। एवमेव कविरयं पाञ्चालीरीतेर्भक्तः।
- व्यञ्जनाप्रयोगेवक्रोक्तेः प्रयोगे च सकलकवि मूर्धन्यत्वेन बाणो विराजते। प्रौढया आलङ्कारिकवर्णनया ग्रथितोऽयं हर्षचरितनामकः ग्रन्थः।
- बाणबट्टेन विरचिता भवति कादम्बरी। अपूर्णस्य अस्य ग्रन्थस्य उत्तरभागः बाणपुत्रेण भूषणभट्टेन विरचितमित्युच्यते।
- 'कादम्बरीरासज्ञाने आहारोऽपि न रोचते' इत्युक्तिः अस्याः कथायाः रसनीयताम् उद्घोषति।
- बाणोच्छिष्टं जगत्सर्वं इत्युक्तिः अन्वर्थमेव इतीयम्रचना साधूकरोति। पाञ्चालीरीत्या गुम्फिते काव्ये व्यञ्जना प्राधान्येन वर्तते वक्रोक्ति विलासः च वर्तते।
- बृहत्कथा पुनराख्येनेषु मुख्यः भवति क्षेमेन्द्रस्य 'बृहत्कथामञ्जरी'। अष्टादशलम्बकेषु

विभक्तं भवति बर्हत्कथामञ्जर्याः कथा।

- अभिनवगुप्तस्य शिष्यो क्षेमेन्द्रः काश्मीराधिपस्य अनन्दस्य आस्थानविद्वानासीत्।
- 'औचित्यविचारचर्चा' , कविकण्ठाभरणंच प्रख्यातौ साहित्यशास्त्रग्रन्थौ।
- सोमदेवविरचित कथासरित्सागरं बृहत्कथायाः काश्मीरीयोऽन्यः पुनराख्यानो भवति।
- अत्र हि अष्टादश लम्बकानि, १२४ तरङ्गाः द्वाविंशतिसहस्रश्लोकाश्च सन्ति।
- आचार्यदिण्ड विरचितत्वेन प्रसिद्धं भवति दसकुमारचरितम्। अवन्तिसुन्दरीकथा इत्येका अन्या कथापि तस्यैव कृतित्वेन प्रसिद्धाभवति।
- दशकुमारचरितस्य पूर्वपीठिका, दशकुमारचरितं, उत्तरपीठिका चेति भागत्रययं विद्यते मगधराजकुमारस्य राजवाहनस्य तन्मन्त्रिणां नवानां च देशवीशेषघतनानुभवानां मनोहरवर्णनमत्र दृश्यते।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. संस्कृतगद्यसाहित्यजगति प्रथम: गद्यकारः कः?
2. सुबन्धोः कृतित्वेन प्रसिद्धिं प्रापितः ग्रन्थः कः?
3. बृहत्कथामञ्जरी केन विरचितं भवति ?
4. कथासरित्सागरस्य कर्ता कः ?
5. भारतीयसाहित्येषु अतिप्राचीनं कथासमाहारं किं भवति?
6. गुणाढ्यस्य 'बृहत्कथा' कस्यां भाषायां विरचितम्?
7. पञ्चाननविशेषमण्डितो गद्यसाहित्यकारः कः?
8. कादम्बर्याः आधारग्रन्थः कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. किं नाम गद्यम्?
2. संस्कृतगद्यशैल्याः विशेषता काः?
3. दण्डिनः मते गद्यं नाम किम् ?
4. गद्यकाव्यं कतिविधा: भवन्ति? ते च के?
5. दण्डिनः गद्यकाव्ये के ?
6. सुबन्धोः वासवदत्ता नामकस्य गद्यकाव्यस्य प्रतिपाद्यविषयः कः?

7. बाणबट्टस्य इतरकृतित्वेन मन्यमानाः कृतयः के?
8. संस्कृतसाहित्ये कथायाः प्रकारद्वयं किमासीत् ?
9. कादम्बर्याः नायकः कः? नायिका का?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. बाणबट्टस्य गद्यकृतित्वेन प्रथितौ ग्रन्थौ कौ?
2. सुबन्धुः।
3. कादम्बरी।
4. हर्षचरितम्।
5. बृहत्कथामञ्जरी।

## निर्दिष्टाभ्यासः (Assignment)

1. बृहत्कथा- गुणाढ्यः।
2. संस्कृतगद्यसाहित्ये गद्यसाहित्यं अधिकृत्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. सुबन्धु।
2. वासवदत्ता।
3. क्षेमेन्द्रेण।
4. सोमदेवः।
5. गुणाढ्यस्य 'बृहत्कथा'।
6. 'पैशाची'
7. बाणबट्टः।
8. गुणाढ्यस्य 'बृहत्कथा'।

## सूचनाग्रन्थाः(References)


1. आचार्य लोकमणि दाहालः, संस्कृतसाहित्यतिहासः, कृष्णदास अकादमि, वारणसि।

2. A history of Sanskrit literature: A B Keith
3. Indian Kavya literature: A K Warder
4. Samskrita Saahityacharitram: Dr. K Kunjunniraja & Dr. M S Menon
5. Samskrita Saahityacharitram, Acharya sree Ramachandra Misra.

SGOU

# Unit - 4
# सन्देशकाव्यानि

## उद्देश्यानि (Learning Outcomes)

- सन्देशकाव्यसाहित्यपरिज्ञानम्।
- सन्देशकाव्यानि अधिकृत्य ज्ञानं लभते।
- सन्देशकाव्यस्य वैशिष्ट्यज्ञानं लभते।

## प्राग्व्यपेक्षाः (Pre requisites)

संस्कृतसाहित्ये बहुविधैः काव्यैः विभूषितं विलसति। सर्वप्रथमं काव्यं द्विधा भवति दृश्यं श्रव्येति। दृश्यकाव्यानि तानि कथ्यन्ते यानि द्रष्टुं योग्यानि भवन्ति। यथा अभिज्ञान-शाकुन्तलादीनि। श्रव्यकाव्यानि च तानि उच्यन्ते यानि श्रोतुं योग्यानि भवन्ति। यथा-रघुवंशादीनि। श्रव्यानि पुनः गद्य-पद्य चम्प्यात्मना त्रिधा विभक्तानि सन्ति। छन्दसा उपनिबद्धानि पद्यानि, छन्दोरहितानि गद्यानि तदुभयरूपाणि गद्यपद्यमिश्राणि चम्पूकाव्यानीति व्याह्रियन्ते। तत्र पद्यकाव्यानि पुनः महाकाव्यानि, खण्डकाव्यानि चेति रचनावैलक्षण्यात् विभक्तानि वर्तन्ते।

खण्डकाव्येषु च भक्तिप्रधानानि स्तोत्रकाव्यानि, शृङ्गारप्रधानानि सन्देशकाव्यानि च विलसन्ति। मेघदूतादीनि गेयानि संदेशकाव्यानि एवाधुनिकैः गीतिकाव्यानि कथ्यन्ते। सन्देशकाव्यानि एकपटनामाश्रित्य शृङ्गाररसाभिव्यञ्जकतया लिखितानि भवन्ति। अस्मिन् भागे संस्कृत साहित्ये प्रख्यातानि सन्देशकाव्यानि पठिष्यति।

## मुख्यपदानि (Key terms)

सन्देशकाव्यानि, मेघसन्दशं - कालिदासः, घटकर्परकाव्यं, घटकर्परः, पवनदूतं, धोयीकवीन्द्रः, हंससन्देशः, वेदान्तदेशिकः।

## DISCUSSION

### 4.1.1. सन्देशकाव्यानि

संस्कृतसाहित्ये अतिप्राचीना भवति दूतकाव्यानि। भामहाभिप्राये –

अयुक्तिमद्यथा दूता जलभृन्मारुतेन्दवः ।
तथा भ्रमर हारीतचक्रवाकशुकादयः ।।
अवाचोऽयुक्तवाचश्च दूरदेशाविचारिणः।
कथंदूत्यं प्रपद्येरन् इति युक्त्या न युज्यते।।

पुरातनकालेषु अधुनाधुनकालेव पत्रप्रेषणव्यवस्था नासीत्। विप्रलंबेन वियोगिनः दूरे स्थीयमानाः अवस्थां द्योतयन्सन्देशं प्रेषितुं मेघ-वायु-चन्द्र- काक-शुक-परावतान् आश्रितवन्तः। तैः साकं वार्तालापं कृत्वा ते स्वमनः तेषां कृतवन्तः आसन्। विरहिजनानां मनोव्यथां कवयः चमत्कारिण्या वाचा काव्यात्मकतया अवतरन्ति। सन्देशकाव्यं अथवा दूतकाव्यं इति खण्डकाव्यप्रस्थानस्य उपज्ञाता भवति महाकवि कालिदासः। कालिदासस्य मेघसन्देशं भवति लक्षणोपेतं प्राक्तन सन्देशकाव्यम्। 'सन्देशकाव्यं एकमेव तत्तु मेघसन्देशं इतराणि सर्वाण्यपि तस्य अनुकरणानि' इति फो. जोसफ. मुण्डश्शेरीवर्यः प्रकटयति। सन्देशकाव्यप्रस्थानस्य उपस्थापकः कालिदासश्चेदपि तत्पूर्वमेव संस्कृतसाहित्ये दूतकाव्यमुपसृत्य सूचनां मिलन्ति। "इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा" इति हनुमत्सन्देशः रामायणे प्रथितमेव। महाभारते नलोपाख्याने हंससन्देशः एवमेव शुकसन्देशकथादयः प्रामुख्येन प्रचलन्त्येव।

संस्कृत साहित्ये प्रख्यातानि सन्देशकाव्यानि-

- मेघसन्दशं - कालिदासः
- घटकर्परकाव्यं - घटकर्परः
- पवनदूतं - धोयीकवीन्द्रः
- हंससन्देशः – वेदान्तदेशिकः

### 1. मेघसन्दशम्

महाकविकालिदासस्य मनोज्ञतमा कृतिः भवति मेघसन्देशम्। मानवहृदयव्यथां समग्रतया चित्रीकृतेऽस्मिन् काव्येप्राकृतिकवस्तुना सह संबद्धं मानवहृदयं तथा कल्पितभावनया चित्रितं व्यथां च कविः अवतरति। काव्यात्मकतया वाग्धोरण्या वैकारिकभावेन च संपन्नेऽस्मिन् काव्ये प्रत्येकमपि श्लोकानि मौक्तिकानीव गुंफितानि भवन्ति। मन्दाक्रान्ताछन्दसि निबन्ध्यमानत्वात् भावपूर्तिश्च पूर्णतां याति। क्षेमेन्द्रेण उक्तं च ।

सुयशा कालिदासस्य मन्दाक्रान्ता विराजते।
सदश्वदमकस्येव काम्बोजतुरगाङ्गना ।।इति।

मेघसन्देशस्य प्रमुखाः टीकाग्रन्थाः

- मल्लिनाथटीका (प्राचीना)
- शेषराजरेग्मी (नवीना)

मेघसन्देशस्य पूर्वार्धं उत्तरार्धं चेति भागद्वयं वर्तते। पूर्वार्धे कथासन्दर्भवर्णनं तथा मार्गनिर्देशवर्णनं च प्रतिपादयति। उत्तरार्धे तु प्राप्यमाणं स्थलं, नायिकागृहं, विरहावस्था, सान्त्वनं अभिज्ञादानञ्च वर्णितानि।

प्रियजनविरहेण मानवमनसि सम्भूयमनो द्विग्धता मनोवेदना च मुख्यप्रमेयत्वेन अत्र अवतरति। कुबेरस्य दासः यक्षः अत्र नायकः। कार्यविघ्नकरं यक्षं रामगिरिं प्रेक्ष्य शिक्षयति कुबेरः। कान्ताविरहेण असहमानः यक्षः आषाढस्य प्रथमदिवसे आश्लिष्टसानुं मेघं दृष्ट्वा प्रियतमां सन्देशं प्रेषयितुं अयं समर्थः इति मत्वा तस्य पुरः व्यसनी सन् तस्थौ। ततनन्तरं तं गमनमार्गं, प्रापणीय संकेतं, नायिकास्वरूपं, गृहं, तस्याः अवस्थाः इत्येवं प्रत्येकस्मिन् विवरणात्मिकया प्रस्तौति। अलकापुरी वर्णनया उत्तरमेघस्यारम्भः।

## 2. घटकर्परकाव्यम्

केवलैः द्वाविंशतिश्लोकैः अज्ञातविशेषपरिचयस्य घटकर्परस्य कृतित्वेन गृहीतं सन्देशकाव्यं भवति घटकर्परकाव्यम्। काव्येऽस्मिन् काचित्सद्यपरिणीता विधिवशात् विप्रकृष्टस्थपतिका युवतिः स्वं प्रियं मेघद्वारा सन्देशं प्रेषयति। यमकालङ्कारेण चमत्कृतमिदं काव्यम्। केचित् काव्यमिदं कालिदासकृतित्वेनामनन्ति। तेषां मते मेघदूतमनुकृत्य तत्पूरकत्वेन उपन्यस्तमस्ति। अत्र हि यक्षी यक्षसन्देशं श्रुत्वा मेघद्वारेव स्वसन्देशं यक्षं प्रति प्रेषयति।

## 3. पवनदूतम्

धोयी कवीन्द्रेण विरचितं सन्देशकाव्यं भवति पवनदूतम्। वङ्गेदेशस्य लक्ष्मणसेनाख्यस्य सभाकवित्वेन प्रथितः धोयीकविः १२२६ मितवैक्रमाब्दाभ्यर्णे अङ्गभुवं शशास लक्ष्मणसेनः। तदाश्रितस्य धोयिनः स्थितिकालः ११९०-१२६० मितवैक्रमान्तरकालः इत्यभिप्रयन्ति। काव्येऽस्मिन् काचित् गन्धर्वकन्या पवनद्वारेण लक्ष्मणसेनं प्रणयसन्दशं प्रेषयति। १०४ श्लोकाः सन्ति। राज्ञः जैत्रयात्रवेलायां दर्शनात्प्रभृति तस्मिन् अनुरक्ता नायिका विरहमसहमाना सती पवनद्वारासंदेशं प्रेषयति। ३१ तमैः श्लोकैः मार्गनिर्देशः, १८ श्लोकैः विजयपुरवर्णनं, ७ श्लोकैः राज्ञः वर्णनं च वर्तन्ते।

## 4. हंससन्देशः

काञ्चीपुरनिवासिना वेदान्तदेशिकेन विरचितं सन्देशकाव्यं भवति हंससंदेशम्। कविरयं १३२५- १४२६ मितवैक्रमाब्दान्तरालस्थितः इत्युच्यते। काव्येऽस्मिन् हनुमत्कथिता सीतावृत्तान्तोपवर्णितः। रामः हंसद्वारा सीतां सन्देशं प्रेषयति। दाक्षिणात्यजनपदानां वर्णनं अत्र कृतो विद्यते। ११० श्लोकैः विरचितोयं काव्यग्रन्थः।

कालिदासस्य मेघसन्देशस्य प्रेरणया केरलीयाः कवयः अपि सन्देशकाव्यानि प्रणिनिन्युः। तेषु प्रमुखाः भवन्ति –

- शुकसन्देशः - लक्ष्मिदासः
- कोकिलसन्देशः - उद्दण्डः
- मयूरसन्देशः - ए आर राजराजवर्मा
- हंससन्देशः - पूर्णस्वामी इत्यादयः।

### पुनरावृत्तिः (Recap)

- कालिदासस्य मेघसन्देशं भवति लक्षणोपेतं प्राक्तनसन्देशकाव्यम्।
- 'सन्देशकाव्यं एकमेव तत्तु मेघसन्देशं इतराणि सर्वाण्यपि तस्य अनुकरणानि' इति फो. जोसफ. मुण्डश्शेरिवर्यः प्रकटयति।
- सन्देशकाव्यप्रस्थानस्य उपस्थापकः कालिदासश्चेदपि तत्पूर्वमेव संस्कृतसाहित्ये दूतकाव्यानां सूचनाः मिलन्ति। "इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा" इति हनुमत्सन्देशः रामायणे प्रथितमेव ।
- महाभारते नलोपाख्याने हंससन्देशः एवमेव शुकसन्देशकथादयः प्रामुख्येन प्रचलन्त्येव।
- महाकविकालिदासस्य मनोज्ञतमाकृतिः भवति मेघसन्देशम्। मानव हृदयव्यथां समग्रतया चित्रीकृतेऽस्मिन् काव्ये कल्पितभावनया चित्रितं व्यथां च कविः अवतरति। मन्दाक्रान्ताछन्दसि निबन्ध्यमानत्वात्भावपूर्तिशः वर्तते।
- सर्वेषु सन्देशकाव्येषु 'विप्रलम्बशृङ्गारो अङ्गीरसः' भवति।
- मेघसन्देशस्य पूर्वार्धं उत्तरार्धं चेति भागद्वयं वर्तते। पूर्वार्धे कथासन्दर्भवर्णनं तथा मार्गनिर्देशवर्णनं च प्रतिपादयति। उत्तरार्धे तु प्राप्यमाणं स्थलं, नायिकागृहं, विरहावस्था, सान्त्वनम् अभिज्ञादानञ्च वर्णितानि।
- द्वाविंशतिश्लोकैः अज्ञातविशेषपरिचयस्य घटकर्परस्य कृतित्वेन गृहीतम् सन्देशकाव्यं भवति घटकर्परकाव्यम्।

- यमकालङ्कारेण चमत्कृतमिदं काव्यम्। केचित् काव्यमिदं कालिदासकृतित्वेन आनन्ति।
- अत्र हि यक्षी यक्षसन्देशं श्रुत्वा मेघद्वारैव स्वसन्देशं यक्षं प्रति प्रेषयति।
- धोयीकवीन्द्रेण विरचितं सन्देशकाव्यं भवति पवनदूतम्।
- काव्येस्मिऽन् काचित् गन्धर्वकन्या पवनद्वारेण लक्ष्मणसेनंप्रणयसन्दशं प्रेषयति।
- काञ्चीपुरनिवासिना वेदान्तदेशिकेन विरचितं सन्देशकाव्यं भवति हंससंदेशम्।
- काव्येऽस्मिन् हनुमत्कथिता सीतावृत्तान्तं वर्णितमस्ति। रामः हंसद्वारासन्देशं प्रेषयति।
- कालिदासस्य मेघसन्देशस्य प्रेरणया केरलीयाः कवयः अपि सन्देशकाव्यानि रचिताः।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. महाकविकालिदासप्रणीतं संदेशकाव्यं किं भवति ?
2. मेघसन्देशे अङ्गीरसः कः?
3. मेघदूते कति खण्डाः सन्ति?
4. मेघदूतं कस्मिन् छन्दसि निबद्धं भवति?
5. कोकिलसन्देशस्य कर्ता कः?
6. लक्ष्मिदासकृतित्वेन प्रथितं सन्देशकाव्यं किम्?
7. पवनदूतनाम्ना सन्देशकाव्यं केन विरचितम् ?
8. वेदान्तदेशिकेन विरचितस्य सन्देशकाव्यस्य नाम किं ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. मेघदूते नायकः कः? नायिका का?
2. संस्कृतसाहित्ये प्रख्यातानि सन्देशकाव्यानि कानि ?
3. मेघसन्देशस्य प्रमुखाः टीकाग्रन्थौ कौ ?
4. कालिदासस्य मेघसन्देशस्य प्रेरणया लिखितानां सन्देशकाव्यानां नामानि लिखत।

## एकैकया खण्डिकया उत्तरं लिखत।

**(Answer the question in a paragraph)**

1. मेघसन्देशम् ।
2. हंससन्देशः

## निर्दिष्टाभ्यासः (Assignments)

1. संस्कृतसन्देशकाव्यानि अधिकृत्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1. मेघसन्देशम्।
2. विप्रलम्बशृङ्गारः।
3. द्वौ(पूर्व, उत्तर)।
4. मन्दाक्रान्ता।
5. उद्दण्डः।
6. शुकसन्देशः।
7. धोयी कवीन्द्रः।
8. हंससंदेशम्।

## सूचनाग्रन्थाः (References)


1. आचार्य लोकमणि दाहालः, संस्कृतसाहित्यतिहासः, कृष्णदास अकादमि, वारणसि।
2. A history of Sanskrit literature: A B Keith
3. Indian Kavya literature: A K Warder
4. Samskrita Saahityacharitram: Dr. K Kunjunniraja & Dr. M S Menon
5. Samskrita Saahityacharitram, Acharya sree Ramachandra Misra.

BLOCK - 4

# स्तोत्रकाव्यानि, चम्पूकाव्यानि च

# Unit -1
# स्तोत्रकाव्यशाखा

## उद्देश्यानि (Learning Outcomes)

- स्तोत्रशब्दस्य उत्पत्तिम् अर्थं च जानाति
- स्तोत्रकाव्यसाहित्यपरिज्ञानम्।
- स्तोत्रकाव्यस्यविभागपरिज्ञानं लभते।
- स्तोत्रकाव्यस्यवैशिष्ट्यज्ञानं लभते।

## प्राग्व्यपेक्षाः (Pre requisites)

संस्कृतभाषा विश्वस्य प्राचीनतमासु भाषासु अन्यतमा अस्ति। अस्यां भाषायां निबद्धं साहित्यं भृशं विपुलमस्ति। कलाविज्ञाने स्तेत्रकाव्यम् अधिकृत्य भाषायामस्यां सङ्ख्यातीताः ग्रन्थाः प्रणीताः। सर्वासां कलानां सर्वेषां विज्ञानानां च एकस्यामेव भाषायामनुशीलनाय दर्शनाय वा भाषेयमवश्यमेव पठनीया। या कला संस्कृतभाषायामस्ति सा सर्वत्र विश्वस्य सर्वासु भाषासु अस्ति। या कला संस्कृतभाषायां नास्ति सा क्वचिन्नास्ति इति नार्थवादोऽपितु तथ्यवादोऽस्ति। सर्वेषां ज्ञानानां शिल्पानां सर्वासां विद्यानां कलानाञ्च संस्कृतभाषायामेकत्र कमनीयनिरुपणमस्ति। अत्र भौतिकाभ्युन्नतये प्रेयःशास्त्रम् आध्यात्मिकाभ्युन्नतये च श्रेयःशास्त्रमित्युभयविधशास्त्रं विरचितमस्ति। पराविद्या अपराविद्येत्युभयोर्विधयोः संस्कृतभाषायामेकत्र वर्णनमस्ति। अस्यां देववाण्यां मानवहृङ्गतां सर्वेषां भावानां मञ्जुलाभिव्यक्तिर्दृश्यते। देववाण्यां विरचितं भावप्रवणसाहित्यं काव्यकोटिमधिरोहति। भावप्रवणकाव्येषु देवादिविषयकरतिभावनिर्भरं काव्यसाहित्यं स्तोत्रकाव्यसाहित्यमिति अभिधीयते।

**मुख्यपदानि (Key terms)**

स्तुतिमूलका मन्त्राः, सर्वप्रथमं स्तोत्रकाव्यं, मुक्तकशैल्यां, स्तोत्रसाहित्यं षड्उपभेदेषु विभक्तम्, भक्तिकाव्यसाहित्यम्, विष्णुस्तुतिमूलकाः मन्त्राः, रुद्रस्तुतिमूलका मन्त्राः, शक्त्यधिष्ठातृदेवता, सूर्यादिदेवानधिकृत्य प्रणीतानि स्तोत्राणि, सहस्रनामस्तोत्राणि।

**DISCUSSION**

### 4.1.1. स्तोत्रव्युत्पत्तिः अर्थश्च

संस्कृतस्तोत्रसाहित्यम् अतीव विशालः सरसः तथा हृदयस्पर्शि च वर्तते। बहु प्राचीनकालादेव अस्मकं क्रान्तदर्शिनः कवयः एतादृशानि महत्त्वपूर्णानि काव्यानि विरचयन्तः सन्ति। प्रत्येकधर्मे उपासकाः स्वहृदयस्य भावनामाराध्यदेवस्य समीपे प्रकाशयन्ति। वस्तुतः स्तोत्रशब्दः संस्कृतस्य 'ष्टु' धातोः निष्पन्नः सन् नपुंसकलिंगे प्रयुज्यते। स्तूयतेऽनेनेति स्तोत्रम्। गुणकर्मादिनां प्रशंसाय स्तोत्रशब्दस्य प्रयोगः दृश्यते। यथा 'स्तवे गुणकर्मादिभिः प्रशंसने'। तथैव अमरसिंहस्य नामलिंगानुशासने गुणकर्मादिनां प्रशंसा स्तुतिः, स्तवनार्थे स्तोत्रमित्यस्य ग्रहणं भवति इत्युक्तम्।

### 4.1.2. स्तोत्रस्योत्पत्तिः

आचार्यमनुना मनुस्मुतौ उक्तं यत् 'स सर्वोऽभितो वेदे सर्वज्ञाममयो हि सः'(मनुस्मृति) अर्थात् वेदे एव सर्वमस्ति। अतः स्तोत्रस्योत्पत्तिः वेदे अभवत्। ऋग्वेदे वहुलत्र स्तोत्रप्रयोगः अस्ति। वेदेऽस्मिन् ऋषयः अग्नि-इन्द्र-वरुण-रुद्रप्रभृतीनां देवानां स्वेष्टप्राप्तये स्तवनं कृतवन्तः। तथैव लौकिकसंस्कृतसाहित्ये स्तोत्रप्रयोगस्य वैपुलतां दृश्यते। आदिकविः वाल्मीकिविरचिते रामायणे वर्णितं गङ्गास्तवनं आदित्यहृदयस्तोत्रं च अतीव प्रसिद्धे।

लौकिकालानन्तरं कवयः अनेकानि सुप्रसिद्धानि स्तोत्रकाव्यानि रचितानि सन्ति। यथा पुष्पदन्तस्य शिवमहिम्नस्तोत्रम्, मयूरभट्टस्य सूर्यशतकम्, बाणभट्टस्य चण्डीशतकम्, शङ्कराचार्यस्य शिवापराधक्षमापणस्तोत्रम्, देव्यपराधक्षमापणस्तोत्रम्, चर्पटपञ्चरिकास्तोत्रम्, आनन्दलहरी, अम्बाष्टकम्।

### 4.1.3. स्तोत्रकाव्यम्

स्तोत्रम् इत्येषः शब्दः स्तुतिः, प्रशंसा, श्लाघनम् इत्याद्यर्थेषु प्रयुज्यते। मानवः सर्वशक्तस्य परमात्मनः अनुग्रहप्राप्त्यै तं स्तुवन्ति। देवेन सह भक्तस्य व्यवहारमाध्यमम् एव स्तोत्रम्। भगवतः माहात्म्य श्लाघमानः स्वस्य हृदयस्य असीमां भक्तिम् स्तोत्रद्वारा निवेदयति। मातुः प्रेम्णः प्राप्त्यै शिशुः कदाचित् हसति, रोदिति, नृत्यति, निन्दति ताडयति च। भक्तः अपि देवेन सह एवमेव व्यवहरति। भावाभिव्यञ्जनाद् एव स्तोत्राणि मनोमोहनानि भवन्ति। सङ्गीतयोजनेन तु तद्भवति चेतोहारि। नृत्यमपि संयोज्यते चेत् तद्भवेत् सर्वजनतोषकम्। चञ्चलमनसः एकाग्रतासम्पादनाय स्तोत्रकाव्यं भवति सर्वसमर्थम्। इदं भारतीयजीवनपद्धतेः अविभाज्यम् अङ्गम्। स्तोत्रसाहित्यस्य आरम्भः तु संहिताकाले एव। ऋक्संहिता स्तोत्ररूपा। प्रभुसम्मिता, मित्रसम्मिता कान्तासम्मिला एतेषु त्रिषु अपि प्रकारेषु स्तोत्रसाहित्यम् उपलभ्यते। संस्कृतकाव्यानाम् आदौ अन्ते च स्तोत्राणि दृश्यन्ते। कालिदास-भारवि-माघ-भवभूति-भासादीनां कृतिषु विद्यमानानि स्तोत्राणि सन्ति हृद्यानि। शुद्धभक्तेः उद्गाराः सर्वे काव्ये न अन्तर्भवन्ति। अष्टोत्तरशत -अष्टोत्तरसहस्रनामानि भक्तिव्यञ्जकानि। बाण -मयूर -शङ्कराचार्यादिभिः रचितानि स्तोत्राणि काव्यधर्मयुक्तानि एव।

### 4.1.4. संस्कृते स्तोत्रसाहित्यम्

देववाण्यां स्तोत्रकाव्यप्रणयनस्य परमप्राचीनापरम्परा विद्यते। इयं परम्परा इदानीमपि निस्सृता वर्तते। अत्र तथ्यमिदमवधेयं यत् समस्तपरवर्त्तिप्रवृत्तीनां मूलं वेदेषु उपलभ्यते। अतः स्तोत्रकाव्यस्यापि प्रेरणा वेदेभ्य एवं सम्प्राप्ता  इति प्रतिभाति। ऋग्वेदे विभिन्नदेवस्तुतिमूलका मन्त्राः सङ्गृहीताः। स्तुतिमूलकत्वात् एते मन्त्राः स्तोत्रकाव्यस्थानीयाः। एवं संस्कृतसाहित्यस्य सर्वप्रथमं स्तोत्रकाव्यं ऋग्वेद एवास्ति। ऋग्वेदारब्धा स्तोत्रकाव्यप्रणयनस्येयं परम्परा विभिन्नदेवीदेवस्तुतीः क्रोडीकुर्वती विशालस्तोत्रसाहित्यं प्रास्तौत्। संस्कृतकाव्यसाहित्यस्य विविधविधासु स्तोत्रकाव्यविधा विशालतमं साहित्यं क्रोडीकरोति। मुक्तकशैल्यां विरचितमिदं स्तोत्रकाव्यसाहित्यं भक्तिभावनायाः प्राधान्यात् भक्तिकाव्यसाहित्यं स्तुतिमूलकतया स्तोत्रकाव्यसाहित्यं धार्मिकभावनासम्पृक्ततया च धार्मिककाव्यसाहित्यमिति नानाभिधानैरभिधीयते। समासेन संस्कृतस्तोत्रसाहित्यं प्राचीनं तथा विशालतया भावप्रवणतया च सर्वानन्यान् काव्यभेदान् अतिशेते।

### 4.1.5. संस्कृतस्तोत्रसाहित्यविभागः

स्थूलरूपेण संस्कृतस्तोत्रसाहित्यं वैदिकवैदिकेतरभेदाभ्यां द्विधा भवति। अर्थात् प्रथमं वेदमूलकस्तोत्रसाहित्यम् आस्तिकस्तोत्रसाहित्यं वा द्वितीयञ्च वैदिकेतरस्तोत्रकाव्यसाहित्यं

नास्तिकस्तोत्रसाहित्यं वा। आस्तिकस्तोत्रसाहित्यं पुनः वैष्णवशैवशाक्तप्रकीर्णभेदैः चतुर्धा भवति नास्तिकस्तोत्रसाहित्यं च जैनबौद्धभेदाभ्यां द्विधा भवति। एवं सम्पूर्ण स्तोत्रसाहित्यं षडुपभेदेषु विभक्तम् । तद्यथा -

1. वैष्णवस्तोत्रसाहित्यम्
2. शैवस्तोत्रसाहित्यम्
3. शाक्तस्तोत्रसाहित्यम्
4. प्रकीर्णस्तोत्रसाहित्यम्
5. जैनस्तोत्रसाहित्यम्
6. बौद्धस्तोत्रसाहित्यञ्च

एते सर्वे स्तोत्रसाहित्यभेदाः समुदितरूपेण भक्तिकाव्यसाहित्यव्यपदेशेन व्यपदिश्यन्ते। अत्र एतेषां सर्वेषां स्तोत्र विभागानां साहित्यस्य समानेन विवरणं प्रस्तूयते।

**वैष्णवस्तोत्रसाहित्यम्**

विष्णुस्तवनस्य परम्परा वैदिककालादेव प्रचलति। ऋग्वेदगतविष्णुसूक्ते विष्णुस्तुतिमूलकाः मन्त्राः सन्ति। पुराणसाहित्ये विष्णुविषयकाः विविधाः स्तुतयः प्राप्यन्ते। लौकिकसंस्कृतसाहित्ये स्तोत्रकाव्यानां यद्बाहुल्यं वैविध्यं वा दृश्यते। तत्सर्वं पुराणसाहित्यमेवाश्रित्य प्रपञ्चितमस्ति। वस्तुतो विष्णोः विविधावतारसम्बन्धीवृत्तमेव प्रस्तुतमस्ति पुराणेषु। एवमेव रामायणमहाभारतयोरपि विष्णुस्तवनस्य परम्परा अक्षुण्णा दृश्यते। परवर्तिकाले विष्णुस्तवनस्य स्वतन्त्रपरम्परा प्रचलिता जाता। अस्यां परम्परायां ये स्तोत्रग्रन्थाः प्रणीताः तेषां समष्टिरेव वैष्णवस्तोत्रसाहित्यम् इत्यभिधीयते।

**शैवस्तोत्रसाहित्यम्**

विष्णुस्तवनपरम्परेव शिवस्तवनपरम्परा अपि वैदिककालादेव प्रचलति। ऋग्वेदगतरुद्रसूक्ते रुद्रस्तुतिमूलका मन्त्राः सन्ति। पौराणिकसाहित्येऽपि शिवस्तवनस्य परम्परा दृश्यते। परवर्तिकाले शिवस्तवनस्य पृथक् परम्परायां जातायां बहूनि शिवस्तोत्राणि विरचितानि सन्ति। अस्यां परम्परायां ये स्तोत्रग्रन्थाः प्रणीताः तेषां समुदायः एव शैवस्तोत्रसाहित्यम् इत्यभिधीयते।

**शाक्तस्तोत्रसाहित्यम्**

शक्तिस्तवनस्य परम्परा वैदिककालादेव प्रचलति। ऋग्वेदगतोषस्सूक्तेषु वाक्सूक्तेषु अन्येषु चैवंविधसूक्तेषु शक्तिस्तवनस्य मूलं प्राप्यते। वस्तुतः प्रकृतिपूजनेन शक्तिस्तवनपरिपाटी प्राचालीत्। परवर्तिकाले शक्त्यधिष्ठातृदेवतायाः स्तवनस्य स्वतन्त्रपरम्परा प्रचलिता अभूत्

सायणेन शक्तिस्थानीयाः अभिमानिदेवताः स्वीकृताः तद्यथा तेनोक्तम्- 'ओषध्यादिमन्द्रेषु अपि चेतना एत तत्तदभिमानिदेवताः तेन तेन नाम्ना सम्बोध्यन्ते' ऋग्वेदभाष्यभूमिकायाम् इदमेव तथ्यं भगवता बादरायणेन सूत्रेऽमुस्मिन् सङ्केतितम् -

'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् । (ब्रह्मसूत्रे 2.1.15)

**प्रकीर्णस्तोत्रसाहित्यम्**

सूर्यादिदेवानधिकृत्य प्रणीतानि स्तोत्राणि प्रकीर्णस्तोत्रसाहित्ये गृह्यन्ते। एवमेव अनेकस्तोत्रकाव्यानि गङ्गाप्रभृतिनदीः अधिकृत्य रचितानि सन्ति। अन्यानि कानिचित् स्तोत्राण्यपि प्राप्यन्ते।

**जैनस्तोत्रसाहित्यम्**

आस्तिकनास्तिकभेदाभ्यां पूर्वं स्तोत्रसाहित्यं द्विधोपविभक्तम्। तत्र नास्तिकस्तोत्रसाहित्ये जैनस्तोत्रकाव्यानां बौद्धस्तोत्रकाव्यानां च परिगणनं क्रियते। बहवः जैनकवयः संस्कृतभाषायां स्तोत्रकाव्यानि विरचितवन्तः। एतेषु स्तोत्रेषु जैनतीर्थङ्कराणां भक्तिरसनिर्भराः स्तुतयः निबद्धाः सन्ति। आत्मनिवेदनोपेतभक्तिभावाभिव्यञ्जने जैनस्तोत्रकाराः निपुणाः सन्ति।

**बौद्धस्तोत्रसाहित्यम्**

नास्तिकस्तोत्रसाहित्ये बौद्धस्तोत्राणामपि परिगणनं क्रियते। बहवः बौद्धकवयः संस्कृतभाषायां स्तोत्रकाव्यानि विरचितवन्तः। एतेषु स्तोत्रेषु भगवतस्तथागतस्य भक्तिरसनिर्भराः स्तुतयो निबद्धाः सन्ति।

संस्कृतभाषायां शतनामकीर्तनव्याजेन सहस्रनामकीर्तनव्याजेन वा अपि स्तोत्रप्रणयनस्य परम्परा दृश्यते। अस्यां परम्परायां बहूनि सहस्रनामस्तोत्राणि प्रथितानि सन्ति। तद्यथा महाभारतगतं विष्णुसहस्रनामस्तोत्रम् नारदपञ्चरात्रोक्तं श्रीविष्णुसहस्रनामस्तोत्रम् देवीसहस्रनामस्तोत्रम् ललितासहस्रनामस्तोत्रम् त्रिपुरसुन्दरीसहस्रनामस्तोत्रम् च। सहस्रनामस्तोत्रतुल्यं संस्कृतसाहित्ये शतनामस्तोत्रस्य अष्टोत्तरशतनामस्तोत्रस्य वा प्रणयनपरम्परा दृश्यते।

### 4.1.6. संस्कृतस्तोत्रसाहित्यवैशिष्ट्यानि

संस्कृतभाषायां लिखितं निखिलस्तोत्रसाहित्यं मुक्तकशैल्यां रचितमस्ति। एतेषु स्तोत्रेषु सर्वत्र कवेः स्तोतुः वा भक्तिभावस्य व्यञ्जना भवति। येन सर्वत्र देवादिविषयिका रतिः व्यज्यते। यत्र स्तोत्रे इयं देवादिविषयिकारतिः प्राधान्येन व्यञ्जिता भवति तत्र सर्वत्र भावध्वनिः पदं लभते। यत्र च देवादिविषयिकारतिः गुणीभूताभवति तत्र सर्वत्र गुणीभूतव्यङ्ग्यध्वनिभेदः पदं

लभते। एवं सर्वाणि स्तोत्रकाव्यानि उत्कृष्टकाव्यनिदर्शनानि भवन्ति। पण्डितराजजगन्नाथः स्तोत्रकाव्यानि भावध्वनेरुदाहरणत्वेन निर्दिशति।

## पुनरावृत्तिः (Recap)

- स्तोत्रम् इत्येषः शब्दः स्तुतिः, प्रशंसा श्लाघनम् इत्याद्यर्थेषु प्रयुज्यते।
- देवेन सह भक्तस्य व्यवहारमाध्यमम् एव स्तोत्रम्।
- स्तोत्रसाहित्यस्य आरम्भः तु संहिताकाले एव।
- संस्कृतसाहित्यस्य सर्वप्रथमं स्तोत्रकाव्यं ऋग्वेद एवास्ति।
- संस्कृतकाव्यसाहित्यस्य विविधविधासु स्तोत्रकाव्यविधा विशालतमं साहित्यं क्रोडीकरोति।
- सम्पूर्ण स्तोत्रसाहित्यं षडुपभेदेषु विभक्तम्।
- ऋग्वेदगतविष्णुसूक्ते विष्णुस्तुतिमूलकाः मन्त्राः सन्ति।
- ऋग्वेदगतरुद्रसूक्ते रुद्रस्तुतिमूलका मन्त्राः सन्ति।
- ऋग्वेदगतोषस्सूक्तेषु वाक्सूक्तेषु अन्येषु चैवंविधसूक्तेषु शक्तिस्तवनस्य मूलं प्राप्यते।
- सूर्यादिदेवानधिकृत्य प्रणीतानि स्तोत्राणि प्र कीर्णस्तोत्रसाहित्येन गृह्यन्ते।
- आस्तिकनास्तिकभेदाभ्यां स्तोत्रसाहित्यं द्विधोपविभक्तम्।
- नास्तिकस्तोत्रसाहित्ये बौद्धस्तोत्राणामपि परिगणनं क्रियते।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. देवेन सह भक्तस्य व्यवहारमाध्यमम् किम् ?
2. संस्कृतसाहित्यस्य सर्वप्रथमं स्तोत्रकाव्यं किम् ?
3. सम्पूर्ण स्तोत्रसाहित्यं कति उपभेदेषु विभक्तम् ?
4. रुद्रस्तुतिमूलका मन्त्राः कस्मिन् स्तोत्रसाहित्ये अन्तर्भवति?
5. सूर्यादिदेवानधिकृत्य प्रणीतानि स्तोत्राणि कस्मिन् साहित्ये अन्तर्भवन्ति?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. स्तोत्रम् इत्येषः शब्दः किमर्थे प्रयुज्यते ?
2. स्तोत्रसाहित्यं द्विधोपविभक्तम्। के ?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. संस्कृतकाव्यसाहित्यस्य विविधविधासु वर्तमानानि स्तोत्रकाव्यानि।
2. वैष्णवस्तोत्रसाहित्यम्।

## निर्दिष्टाभ्यासः (Assignment)

1. संस्कृतसाहित्ये स्तोत्रकाव्यानि।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. स्तोत्रम्।
2. ऋग्वेदः।
3. षट्।
4. शैवस्तोत्रसाहित्यम्।
5. प्रकीर्णस्तोत्रसाहित्यम्

## सूचनाग्रन्थाः(References)


1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन्, वाराणसी।
3. संस्कृतसाहित्येतिहासः। आचार्य लोकमणि दाहलः। कृष्णदास अक्कादमि, वाराणसि।
4. संस्कृतनिबद्ध नवनीतम्। डॉ. पारसनाथद्विवेदि। श्रीराम मेहरा एण्ड कम्पनी, आग्रा।

# Unit - 2
# प्रसिद्धस्तोत्रकाव्यानि

## उद्देश्यानि (Learning Outcomes)

- स्तोत्रकाव्यसाहित्यं परिचाययति।
- प्रमुखाः स्तोत्रकारान् परिचाययति।
- केरलीयानां प्रमुखस्तोत्रकाराणां परिचयं सम्पादयति।।

## प्राग्व्यपेक्षाः (Pre requisites)

संस्कृतसाहित्ये अतिविशालं स्तोत्रसाहित्यं विद्यते। साम्प्रतमपि बहूनि स्तोत्रकाव्यानि प्रणीयन्ते। स्तोत्रेषु धर्म-मत-भक्ति-साहित्यानि युक्तानि सन्ति। इदं धर्मसाहित्यम्, इदं मतसाहित्यम् इति वर्गीकरणम् अशक्यम्। ब्राह्मण-जैन-बौद्ध-शैव-प्रभृतिभिः निर्मितानि स्तोत्राणि द्वैताद्वैतमतानुगुणं रचितानि स्तोत्राणि च उपलभ्यन्ते। लीलाशुकस्य कृष्णकर्णामृतम्, जयदेवस्य गीतगोविन्दं च प्रेमभरितानि स्तोत्राणि। शतकरूपाणि स्तोत्राणि अपि उपलभ्यन्ते।

## मुख्यपदानि (Key terms)

मयूरभट्टविरचितं सूर्यशतकम्, दुर्गायाः भव्यस्तुतिः, तत्त्वज्ञानम्, आलवन्दारः, लक्ष्म्याः विविधाः स्तुतयः, केरलीयः प्रमुखस्तोत्रकाराः, विविधसाहित्यगतप्रधानस्तोत्राणि।

## Discussion

### 4.2.1. प्रमुखाः स्तोत्रकाराः

**1. मयूरभट्टः –**

एषः काशीवासी, हर्षराजाश्रितः। स्वकुष्ठनिवारणाय सूर्यशतकं रचितम्। मयूरभट्टविरचितं सूर्यशतकाख्यं स्तोत्रं संस्कृतस्तोत्रकाव्येषु महनीयं स्थानं भजते। कलापक्षस्य प्राधान्येऽपि अत्र भावपक्षस्य सम्यगभिव्यञ्जना भवति। अत्रालङ्काराणां प्राचुर्येण विनियोगो विहितोऽस्ति।

स्रग्धरावृत्ते इदं प्रथमम् एव काव्यम्। दीर्घसमासयुक्तम् अनुप्रासप्रचुरं सविस्तरं सूर्यवर्णनम् अत्र विद्यते।

**2. बाणभट्टः -** चण्डीशतकम्

महाकविबाणभट्टेन विरचितमिदं स्तोत्रं शाक्तस्तोत्रेषु महनीयस्थानं भजते। अनुप्रासयुक्ता रचना। स्रग्धरावृत्ते निबद्धं स्तोत्रमिदं भगवत्याः दुर्गायाः भव्यस्तुतिं प्रस्तौति। अलङ्काराणां प्राधान्यात् काव्यमिदम् अलङ्कृतमार्गस्य रचना कथ्यते। भावपक्षापेक्षया अत्र भाषापक्षस्य कलापक्षस्य वा प्राधान्यं दृश्यते।

**3. उत्पलदेवः –**

काश्मीरीयः शैवाचार्यः। शिवस्तोत्ररत्नावली रचिता। तस्यां २१ स्तोत्राणि सन्ति। इदं स्तोत्रं शैवस्तोत्रेषु अन्यतमं स्थानं दधाति। सर्वेषु स्तोत्रेषु भगवतः शङ्करस्यागणितगुणाः रुचिरभाषायां गीताः।

**4. जगद्धरभट्टः -** स्तुतिकुसुमाञ्जलिः

अयं ग्रन्थः अष्टात्रिंशत्स्तोत्राणां सङ्ग्रहोऽस्ति। एतेषां स्तोत्राणां प्रणेता जगद्धरभट्टोऽस्ति। सः शैवाचार्यः। सम्पूर्णसङ्ग्रहे पञ्चदशोत्तरचतुर्दशशतपद्यानि सन्ति। करुणरसाप्लुतानि पद्यानि सहृदयहृदयाह्लादनाय पूर्णशक्तानि। स्तोत्रेऽस्मिन् कलापक्षभावपक्षेत्युभयोः परिपाकः दृश्यते। एतस्मादेव कारणात् शिवस्तोत्रेषु अस्य महत्वपूर्णं स्थानमस्ति। अत्र सर्वत्रात्मनिवेदनस्य प्राधान्यं प्राप्यते।

**5. पुष्पदन्तः -** शिवमहिम्नस्तोत्रम्

शिवस्तोत्रेषु शिवमहिम्नस्तोत्रम् प्राचीनतमं स्तोत्रराजत्वेन प्रसिद्धम्। अस्य प्रणेतृविषये विसंवादो दृश्यते। केचन विद्वांसः इयं पुष्पदन्तस्य रचना इति स्वीकुर्वन्ति केचन च कुमारिलभट्टस्य। स्तोत्रेऽस्मिन् चत्वारिंशत्पद्यानि प्राप्यन्ते। परन्तु तेषु द्वात्रिंशत्पद्यानामेव मौलिकता स्वीक्रियते विद्वद्भिः। स्तोत्रगतपद्यानि कमनीयतया सहृदयहृदयावर्जने पूर्णशक्तानि। अस्य स्तोत्रस्य विषये इयमुक्तिः प्रथिता अस्ति 'महेशान्नापरो देवो महिम्नो नापरा स्तुतिः।" लोकप्रियम् इदं स्तोत्रम्। कव्यं तथा तत्त्वज्ञानम् इति एतयोः मेलः अत्र विद्यते।

**6. बुधकौशिकः –**

अयं ऋषिः। रामरक्षास्तोत्रम् अनेन विरचितम्। तत्र स्तुतिः ध्यानं तथा कवचं च अस्ति।

**7. यामुनाचार्यः –**

आलवन्दारस्तोत्रम् अनेन कृतम्। यामुनाचार्यस्य अपराभिधानमासीत् 'आलवन्दारः'। येनास्य स्तोत्रस्य आलवन्दारस्तोत्रमिति नाम प्रथितम्। प्रपत्तिप्रणतिनिवेदनात्मविस्मरण प्रभृतिविषयाः अत्र कमनीयभाषायां वर्णिताः सन्ति। भावस्य भाषायाः चेत्युभयोः मञ्जुलसमन्वयोऽत्र विहितोऽस्ति।

**8. जगन्नाथः-**

करुणालहरी, गङ्गालहरी, अमृतलहरी तथा लक्ष्मीलहरी इति एतानि स्तोत्राणि जगन्नाथेन अनेन कृतानि।

करुणालहरीस्तोत्रम् – इदं स्तोत्रं भगवतश्चरणारविन्दयोः प्रणतिपराणि पद्यानि क्रोडीकृतानि भवन्ति। स्तोत्रेऽस्मिन् षष्टिपद्यानि सन्ति। भाषाभावोभयदृष्टिभ्यां काव्यमिदं प्रकृष्टमस्ति।

गङ्गालहरी - अत्र शिखरिणीवृत्तनिबद्धेषु द्विपञ्चाशत्पद्येषु भगवत्याः भागीरथ्याः रमणीयाः स्तुतयः निबद्धाः सन्ति।

अमृतलहरी - अत्र दशपद्येषु यमुनायाः स्तुतयो निबद्धाः सन्ति।

लक्ष्मीलहरीस्तोत्रम् - अत्र एकचत्वारिंशत्पद्येषु शिखरिणीछन्दोबद्धेषु भगवत्याः लक्ष्म्याः विविधाः स्तुतयः प्रणीताः सन्ति।

### 4.2.2. केरलीयाः प्रमुखस्तोत्रकाराः

**1. कुलशेखरवर्मा - मुकुन्दमाला (विष्णुस्तोत्रम्)**

अस्य स्तोत्रकाव्यस्य प्रणेता कुलशेखरोऽस्ति। वैष्णवस्तोत्रेषु स्तोत्रमिदं शिरोमणिरिवास्ति। स्तोत्रकाव्येऽस्मिन् द्विचत्वारिंशदधिकत्रिशतपद्यानि सन्ति। सर्वषु पद्येषु विष्णुविषयकरतिभावाभिव्यक्तिहेतोः भावध्वनिः विराजते। प्रणतिदैन्यशरणागति प्रभृतिविषयाः अत्र काव्यविषयीकृताः।

**2. मेल्पत्तूर नारायणभट्टतिरि –** नारायणीयम्।

नारायणभट्टविरचितं स्तोत्रमिदं मुख्यतया कृष्णस्तुतिं प्रस्तौति। स्तुतिमुखेन समस्तकृष्णचरितम् वर्णितमस्ति। अस्मिन् स्तोत्रे षड्त्रिंशदधिकसहस्रपद्यानि सन्ति। प्रसादगुणोपेतं काव्यमिदं सरलभाषायां निबद्धमस्ति।

**3. लीलाशुकः (बिल्वमङ्गलः) – श्रीकृष्णस्तोत्रम्।**

कृष्णकर्णामृतस्तोत्रकाव्यं लीलाशुककविना प्रणीतमस्ति। काव्येऽस्मिन् कृष्णस्य विविधाः बाललीलाः कमनीयभाषायां निबद्धाः। कविः कृष्णं प्रियतमरूपेणोपासते। येनात्र माधुर्यभक्तिः विराजते। स्तोत्रस्यास्य द्विधा पाठः प्रचलितोऽस्ति । दक्षिणात्यपाठे त्रय आश्वासाः त्रिशतपद्यानि च सन्ति। बङ्गपाठे एक आश्वासः द्वादशोत्तरशतपद्यानि च सन्ति।

**4. शङ्कराचार्यः –**

(8 centuryA.D.) सौन्दर्यलहरी (पार्वतीस्तोत्रं), शिवानन्दलहरी (शिवस्तोत्रं), कनकधारास्तवम् (लक्ष्मीस्तोत्रं)। स्तोत्रकाराणाम् अयं मुकुटमणिः। प्रायशः 200 स्तोत्राणि अनेन रचितानि। दार्शनिकजगति अद्वैतमतस्थापना कृता तथा व्यावहारिकजगति सगुणोपासनापराणि स्तोत्राणि विरचितानि। अस्य स्तोत्रेषु कारुण्यं, भक्तिः, वैराग्यम् उत्कण्ठा, उपतापः, मार्दवं, नादमाधुर्य, प्रसादः इत्येते भावाः पदे पदे दृश्यन्ते। सुभाषितानि अपि बहुत्र दृश्यन्ते यथा कुपुत्रो जायेत क्वचिदपि कुमाता न भवति। सौन्दर्यलहरीनामकं स्तोत्रं तु साहित्य-मन्त्रशास्त्र-तत्त्वज्ञानानां सङ्ङ्गमरूपम्।

**वैष्णवसाहित्यगतप्रधानस्तोत्राणि**

**1. पादुकासहस्रस्तोत्रम्**

पादुकासहस्रस्तोत्रकाव्यस्य प्रणेता वेदान्तदेशिकः। सोऽयं अनेकस्तोत्रकाव्यानां रचनाकारः भवति। भगवतः रङ्गनाथस्य पादुकायाः प्रशस्तौ निबद्धमिदं स्तोत्रं द्वात्रिंशतपद्धतिषु विभक्तमस्ति। अत्रत्यपद्यानि सरसाणि भक्तिस्निग्धानि च सन्ति। अलङ्काराणामपि विनियोगोऽत्र समुचितरूपेण कृतोऽस्ति। वेदान्तदेशिकस्यान्यानि अपि प्रमुखस्तोत्रकाव्यानि सन्ति।

**2. लक्ष्मीसहस्रस्तोत्रम्**

वेङ्कटाध्वरिणा रचितः ग्रन्थः भवति लक्ष्मीसहस्रस्तोत्रम्। भगवतः विष्णोः भगवत्याः लक्ष्म्याः च स्तुतिपरमिदम्। अस्मिन् लक्ष्म्याः प्रत्यङ्गवर्णनं कृतमस्ति। अत्रालङ्काराणां विनियोगः भावानां वैभवः भाषायाः चमत्कारः च अवलोकनीयाः। एवं सर्वाभिः दृष्टिभिः कमनीयमिदं स्तोत्रकाव्यम्।

**3. रामशतकम्**

विष्णववतारिणो रामस्य वृत्तमधिकृत्य प्रणीतमिदं स्तोत्रशतकं सोमेश्वरस्य रचना अस्ति। इदं स्तोत्रमतिस्वाभाविकशैल्यां विरचितमस्ति। भक्तिभावभरितमिदं काव्यं स्रग्धराछन्दसि निबद्धमस्ति। अत्रत्यपद्यानि कमनीयकाव्यलक्षणोपेतानि सन्ति।

**4. जानकीचरणचामरस्तोत्रम्**

श्रीनिवासाचार्यप्रणीतं जानकीचरणचामरस्तोत्रम् अलङ्कृतशैल्या रचितं प्रौढकाव्यमस्ति। अस्मिन् स्तोत्रे शिखरिणीछन्दसि निबद्धानि एकादशोत्तरशतपद्यानि सन्ति। अत्र भगवत्याः सीतायाः चरणयोः प्रशस्तस्तुतिः प्रस्तुता अस्ति।

**5. आनन्दमन्दाकिनीस्तोत्रम्**

मधुसूदनसरस्वतीप्रणीतमिदम् आनन्दमन्दाकिनी नामकं स्तोत्रं भगवतो विष्णोः स्वरूपस्य प्रशस्तिपरं स्निग्धवर्णनं प्रस्तौति। अस्मिन् स्तोत्रे द्वाधिकशतपद्यानि सन्ति। काव्येऽस्मिन् भक्तिभावस्य पदे पदे सहजा अभिव्यक्तिर्भवति। भाषायाः लालित्यं माधुर्यगुणोद्दीपने शक्तं दृश्यते।

**6. वरदराजस्तवः**

वेदान्तदेशिकस्य वरदराजपञ्चाशत्स्तोत्रेण प्रभावितो भूत्वा अप्पयदीक्षितः वरदराजस्तवाख्यं स्तोत्रं प्रणीतवान्। अस्मिन् स्तोत्रे भगवतो वरदराजस्य स्तुतयो निबद्धाः। षडुत्तरशतपद्यात्मकेऽस्मिन् कमनीयभाषायां भगवतः स्वरूपं वर्णितमस्ति।

**शैवस्तोत्रसाहित्यगतप्रधानस्तोत्राणि**

**1. परशम्भुमहिम्नस्तवः**

स्तोत्रमिदं दुर्वाससो मुनेः रचना मन्यते। त्रयोदशप्रकरणेषु विभक्तमिदं स्तोत्रं गम्भीरार्थप्रकाशकं तान्त्रिकतथ्यबहुलञ्च अस्ति। काव्यात्मकवैशिष्ट्यदृष्ट्या स्तोत्रमिदं नातिमहत्त्वपूर्णम् ।

**2. शिवस्तोत्रावली**

उत्पलदेवविरचितमिदं स्तोत्रं शैवस्तोत्रेषु अन्यतमं स्थानं दधाति। अत्र एकविंशतिस्तोत्राणां सङ्ग्रहः कृतोऽस्ति। सर्वेषु स्त्रोतेषु भगवतः शङ्करस्यागणितगुणाः रुचिरभाषायां गीताः।

**3. अभिनवगुप्तस्य स्तोत्राणि**

अभिनवगुप्तः बहूनि शिवस्तोत्रकाव्यानि विरचितवान्। तेषु कानिचित्प्राप्यानि कानिचित् अप्राप्यानि च सन्ति। एतानि क्रमस्तोत्र, देहस्थदेवताचक्रस्तोत्र, भैरवस्तोत्र, देवीस्तोत्रविवरण, शिवशक्त्यविनाभावस्तोत्र, प्रकरणस्तोत्राणि च सन्ति। एतेषां स्तोत्राणां सरसपदसमाश्रयेण गंभीरभावसम्प्रेषणं च प्रधानवैशिष्ट्यं वर्तते।

**4. अर्द्धनारीश्वरस्तोत्रम्**

इदं स्तोत्रं कल्हणेन प्रणीतमस्ति। अत्र अष्टादशपद्यानि सन्ति। एतेषु पद्येषु उमाशङ्करयोः सम्पृक्तविग्रहस्य रमणीयवर्णनमस्ति।

**5. शिवस्तुतिः**

नारायणपण्डितस्य रचनेयं शिवस्तुतिः। अस्यां त्रयोदशपद्यानि सन्ति। एतेषु पद्येषु ललितभाषायां शिवस्य स्तुतयः निबद्धाः सन्ति।

**6. ईश्वरशतकम्**

ईश्वरशतकम् स्तोत्रमवतारकवेः रचना अस्ति। स्तोत्रगतपद्यानि चित्रकाव्यस्य वैशिष्ट्यं दधति। एवं विचित्रमार्गसमाश्रयेण रचितानि पद्यानि क्लिष्टानि जातानि तथापि भक्तिभावप्रेषणदृष्ट्या स्तोत्रमिदं महत्त्वपूर्णमस्ति।

**शाक्यस्तोत्रसाहित्यगतप्रधानस्तोत्राणि**

शक्त्यधिष्ठातृदेवतानां विविधतया परवर्तिकाले विविधाभिधानाभिहिताः शक्तयः स्तुत्या अभवन्। चण्डीदेवी, त्रिपुरसुन्दरी, लक्ष्मीप्रभृत्यभिधानैः सा शक्तिः पुराणतन्त्रशाक्तोपनिषत् शाक्तस्तोत्रेषु स्तूयते। संस्कृतसाहित्ये शाक्तस्तोत्राणाम् अतिसमुन्नता परम्परा दृश्यते। अस्यां परम्परायां प्रतिनिधिभूतानि प्रधानस्तोत्राणि अत्र प्रस्तूयन्ते।

**1. देवीशतकम्**

ध्वनिप्रस्थानप्रतिष्ठापकेन आनन्दवर्धनेन विरचितमिदं स्तोत्रं चित्रशैल्यां निबद्धमस्ति। अत्र नानाबन्धनिबन्धने दत्तचितः दृश्यते आनन्दवर्धनः। शब्दचमत्कारस्य प्राधान्यं सर्वत्र विराजते। तथापि भक्तिभावनायाः प्रबलतया स्तोत्रेषु अस्य विशिष्टमहत्त्वमस्ति।

**2. त्रिपुरसुन्दरीमहिम्नस्तोत्रम्**

इदं स्तोत्रमपि दुर्वाससः रचना अस्ति। आर्यावृत्तनिबद्धानि अष्टपञ्चाशत्पद्यानि सन्ति।

**3. पञ्चस्तवः**

पञ्चस्तवे नाम स्तोत्रसङ्ग्रहेऽस्मिन् पञ्चस्तोत्राणि सन्ति। एतानि कालिदासाख्येन केनचित् कविना प्रणीतानि सन्ति। पञ्चस्तवेगतपञ्चस्तोत्रेषु एकविंशतिपद्यात्मिका लघुस्तुतिः, एकविंशतिपद्यात्मकः घटस्तवः त्रयोविंशतिपद्यात्मिका चर्चास्तुतिः द्वात्रिंशत्पद्यात्मिका अम्बास्तुतिः पञ्चत्रिंशत् पद्यात्मकश्च सकलजननीस्तवः च सन्ति। एतानि सर्वाणि स्तोत्राणि भाषाभावोभाभ्यां दृष्टिभ्यां सौन्दर्यपूर्णानि। केचन विद्वांसः एतानि शङ्कराचार्यप्रणीतानि इति स्वीकुर्वते।

**प्रकीर्णस्तोत्रसाहित्यगतप्रधानस्तोत्राणि**

**1. सुधालहरी**

पण्डितराजजगन्नाथविरचितमिदं स्तोत्रं सूर्यस्तवनं प्रस्तौति। स्तोत्रेऽस्मिन् स्रग्धरावृत्ते निबद्धानि त्रिंशत्पद्यानि सन्ति । अत्र प्रौढभाषायां भगवतः सूर्यस्य स्तुतयः विहिताः सन्ति।

**2. श्यामलादण्डकम्**

इयं रचना कालिदासनाम्नः कस्यचित् कवेः अस्ति। अत्र पञ्चदण्डकाः सन्ति येषु मातङ्गीदेव्याः रम्यस्तवनं कृतमस्ति।अत्रत्यपद्यानां साहित्यिकसौन्दर्यमुत्कृष्टमस्ति।

**जैनस्तोत्रसाहित्यगतप्रधानस्तोत्राणि**

**1. कल्याणमन्दिरस्तोत्रम्**

कुमुदचन्द्राख्यकविना प्रणीतमिदं स्तोत्रं चतुश्चत्वारिंशत्पद्यात्मकमस्ति। इदं स्तोत्रं भक्तामरस्तोत्रप्रभावितं प्रतिभाति। स्तोत्रेऽस्मिन् जैनतीर्थङ्कराणां स्तुतिर्विद्यते।

**2. समन्तभद्रस्य स्तोत्राणि**

समन्तभद्रेण जिनस्तुत्यां बहूनि स्तोत्राणि विरचितानि। वस्तुतः सर्वप्रथमं संस्कृतभाषायां समन्तभद्रः एव स्तोत्राणि विरचितवान्। तस्य चत्वारि स्तोत्रकाव्यानि प्रथितानि सन्ति। त्रिचत्वारिंशदधिकशतपद्यात्मके स्वयम्भूस्तोत्रे चतुर्विंशतितीर्थङ्कराणां स्तुतयो निबद्धाः सन्ति। सर्वत्र पद्येषु भक्तिरसस्य मार्मिकाभिव्यक्तिः कृता अस्ति। चतुर्दशाधिकशतपद्यात्मके देवागमस्तोत्रे मञ्जुलभावाभिव्यक्तिर्दृश्यते। चतुष्षष्टिपद्यात्मके युक्त्यनुशासनस्तोत्रे पद्येषु सर्वत्रार्थगौरवरूपवैशिष्ट्यं विराजते। षोडशाधिकशतपद्यात्मके जिनशतकस्तोत्रे चित्रकाव्यशैल्यां पद्यानि विरचितानि सन्ति। अस्मिन् स्तोत्रकाव्ये कलापक्षस्य प्राधान्यमस्ति।

### 3. विषापहारस्तोत्रम्

इदं स्तोत्रं धनञ्जयाख्यकवेः रचना अस्ति। स्तोत्रेऽस्मिन् चत्वारिंशत्पद्यानि सन्ति। एतेषु ललितभाषायां जिनस्तुतयो निबद्धाः सन्ति।

### 4. जिनशतकम्

इदं स्तोत्रं जम्बूकवेः रचना अस्ति। शतपद्यात्मके स्तोत्रेऽस्मिन् स्रग्धरावृत्ते निबद्धानि पद्यानि प्रौढभाषायां रचितानि सन्ति। अत्र कविः भावध्वन्यभिव्यक्तौ पूर्णसमर्थः दृश्यते।

## बौद्धस्तोत्रसाहित्यगतप्रधानस्तोत्राणि

### 1. गण्डीस्तोत्रम्

इदं स्तोत्रं महाकवेरश्वघोषस्य रचना अस्ति। अस्मिन् स्तोत्रे स्रग्धरावृत्ते निबद्धानि एकोनत्रिंशत्पद्यानि सन्ति। अत्र भगवतस्तथागतस्य बौद्धमठेषु व्यवहृतघण्टायाश्च स्तुतयः निबद्धाः सन्ति।

### 2. हर्षवर्धनस्य स्तोत्रे

हर्षवर्धनस्य द्वे स्तोत्रे प्रथिते स्तः। ते च सुप्रभातस्तोत्रम् अष्टमहाश्रीचैत्यस्तोत्रञ्च उभयस्तोत्रगतपद्यानि भावनिर्भराणि सन्ति।

### 3. स्रग्धरास्तोत्रम्

सर्वज्ञमित्रविरचितमिदं स्तोत्रं तारादेव्याः स्तुतौ निबद्धमस्ति।

एवं समासेनात्र संस्कृतस्तोत्रसाहित्यस्य विवरणं प्रदत्तम्। संस्कृतभाषायां स्तोत्रकाव्यप्रणयनस्य परिपाटी साम्प्रतमपि प्रचलति। येन बहूनि स्तोत्रकाव्यानि आधुनिकसमयेऽपि प्रणीतानि प्रणीयन्ते च।

## पुनरावृत्तिः (Recap)

- संस्कृतसाहित्ये अतिविशालं स्तोत्रसाहित्यं विद्यते। साम्प्रतमपि बहूनि स्तोत्रकाव्यानि प्रणीयन्ते।
- मयूरभट्टः स्वकुष्ठनिवारणाय सूर्यशतकं रचितम्।
- महाकविबाणभट्टेन विरचितं चण्डीशतकस्तोत्रं शाक्तस्तोत्रेषु महनीयस्थानं भजते।
- शैवाचार्यः उत्पलदेवस्य स्तोत्रकाव्यं शिवस्तोत्ररत्नावली।

- मुकुन्दमालास्तोत्रकाव्यस्य प्रणेता कुलशेखरोऽस्ति।
- नारायणभट्टविरचितं नारायणीयस्तोत्रं मुख्यतया कृष्णस्तुतिं प्रस्तौति।
- श्रीकृष्णकर्णामृतस्तोत्रकाव्यं लीलाशुककविना प्रणीतमस्ति।
- शङ्कराराचार्यस्य त्रीणि प्रमुखस्तोत्राणि। तानि - सौन्दर्यलहरी (पार्वतीस्तोत्रं), शिवानन्दलहरी (शिवस्तोत्रं), कनकधारास्तवम् (लक्ष्मीस्तोत्रं)।
- ब्राह्मण-जैन-बौद्ध-शैव-प्रभृतिभिः निर्मितानि स्तोत्राणि द्वैताद्वैतमतानुगुणं रचितानि।
- भगवतः रङ्गनाथस्य पादुकायाः प्रशस्तौ निबद्धमिदं स्तोत्रं द्वात्रिंशतपद्धतिषु विभक्तमस्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. सूर्यशतकस्य कर्ता कः ?
2. शाक्तस्तोत्रेषु महनीयस्थानं भजते चण्डीशतकस्य लेखकः कः?
3. शैवाचार्यः उत्पलदेवस्य स्तोत्रकाव्यं किम् ?
4. कुलशेखरवर्मणा विरचितं स्तोत्रकाव्यं किम् ?
5. लीलाशुककविना प्रणीतं स्तोत्रकाव्यं किम् ?
6. स्रग्धरास्तोत्रस्य कर्ता कः ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. शङ्कराचार्यस्य त्रीणि प्रमुखस्तोकाव्यानि कानि ?
2. हर्षवर्धनस्य द्वे स्तोत्रे प्रथिते स्तः। के ?

## एकैकया खण्डिकया उत्तरं लिखत।

**(Answer the following questions in a paragraph)**

1. जगन्नाथपण्डितः कति स्तोत्राणि रचितानि। कानि च तानि?
2. केरलीयाः प्रमुखस्तोत्रकाराः के ?
3. मुकुन्दमाला
4. नारायणीयम्।

## निर्दिष्टाभ्यासः (Assignment)

1. संस्कृतसाहित्ये प्रसिद्धस्तोत्रकाव्यानि विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. मयूरभट्टः।
2. बाणभट्टः।
3. शिवस्तोत्ररत्नावली।
4. मुकुन्दमाला।
5. श्रीकृष्णकर्णामृतस्तोत्रकाव्यम्।
6. सर्वज्ञमित्रः।

## सूचनाग्रन्थाः(References)


1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन्, वाराणसी।
3. संस्कृतसाहित्येतिहासः। आचार्य लोकमणि दाहलः। कृष्णदास अक्कादमि, वाराणसि।
4. संस्कृतनिबद्ध नवनीतम्। डॉ. पारसनाथद्विवेदि। श्रीराम मेहरा एण्ड कम्पनी, आग्रा।
5. Kerala contribution to Sanskrit Literature, Dr. K.Kunjunni Raja

# Unit - 3
# चम्पूकाव्यलक्षणम्

## उद्देश्यानि (Learning Outcomes)

- चम्पूकाव्यानां परिचयः।
- चम्पूकाव्यलक्षणं जानाति।
- चम्पूकाव्यविकासं जानाति।

## प्राग्व्यपेक्षाः (Pre requisites)

गीर्वाणगिरां वर्णनप्रकरणे चम्पूवाङ्मयस्य विस्मरणं तु खल्वन्याय्यमेव यतः संस्कृतवाङ्मये चम्पूसाहित्यं अतीव प्रशस्तं पदं अलङ्करोति। गद्यपद्ययोः सम्मिश्रेण चम्पूः निबध्यते। चम्पूकाव्ये गद्यपद्ययोः सर्वे गुणाः सम्मिलन्ति। काव्यस्य मनोहारितां ज्ञातुं शक्यते। काव्यरसस्य अर्थमाधुर्यस्य च सङ्गमत्वं चम्पूकाव्ये दृश्यते।

## मुख्यपदानि (Key terms)

काव्यस्य भेदद्वयं, गद्यकाव्यगतं रसगौरवं, पद्यकाव्यगतमर्थगौरवं, गद्यपद्यपोभयस्वरूपं, चम्पूलक्षणम्, गद्यपद्यमयी वाणी, जातकमाला।

## DISCUSSION

### 1.3.1. चम्पूकाव्यम्

सामान्यतः काव्यस्य भेदद्वयं दृश्यं श्रव्यञ्चेति। श्रव्यकाव्यमपि द्विप्रकारम् गद्यकाव्यं पद्यकाव्यञ्चेति। स्वीययाऽर्थप्रधानतया गद्यकाव्यं गौरवशालि, यतो हि पद्यकाव्यं कियतांशेन रागद्वारापि श्रोतृजनमनांस्याकर्षयति, गद्यकाव्यं तु स्वीयेनार्थगौरवेणैव श्रोतृजनहृदयान्यावर्जयेत्। गद्यकाव्यगतं रसगौरवं पद्यकाव्यगतमर्थगौरवपुरस्कृतं रागमयत्वं चेत्युभयं मिलितं सदधिकं चमत्कारं जनयेदिति भावनैव चम्पूकाव्यस्योत्पत्तौ कारणत्वेन सम्भाव्यते। चम्पूरामायणप्रणेता भोजराजोऽपीममेवार्थमाह -

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः

हृद्या हि वाद्यकलया कलितेव गीतिः ।
तस्माद्दधातु कविमार्गजुषां सुखाय
चम्पूप्रबन्धरचनां रसना मदीया ।।

गद्यसम्बन्धेन पद्यानि तथैव आनन्ददायकानि जायन्ते यथा वाद्ययन्त्रैरुपेतानि गानानि । यथा केवलं गायनं न तथा चमत्कारकारी यथा वाद्योपस्कृतं, तथैव केवलं गद्यं न तथा चमत्कारकारी तथा पद्यमिश्रमिति भावयित्वैव कवयः चम्पूकाव्यान्यसृजन्।

यस्मिन् काव्ये गद्यानि सन्ति पद्यानि अपि सन्ति तद् गद्यपद्योभयात्मकं काव्यम्। तदेव चम्पूः इति पदेन उच्यते। गद्यकाव्यगतम् अर्थगौरवं पद्यकाव्यगतम् पुरस्कृतं रागमयत्वं चेत्युभयं मिलितं सदधिकं चमत्कारं जनयति चम्पूकाव्यम्।

### 1.3.2. चम्पूलक्षणम्

गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते ।।
(काव्यादर्शः - दण्डी, प्रथमपरिच्छेदम्-32)

गद्यपद्यपोभयस्वरूपं काव्यं चम्पूकाव्यं भवति। सर्वप्रथममाचार्यो दण्डी 'गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते' इति चम्पूलक्षणमुक्तवान्। तदनन्तरभाविनोऽपि आचार्यः तदेव अन्ववदन्। 'गद्यपद्यमयं काव्यं चम्पूः' इति तल्लक्षणे वाणीस्थाने काव्यपदनिवेशेऽपि न कापि नवीनता -

क्वचिदत्र भवेदार्या क्वचिद् वक्त्रापवक्त्रके ।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनम् ।।

इति लक्षणानुसारेण कथा आख्यायिकयोः अपि गद्यपद्यमिश्रितत्वेन चम्पूलक्षणप्रसक्तिस्तु न शङ्कनीया, तयोः गद्यस्यैव प्राधान्यात्, लक्षणानुरोधेनैव कतिपयपद्यानां तयोः प्रवेशाच्च।

चम्पूकाव्येषु तु गद्यपद्ययोः समानभागः भवति किमपि एकमङ्गम् अतिपृथुलं न जायेत इत्यस्मिन् अंशे कवयः सतर्काः तिष्ठन्ति।

गद्यपद्योभयस्वरूपं काव्यं चम्पूकाव्यम्। चम्पूकाव्ये सामान्यकथनं तु गद्येनैव कथ्यते किन्तु विशेषकथनाय पद्यमाश्रियते। काव्यप्रकारोऽयं बहुशः प्रचलितः सम्मानितश्च दृश्यते विद्वत्समाजे। सामान्यतस्तु गद्यकाव्येऽपि यत्र तत्र पद्यानामपि समावेशस्तु भवत्येव यथा वासवदत्ता-हर्षचरित-कादम्बरी-दशकुमारचरितप्रभृतिग्रन्थेषु। तथापि तेषां चम्पूकाव्ये गणना नैव कृताऽस्ति। अनेन इदमवधेयं यत्केवलं गद्यपद्यमयरचना नैव चम्पूकाव्यत्वम् आप्नोति किन्तु तत्र

गद्यपद्यभागयोः समानभागः अत्यावश्यकः। यत्र हि गद्यं पद्यञ्च यथावश्यकं समानभागव्याप्यत्वेन प्रयुक्तं तदेव काव्यं चम्पूरिति ।

काव्यप्रकारोऽयं कदा वा केन प्रारब्ध इति तु नैव ज्ञातमधुनाऽपि। किन्तु एतावत् तु निश्चितमेवं यद् असौ विक्रमपूर्वकालेऽपि लब्धप्रचार आसीत्। प्रथमं हि अस्य रूपं स्मरति आद्यकाव्यशास्त्राचार्यो भामहः। दण्डी तु - 'गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते' (१/३१) गद्यस्य पद्यस्य च मिश्रितरूपं भवति चम्पूकाव्यम्। संस्कृतसाहित्ये अनेकानि चम्पूकाव्यानि दृश्यन्ते।

**1.3.3. चम्पूकाव्यविकासः**

चम्पूकाव्यं गद्यकाव्यस्यैव परिमार्जितं रूपमिति कथनेन सत्यमुपलभ्यते यद्यपि यजुर्वेदे गद्यपद्ययोर्मिश्रणं उपलभ्यते तथापि नासौ चम्पूप्रकारः। पालीभाषायां वर्तमाना जातकमाला एव चम्पूकाव्यस्यादिमंस्रोत इति वक्तुं शक्यते। हरिषेणस्य प्रयागप्रशस्तौ गद्यपद्यमिश्रणस्य प्राथमिकप्रयोगरूपं गन्तुं शक्यते। यद्यपि जातकमाला हरिषेणस्य प्रयागप्रशस्तिश्च गद्यपद्यमिश्रं प्राग्रूपभूतं शरीरं धारयतस्तथापि चम्पूकाव्येन वास्तविकं दशमशताब्द्यामेव प्रकटितं यदा नलचम्पूः जनिमलभत।

## पुनरावृत्तिः (Recap)

- गद्यपद्यपोभयस्वरूपं काव्यं चम्पूकाव्यं भवति।
- दण्डी 'गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते' इति चम्पूलक्षणमुक्तवान्।
- चम्पूरामायणप्रणेता भोजराजः।
- कथा आख्यायिकयोः अपि गद्यपद्यमिश्रितत्वेन चम्पूलक्षणम्।
- चम्पूकाव्येषु तु गद्यपद्ययोः समानभागः भवति।
- चम्पूकाव्ये सामान्यकथनं तु गद्येनैव कथ्यते किन्तु विशेषकथनाय पद्यमाश्रियते।
- यत्र हि गद्यं पद्यञ्च यथावश्यकं समानभागव्याप्यत्वेन प्रयुक्तं तदेव काव्यं चम्पूरिति ।
- पाली जातकमाला एव चम्पूकाव्यस्यादिमंस्रोत इति वक्तुं शक्यते।
- संस्कृतसाहित्ये अनेकानि चम्पूकाव्यानि दृश्यन्ते।
- चम्पूकाव्येन वास्तविकं दशमशताब्द्यामेव प्रकटितं नलचम्पूः जनिमलभत।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. गद्यपद्यमयं काव्यं किं भवति ?
2. 'गद्यपद्यमयी काचिच्चम्पूरित्यभिधीयते' इदं लक्षणं कः कृतवान्?
3. भोजराजकृतं चम्पूकाव्यं किमस्ति ?
4. चम्पूसाहित्यस्याऽदिमो ग्रन्थः कः?

## एकैकया खण्डिकया उत्तरं लिखत। (Answer the following questions in a paragraph)

1. चम्पूकाव्यलक्षणं लिखत।

## निर्दिष्टाभ्यासः (Assignment)

1. चम्पूकाव्यम् अधिकृत्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. चम्पूकाव्यम्।
2. दण्डी।
3. रामायणचम्पू।
4. नलचम्पू।

## सूचनाग्रन्थाः(References)


1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।

2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन्, वाराणसी।

3. संस्कृतसाहित्येतिहासः। आचार्य लोकमणि दाहलः। कृष्णदास अक्कादमि, वाराणसि।

4. संस्कृतनिबद्ध नवनीतम्। डॉ. पारसनाथद्विवेदि। श्रीराम मेहरा एण्ड कम्पनी, आग्रा।


SGOU

# Unit - 4
# प्रसिद्धचम्पूकाव्यानि

## उद्देश्यानि (Learning Outcomes)

- चम्पूसाहित्यकारान् परिचाययति।
- प्रसिद्धानां चम्पूकाव्यानां परिचयः।
- चम्पूकाव्यानां काव्यसुभगतां जानाति।

## प्राग्व्यपेक्षाः (Pre requisites)

संस्कृतसाहित्ये अनेकानि चम्पूकाव्यानि दृश्यन्ते। चम्पूकाव्यस्य स्वतन्त्रग्रन्थरूपेण त्रिविक्रमभट्टस्य नलचम्पूरेव प्रथममुदेति। ततश्च सोमप्रभसूरेः यशस्तिलकचम्पूः, हरिश्चन्द्रस्य जीवन्धरचम्पूः, भोजस्य रामायणचम्पूश्च केचन प्राचीनाश्चम्पूग्रन्थाः। एवमेव भागवतं महाभारतश्चाश्रित्याऽप्यनेके चम्पूग्रन्ताः प्रणीताः सन्ति। एवमेव वरदाम्बिकापरिणयचम्पूः, नीलकण्ठविजयचम्पूः, विश्वगुणादर्शचम्पूः, मुक्ताचरित्रचम्पूः, आनन्दवृन्दावनचम्पूः, गोपालचम्पूः, अवन्तिसुन्दरीकथाचम्पूः, पारिजातहरणचम्पूः, वेङ्कटेशचम्पूः, धर्मविजयचम्पूः, शङ्करचेतोविलासचम्पूः, गङ्गावतरणचम्पूः, रामचन्द्रचम्पूः, आनन्दचम्पूः, सुदर्शनचम्पूः, सिन्देविजयविलासचम्पूः, द्रौपदीपरिणयचम्पूः, इत्याद्याः सन्ति प्रकाशिता अप्रकाशिताश्च सार्धद्विशताधिकश्च चम्पूग्रन्थाः। अथैतेषु कतिपयेषां चम्पूग्रन्थानां परिचयोऽत्रोपस्थाप्यते।

## मुख्यपदानि (Key terms)

नलदमयन्ती कथा, उच्छवासः, धारानगरीशो भोजः, जैनजीबन्धरनामक मुनिः, राष्ट्रकूटस्य राज्ञः, द्वादश स्तबकेषु।

## DISCUSSION



SGOU

### 4.4.1. त्रिविक्रमभट्टः – नलचम्पूः

त्रिविक्रमभट्टेन विरचितं नलचम्पू संस्कृतसाहित्ये प्रथम चम्पूग्रन्थः भवति। त्रिविक्रमो हि शाण्डिल्यगोत्रस्य श्रीधराऽऽख्यस्य पौत्रो देवादित्यस्य पुत्रः ९७२ मितवैक्रमाब्दमभितः स्थितिमान् ।

तत्र नलदमयन्ती कथा उपवर्णितास्ति। अतः नलचम्प्वाः अपरनाम दमयन्तीकथा। अयं ग्रन्थः असंपूर्णः ग्रन्थः भवति। अयं काव्यं सप्त उच्छ्वासेषु विभक्तं भवति। यत्र हि आर्यावर्तवर्णनमारभ्य नलदमयन्तीपरिणयपर्यन्ता कथा वर्णिताऽस्ति। एकदाऽस्य पिता कार्यवशाद्दूरदेशं गत आसीत्। तदैव कश्चिदपरः पण्डितस्तं तत्रागत्य शास्त्रार्थाय समाहूतवान्। स तु भीतभीतः सरस्वतीमस्तौषीत्। साऽपि तत्पितृप्रत्यागमनपर्यन्तं तज्जिह्वावासं स्वीकृतवती। ततः शास्त्रार्थे तं पण्डितं पराजित्य गृहं प्रत्यागत्य ग्रन्थमिमं लिखितुमारब्धवान्। एतदन्तरे हि तत्पिता प्रत्यागतो गृहम्। ततो भारती तं त्यक्तवती येन ग्रन्थोऽपूर्ण एव संवृत्तः।

अस्मिन् ग्रन्थे अर्थालङ्कारापेक्षया शब्दालङ्कारस्यैव प्राधान्यं दृश्यते। तथाऽपि अस्य वाणी सरसा रमणीयार्थचमत्कारपूर्णा च। यथोक्तम्।

प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविलक्षणाः ।
भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः ॥

वस्तुतस्तु तस्य कृतिः सदूषणाऽपि निर्दोषा सखराऽपि सुकोमला विद्यते रामायणीय कथेव। श्लेषस्य दुर्बोधत्वं स्वीकुर्वन् कविः स्वयमेव कथयति - वाचः काठिन्यमायान्ति भङ्गश्लेषविशेषतः।

अस्य काव्ये  शृङ्गारस्य सुन्दरः परिपाको वर्णनस्य माधुर्यं कल्पनाया मनोज्ञता च समन्विता दृश्यन्ते। समालोचकैस्त्रिविक्रमस्य कतिचित् त्रुटयोऽपि इङ्गिताः सन्ति। यासु पाण्डित्यप्रदर्शनार्थं कथावस्त्वनपेक्षा, रसपरिपाकापेक्षया शाब्दक्रीडायाः प्राधान्यं, कलाप्राबल्येन भावपक्षस्योपेक्षा, कथाविकासे गतिशीलतायाः स्वाभाविकसञ्चाराभावः, श्लेषपरिसङ्ख्यादीनां श्रमसाध्यता, कथाया अकाण्डे एव विच्छित्तिरित्यादि ।

नलचम्पूमधिकृत्य सन्ति प्रसिद्धाः अनेकाष्टीकाः यासु चण्डपालकृता विषमपदप्रकाशा गुणविनयगणिकृता वृत्तिः (१६५० वै०) दामोदरी टीका, नागदेवी, बृहट्टीका, विवृतिटीका, नन्दकिशोरस्य भावबोधिनी च ज्ञाताः काश्चन प्राचीनाः शेषराजशर्मणश्चन्द्रकला च नवीनासु ज्ञाता।

अस्यैव ग्रन्थान्तरं मदालसाचम्पूः। अयमेव कुवलयाश्वचरितसंज्ञकोऽपि। काव्यमिदं कुवलयाश्वमदालसयोः प्रेमकथावर्णनपरम्। नलचम्प्वपेक्षया ग्रन्थोऽयं न्यूनश्रेणीकः। तथापि काव्यस्यास्य सुन्दरता रसवत्ता च प्रशस्या विद्यते। ग्रन्थस्यास्यैका टीका लभ्यते कस्यापि । ग्रन्थोऽयं कवेः प्रथमैव कृतिर्दृश्यते । कथानकञ्च मार्कण्डेयपुराणाद् गृहीतं प्रतिभाति।

**4.4.2. अनन्तभट्टः - भारतचम्पूः**

अनन्तभट्टप्रणीतभारतचम्पूः महाभारतमाश्रित्य प्रणीतो द्वादश स्तबकेषु विभक्तो ग्रन्थः। एवं हि १६६० मितवैक्रमाब्दमभितः स्थितिमान् नारायणभट्टः स्मरतीति तस्य स्थितिकालः १५५० मितवैक्रमाब्दमभिमतोऽनुमितः। अस्यैव भागवतचम्पूरपि श्रूयते। अस्योपरि नारायणसूरेष्टीका लभ्यते मुद्रिता।

**4.4.3. भोजदेवः - चम्पूरामायणम्**

चम्पूरामायणं हि चम्पूग्रन्थेषु सर्वोत्कृष्टकाव्यम्। अस्य प्रणेता १०६२-१११११ मितवैक्रमाब्दानभितः स्थितिमान् परमारवंशीयो धारानगरीशो भोजः स्मृतः। किन्तु ग्रन्थे न कुत्रापि प्रणेतृनाम दत्तमस्ति। तथैव प्रतिकाण्डपुष्पिकावाक्ये 'श्रीविदर्भराजविरचिते चम्पूरामायणे' इत्युल्लिखितं दृश्यते। ग्रन्थस्यास्य प्रणेता भोजाऽऽख्या इति तु 'भोजेन तेन रचितामपि पूरयिष्यन्' इति युद्धकाण्डगतलक्ष्मणभट्टपद्याज्ज्ञायते। किन्तु कोऽसौ भोजः कतमोऽयमिति तु सम्प्रत्यपि अनिर्णीतमेव, ग्रन्थपुष्पिकावाक्यात्तु अस्य प्रणेता कश्चित् विदर्भराजो दृश्यते। विदर्भेषु राजानो हि भोजशब्देन व्यपदिश्यन्ते प्राचीनकालादेव। यथा 'भोजेन दूतो राघवे विसृष्टः' इति रघुवंशेऽपि। धारानगरीशः परमारवंशीयः सिन्धुराजपुत्रोऽपि भोजशब्देन व्यपदिश्यते। भारतीया हि परम्परा तु धारानगरीशभोजमेव ग्रन्थस्यास्य प्रणेतृत्वेन गृह्णाति। अपरञ्च, भोजप्रबन्धादावपि स एव विद्वन्मूर्धन्यत्वेन गृहीतोऽस्ति । सम्भवति केनापि लिपिकारेण भोजं हि वैदर्भं मत्वा तथाविधं पुष्पिकावाक्यं पश्चात्संयोजितं स्यात्। ग्रन्थगौरवदृष्ट्या त्वयं ग्रन्थो धारानरेशस्यैव भवितुमर्हति। ग्रन्थस्यास्याद्यानि पञ्च काण्डानि भोजप्रणीतानि युद्धकाण्डं तु लक्ष्मणभट्टनाम्ना विदुषा प्रणीय पूरितम्। तथैव वेङ्कटराजाख्येन कविना उत्तरकाण्डमपि विरच्य पूरितमिति कथ्यते।

भोजदेवेन विरचितं चम्पूरामायणं चम्पूग्रन्थेषु सर्वोत्कृष्टं भवति। अतिसुन्दरवर्णना वैशिष्ट्ये ललितपदप्रयोगेन च अयं ग्रन्थः सुप्रसिद्धं भवति। रामायणकथा अस्य ग्रन्थस्य इतिवृत्तम्।

ग्रन्थेऽस्मिन् वैदर्भी रीति सर्वातिशयित्वेन विलसति। वर्णनेऽत्र प्रयुक्ता कल्पना नितान्तोच्चकोटिका। अत्र हि अनुप्रासस्योपमायाश्च वैचित्र्यं कुमारदासं स्मारयति। अस्योत्प्रेक्षाऽपि निभालनीया।

**4.4.4. हरिचन्द्रः - जीवन्धरचम्पूः**

हरिचन्द्रेण विरचितं अयं जीवन्धरचम्पूः, कश्चित् जैनजीबन्धरनामकमुनेः चरितमाश्रित्य प्रणीतं भवति। ग्रन्थोऽयं गुणभद्रेण हि ९०७ मितवैक्रमाब्दमभितः सङ्कलितमुत्तरपुराणमुपजीवति। तेन अस्य प्रणयनकालो वैक्रमदशमशतकोत्तरार्द्धमभितोऽनुमितः। एवं तु स्पष्टमेव यदसौ भट्टारहरिचन्द्राद्, यं हि बाणभट्टोऽपि सादरं स्मरति, भिन्न एव किन्तु सम्प्रत्यपि नैतत्स्पष्टं यदसौ हि शर्मधर्माभ्युदयकाव्यस्य प्रणेता एष वा तद्भिन्न इति। असौ हि माघं बाणभट्टञ्च सुस्पष्टमेव अनुकरोति भावभाषादिकमधिकृत्य।

**4.4.5. सोमदेवः - यशस्तिलकचम्पूः**

सोमदेवन विरचितं भवति यशस्तिलकनामा चम्पूग्रन्थः। स हि राष्ट्रकूटस्य राज्ञः कृष्णदेवराजापराभिधानस्य तृतीयकृष्णस्य सभापण्डितः आसीत्। अस्य काव्यस्य रचनाकालः १०१६ मितवैक्रमाब्दमभितोऽनुमितः (10 AD)। अस्य ग्रन्थे अष्टावुच्छवासः सन्ति। अस्य ग्रन्थस्य इतिवृत्तं जैनधर्मस्य सिद्धान्तः भवति। अत्र हि भारवि-भवभूति-भर्तृहरि-मेण्ठ-गुणाढ्य-भास-कालिदास-बाण-मयूर-नारायण-माघ-राजशेखरप्रभृतिकवयः स्तुताः सन्ति प्रारम्भिकपद्येषु। ग्रन्थोऽयं यशोधर्मराजचरितसंज्ञयाऽपि ज्ञायते। केचिदमुम् एव कविं सोमप्रभसूरिनाम्नाऽपि गृह्णन्ति। ललितपदप्रयोगं अस्य काव्यस्य वैशिष्ट्यं भवति।

**4.4.6. सोड्ढलः - उदयसुन्दरीकथा**

विक्रमानन्तरैकादशशतकोत्तरार्द्धभवस्य सोड्ढलेन विरचितं उदयसुन्दरी कथाऽपि गद्यपद्यसमप्राधान्येन चम्पूत्वं भजते। अत्र हि अष्टावुच्छवासाः सन्ति। यत्र नागराजकुमार्या उदयसुन्दर्याः प्रतिष्ठाननरेशेन मलयवाहनेन सह परिणयो वर्णितः। ग्रन्थस्य प्रथमाध्याये कवेरात्मकथा दृश्यते।

**4.4.7. सोमेश्वरदेवः - कीर्तिकौमुदी**

१२९७ मितवैक्रमाब्दमभितः स्थितिमतः सोमेश्वरदेवस्य कीर्तिकौमुदी अपि चम्पूकाव्येषु एका। अत्र हि वीरधवलस्य मन्त्रिणो वस्तुपालस्य चरितं चित्रितमस्ति।

### 4.4.8. वासुदेवरथः - गङ्गावंशानुकीर्तनम्

वासुदेवरथेन विरचितं भवति गङ्गावंशानुकीर्तनं काव्यम्। कलिङ्गशासकस्य गङ्गावंशस्य इतिहाससम्बद्धं भवति इदं काव्यम्। अस्य प्रणयनकालः १४७७ मितवैक्रमाब्दमभितोऽनुमितः।

### 4.4.9. रामानुराजाचार्यः - रामानुजचम्पूः

सरसशैल्यां प्रणीतेऽस्मिन् ग्रन्थे विशिष्टाद्वैतमतप्रवर्तकस्य रामानुजस्य जीवनचरितं वर्णितमस्ति। अस्य प्रणयनकालः १६६० मितवैक्रमाब्दमभितोऽनुमितः।

### 4.4.10. तिरुमलाम्बाः - वरदाम्बिकापरिणयचम्पूः

तिरुमलाम्बायाः वरदाम्बिकापरिणयचम्पूः चम्पूकाव्येषु भावभाषादिदृष्ट्या नृपायते खलु। अत्र हि अच्युतरायस्य वरदाम्बिकायाः च प्रणयपरिणयौ मनोहारिण्या शैल्या वर्णितौ स्तः।

कवीयत्र्यसौ १५८६ मितवैक्रमाब्देऽभिषिक्तस्य राज्ञोऽच्युतरायस्यैव धर्मपत्न्यासीत्। अतोऽस्याः स्थितिकालः १५१०-१५५० मितवैक्रमाब्दानभितोऽनुमितः।

### 4.4.11. वेङ्कटाध्वरीः - विश्वगुणादर्शचम्पूः

वेङ्कटाध्वरिणः विश्वगुणादर्शचम्पूः चम्पुकाव्येषु अतीव महत्त्वं अर्हति। अस्य चत्वारः चम्पूग्रन्था येषु विश्वगुणादर्शचम्पूरादर्श ग्रन्थरूपेण गृहीतोऽस्ति। वरदाभ्युदयेऽनेन काञ्चीस्थदेवतानां महत्त्वं वर्णितमस्ति। उत्तरचम्प्वां रामायणस्य उत्तरकाण्डगता कथा उपवर्णिता अस्ति। श्रीनिवासचम्प्वां दशाध्यायाः सन्ति यत्र तिरुमलस्थितदेवतानां वर्णनं दृश्यते।

एवमेव नारायणभट्टेन द्रौपदीस्वयंवरकथामधिकृत्य पाञ्चालीस्वयंवरचम्पूः श्लेषजालमुक्ता दृश्यते। समरपुङ्गप्रणीते यात्राबन्धे नवाश्वासाः सन्ति। अत्र हि सर्वाण्यपि तीर्थानि वर्णितानि सन्ति मुख्यानि। ग्रन्थोऽयं १६८० मितवैक्रमाब्दमभितः प्रणीतोऽनुमीयते। १६८० मितवैक्रमाब्दमभितः स्थितिमता मित्रमिश्रेण भङ्गश्लेषमाधृत्य आनन्दकन्दचम्पूः स्वकीयं वैशिष्ट्यैः प्रसिद्धोऽस्ति। असौ हि कृष्णस्य बाल्यकालकथामनुजीवति।

संस्कृतसाहित्यजगति अन्यचम्पूकाव्यानि भवन्ति चिदम्बरस्य भागवतचम्पूः, शेषकृष्णस्य पारिजातहरणचम्पूः, नीलकण्ठस्य नीलकण्ठविजयचम्पूः यो हि पञ्चसु अध्यायेषु विभक्तं यत्र शिवस्य पराक्रमो वक्रोक्तिपूर्णभाषायां वर्णितः, राजचूडामणेः भारतचम्पूः, चक्रकवेः द्रौपदीपरिणयचम्पूः, वेङ्कटाध्वरिणः विश्वगुणादर्शचम्पूः, वरदाभ्युदयचम्पूः, उत्तरचम्पूः, श्रीनिवासचम्पूश्च कतिपये प्रसिद्धचम्पूग्रन्थाः।

इत्थं हि रामायणाश्रिताः, महाभारताश्रिताः, भागवताश्रिताश्च अनेके शताधिकाः चम्पूग्रन्थाः सन्ति। भगवताश्रितचम्पूषु चिदम्बरस्य, रामभद्रस्य, राजनाथस्य च भागवतचम्पूः, केशवभट्टस्य नृसिंहचम्पूः, दैवज्ञसूर्यस्य नृसिंहचम्पूः, सङ्कर्षणस्य नृसिंहचम्पूः, शेषकृष्णस्य पारिजातहरणञ्च अन्तर्भवन्ति। महाभारताश्रितचम्पूषु अनन्तभट्टस्य भारतचम्पूः प्रसिद्धा।

## पुनरावृत्तिः (Recap)

- संस्कृतसाहित्ये अनेकानि चम्पूकाव्यानि दृश्यन्ते।
- विक्रमभट्टेन विरचितं नलचम्पूः संस्कृतसाहित्ये प्रथम चम्पूग्रन्थः भवति। तत्र नलदमयन्ती कथा उपवर्णितास्ति। सप्त उच्छ्वासेषु विभक्तं भवति सः ग्रन्थः।
- अनन्तभट्टप्रणीतभारतचम्पूः महाभारतमाश्रित्य प्रणीतो द्वादश स्तबकेषु विभक्तो ग्रन्थः।
- भोजदेवेन विरचितं चम्पूरामायणं चम्पूग्रन्थेषु सर्वोत्कृष्टं भवति। रामायणकथा अस्य ग्रन्थस्य इतिवृत्तम्।
- सोमदेवेन विरचितं भवति यशस्तिलकनामा चम्पूग्रन्थः। अयं चम्पूः यशोधर्मराजचरितसंज्ञयाऽपि ज्ञायते।
- सोड्ढलेन विरचितं उदयसुन्दरी कथाऽपि गद्यपद्यसमप्राधान्येन चम्पूत्वं भजते।
- वीरधवलस्य मन्त्रिणो वस्तुपालस्य चरितं चित्रितमस्ति सोमेश्वरदेवस्य कीर्तिकौमुद्याम्।
- वासुदेवरथेन विरचितं भवति गङ्गावंशानुकीर्तनं काव्यम्।
- वेङ्कटाध्वरिणः विश्वगुणादर्शचम्पूः चम्पुकाव्येषु अतीव महत्वं अर्हति।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. प्रथमचम्पूग्रन्थः कः ?
2. नलचम्प्वाः अपरनाम किम् ?
3. नलचम्प्वां कति उच्छ्वासाः सन्ति ?
4. मदालसाचम्पूः कः रचयामासा?
5. अनन्तभट्टप्रणीतं चम्पूकाव्यं किमस्ति?
6. केन विरचितं चम्पूरामायणम् ?
7. यशस्तिलकचम्पूः इति कस्य रचना अस्ति ?

8. उदयसुन्दरीकथा केन विरचिता?
9. वीरधवलस्य मन्त्रिणो वस्तुपालस्य चरितं चित्रितं चम्पूकाव्यं किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. नलचम्पूमधिकृत्य रचिताः प्रसिद्धाः टीकाः के ?
2. मदालसाचम्पूः।
3. हरिचन्द्रः - जीवन्धरचम्पूः।
4. यशोधर्मराजचरितम्।
5. उदयसुन्दरीकथा।
6. वरदाम्बिकापरिणयचम्पूः।

## एकैकया खण्डिकया उत्तरं लिखत।

**(Answer the following questions in a paragraph)**

1. नलचम्पूः।
2. भारतचम्पूः।
3. चम्पूरामायणम्।

## निर्दिष्टाभ्यासः (Assignment)

1. संस्कृतसाहित्ये प्रसिद्धचम्पूकाव्यानि अधिकृत्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. नलचम्पूः।
2. दमयन्तीकथा।
3. सप्त उच्छवासषाः।
4. त्रिविक्रमभट्टः।

SGOU

5. भारतचम्पूः।
6. भोजदेवेन।
7. सोमदेवन।
8. सोड्ढलेन।
9. कीर्तिकौमुदी।

## सूचनाग्रन्थाः(References)


1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन्, वाराणसी।
3. संस्कृतसाहित्येतिहासः। आचार्य लोकमणि दाहलः। कृष्णदास अक्कादमि, वाराणसि।
4. संस्कृतनिबद्ध नवनीतम्। डॉ. पारसनाथद्विवेदि। श्रीराम मेहरा एण्ड कम्पनी, आग्रा।

BLOCK - 5

# प्रशस्ताः रूपककर्तारः

SGOU

# Unit -1
# शक्तिभद्रः

## उद्देश्यानि (Learning Outcomes)

- संस्कृतसाहित्ये प्रमुखरूपककाराणां परिचयं प्राप्नोति।
- शक्तिभद्रपरिचयः।
- शक्तिभद्रस्य नाटकम्।
- आश्चर्यचूडामणेः वैशिष्ट्यम्

## प्राग्व्यपेक्षाः (Pre requisites)

संस्कृतसाहित्ये काव्यानाम् अद्वितीयं स्थानमस्ति। ततः साहित्यं नाम किमिति चिन्त्यताम्। साहित्यं इति पदस्य सहितभावः इत्यर्थः। तत्र शब्दार्थयोः सहितभाव एव साहित्यम् इति उच्यते। 'कवेः कर्म काव्यम्' इति काव्यपदस्य व्युत्पत्तिः। गद्यरूपेण पद्यरूपेण वा रसप्रकाशनपरतया प्रयुक्तानि वाक्यान्येव काव्यमिति उच्यन्ते। दृश्यं श्रव्यञ्चेति काव्यं द्विधा विभज्यते। श्रवणयोग्यं काव्यं श्रव्यकाव्यम्। दर्शनयोग्यं काव्यं दृश्यकाव्यञ्च। दृश्यकाव्यानां श्रवणयोग्यत्वमप्यस्ति। रघुवंशादीनि श्रव्यकाव्यानि, शाकुन्तलादीनि दृश्यकाव्यानि च। दृश्यकाव्यानां रङ्गमञ्चेऽभिनयद्वारा आविष्कारेणैव दर्शनयोग्यत्वसिद्धिः। तेनैव तस्य रूपकमिति नामाप्यस्ति। रङ्गे नटैः चतुर्विधाभिनयद्वारा यत्प्रयुज्यते तदेव रूपकम्। रूपकेष्वन्यतमं प्रमुखञ्च भवति नाटकम्। नटेषु अनुकार्यपुरुषाणां (कथापात्राणां) रूपं आरोप्यत इत्यतः नाटकादीनां रूपकसंज्ञा। तदुक्तं "तद्रूपारोपात्तु रूपकम्"। (सा.द.6 -1) इति साहित्यदर्पणकारेण विश्वनाथाचार्येण, "रूपकं तत्समारोपात् दशधैव रसाश्रयम्।।"। (दशरूपकं 1-7) इति दशरूपककारेण धनञ्जयेन च। रूपकाणि मुख्यतया दशधा विभज्यन्त इत्यपि वयमत्र पश्यामः। नाट्यविषये परमप्रामाणिको भवति नाट्यशास्त्रकारो भरतमुनिः।

अनन्तरं रूपककाराणां परिचयः। संस्कृतभाषायां बहवः रूपककाराः सन्ति। संस्कृतनाटककाराणां मध्ये प्रथमपरिगणना कविकुलगुरोः भासस्यैव भवति। इतिहासकाराणां मतमनुसृत्य भासादारभ्यते भारतीयसंस्कृतनाटककाराणाम् इतिहासः। भासः कालिदासादपि

पूर्विकः। भासादनन्तरमागच्छति विख्यातनाटककारः कालिदासः। मालविकाग्निमित्रं, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलमिति नाटकत्रयं तेन रचितम्। मृच्छकटिकस्य कर्ता शूद्रकः, शारीपुत्रप्रकरणस्य कर्ता अश्वघोषः, उदयाभिसारिकाभाणस्य कर्ता वररुचिः, भगवदज्जुकप्रहसनस्य कर्ता बोधायनः, कुन्दमालायाः कर्ता दिङ्नागः, मुद्राराक्षसस्य कर्ता विशाखदत्तः, प्रियदर्शिकादिनाटकत्रयस्य कर्ता हर्षवर्धनः, मत्तविलासप्रहसनस्य कर्ता महेन्द्रविक्रमः, आश्चर्यचूडामणेः कर्ता शक्तिभद्रः, वेणीसंहारस्य कर्ता भट्टनारायणश्च एतेषु प्रमुखाः। अस्मिन् भागे नाटकरचनायां कैरलीयनाटककारस्य शक्तिभद्रस्य योगदानमधिकृत्य प्रतिपाद्यते।

## मुख्यपदानि (Key terms)

कूटियाट्टम्, कुलशेखरवर्मः, मुकुन्दमाला, वटक्कुंकूर् राजराजवर्मणः, आश्चर्यचूडामणि, वाल्मीकिरामायणम्, असम्बन्धघटनानां परित्यागः, नाटकीयतायै योग्यसम्भवाना, अतिदीर्घसमासः, क्लिष्टपदानां विन्यासः।

## Discussion

रूपकाणां पारम्पर्यं केरले कथमिति युष्माभिः श्रुतं वा ? अस्तु। उच्यते। केरलनाट्यकलायाः सहस्राब्दादधिककालस्य प्राचीनता अस्तीति पण्डिताः वदन्ति। कस्मात् कालादारब्धेति निश्चयेन वक्तुं न शक्यते। नाट्यरूपमत्र कूत् इति नाम्ना प्रचरितमासीत्। संघकालकृतिषु एतस्य परामर्शः दृश्यते। महाक्षेत्रे विशेषरीत्या निर्मितेषु नाट्यगृहेषु एतस्य रङ्गाविष्करणमभवत्। अनन्तरकाले कूटियाट्टमिति कलारूपस्यापि आविष्करणमभवत्। एतत्तु एकाङ्गाभिनयरूपं न, परन्तु बहूनां नटानाम् नाट्यरूपम्। तत्र वेदिकायां बहवः नटाः सम्मिलन्ति। कूटियाट्टे प्रसिद्धानां संस्कृतनाटकानामवतरणं सम्भवति। नाटकस्य सम्पूर्णावतरणं अत्र नास्ति। कानिचिदङ्कान्येव स्वीकृत्य चतुर्विधैरभनयैः विस्तार्य अवतार्यते। उदाहरणाय, सप्ताङ्कपूर्णाद् आश्चर्यचूडामणिनाटकाद् अङ्गुलीयकाङ्काख्यं षष्ठाङ्कमेव स्वीकृत्य कूटियाट्टे अभिनीयते। भासस्य प्रतिज्ञायौगन्धरायणनाटकाद् मन्त्राङ्कमिति तृतीयाङ्कमेव कूटियाट्टे अवतार्यते। एवं प्रसिद्धेभ्यः संस्कृतनाटकेभ्यः उचितानि अङ्कानि स्वीकृत्य कूटियाट्टे अवतार्यते।

केरलदेशे कूटियाट्टस्य परिष्करणं कुलशेखरवर्मणा कृतमिति पण्डितानां मतम्। कुलशेखरवर्मा राजा आसीत्। न केवलं राजा, महान् भक्तः, महाकविः, नाटककारः, कलाकारश्च। मुकुन्दमालेति संस्कृतभाषया रचितस्य ललितस्तोत्रकाव्यस्य कर्ता भवत्ययं राजा। परिष्कृतकूटियाट्टे अभिनेतुं कुलशेखरेण संस्कृतनाटकद्वयं निर्मितम् - तपतीसंवरणं, सुभद्राधनञ्जयः च। तदनन्तरमागच्छति शक्तिभद्रेण विरचितं आश्चर्यचूडामणिनाटकम्।

बहूनि संस्कृतनाटकानि अत्र सृष्टानि सन्ति। तेषु मुख्यतया वर्तन्ते आश्चर्यचूडामणिः, तपतीसंवरणं, मल्लिकामारुतम्, प्रद्युम्नाभ्युदयं, सुभद्राधनञ्जयः च।

### 5.1.1. शक्तिभद्रपरिचयः

शक्तिभद्रमहाकविमधिकृत्य लब्धानि विवरणानि परिमितानि भवन्ति। अयं पण्डितः कुलशेखरात् पूर्वकालीन इति केचित् वदन्ति। तदुपोद्बलकं प्रमाणं नास्ति। केरलसंस्कृतसाहित्यचरित्रमिति वटक्कुंकूर् राजराजवर्मणः ग्रन्थे शक्तिभद्रस्य कालः केरलवर्मकालादनन्तरमित्यस्ति। तद्ग्रन्थमनुसृत्य तिरुवितांकूर् देशे कुन्नत्तुनाटिति जनपदे मण्णटिग्रामे भवति अस्य कवेः जन्मदेशः। ब्राह्मणकुलजातस्य एतस्य कोट्टयत्तुदेशस्थ तिरुवार्पुक्षेत्रे समुदायस्थानम् आसीदिति उच्यते। शङ्कराचार्यस्य समकालीनः इति प्रशस्तिरप्यस्ति। केचिद् वदन्ति, अयं शङ्कराचार्यस्य शिष्य इति। शङ्कर्यशक्तिभद्रयोः पारस्पर्यमधिकृत्य ऐतिह्यान्यपि सन्ति। तदनुसारं शक्तिभद्रस्य कालः क्रिस्तोः पश्चाद् अष्टमशतकस्य अन्ते, अथवा नवमशतकस्य आदौ वेति वक्तुं शक्यते। सप्तमशतके आसीत् शक्तिभद्रः इति केचन वदन्ति। तस्यापि प्रमाणं नास्ति। चूडामण्याः प्रस्तावनायाम् 'उन्मादवासवदत्तादीनां काव्यानां कर्तुः' इति परामर्शाः अस्ति। एतेन आश्चर्यचूडामणिं विना अन्यानि काव्यान्यपि रचितानीति अवगम्यते। किन्तु तानि अधुना उपलब्धिरूपेण न।

### 5.1.2. शक्तिभद्रस्य नाटकम्

आश्चर्यचूडामणिनाटकस्य इतिवृत्तं प्रख्यातं भवति। वाल्मीकिरामायणम् आश्रित्य अस्य रचना कृता। रामायणस्य अरण्यकाण्डादारभ्य युद्धकाण्डपर्यन्तं व्यापृतायाः कथायाः नाटकीयाविष्करणं शक्तिभद्रेण कृतमस्ति। अस्मिन् नाटके चत्वारि प्रमुखघटनानि दृश्यन्ते - शूर्पणखाविरूपणम्, जानकीहरणम्, हनुमत्सन्देशः, सीतायाः अग्निपरीक्षा च। एतदतिरिच्य अन्यानि लघुघटनान्यपि सन्ति। अस्मिन् षोडश पुरुषकथापात्राणि पञ्च स्त्रीकथापात्राणि च आगच्छन्ति। दशरथस्य ज्येष्ठपुत्रः रामः नायकः। तत्पत्नी सीता नायिका च।

प्रथमाङ्के पर्णलानिर्माणे व्यापृतस्य लक्ष्मणस्य चित्रीकरणम्। तदन्तिकमागच्छति सुन्दरीवेषं धृत्वा शूर्पणखा। पत्नीरूपेण स्वीकर्तुं तया अभ्यर्थ्यते। लक्ष्मणेन निरस्यते। द्वितीयाङ्कस्य आरम्भे लक्ष्मणेन तिरस्कृता शूर्पणखा रामस्य समीपमागच्छति। लक्ष्मणेन तस्याः प्रणयः तिरस्कृत इति तया उच्यते। पुनरपि लक्ष्मणमुपसर्तुं रामेण आदिश्यते। किन्तु रामपत्नीरूपेण तत्समीपम् उपवेष्टुमिच्छां प्रकटयति। स्वस्य एकपत्नीव्रतवृत्तान्तम् उक्त्वा रामेण सा निवारिता, लक्ष्मणसमीपं पुनरपि प्रेषिता च। किञ्चित्कालानन्तरं नेपथ्ये लक्ष्मणस्य शब्दः उच्चैस्तरं श्रूयते। शब्दः रामेण प्रत्यभिज्ञायते। क्रमेण खड्गमुद्धृत्य लक्ष्मणः रङ्गमण्डपमागच्छति, तदनुबन्धेन राक्षसवेषं धृता शूर्पणखा च। शूर्पणखायाः भीकररूपं दृष्ट्वा सीता भीता इव दृश्यते, रामः अद्भुतेन वीक्ष्यते च।

तृतीयाङ्कस्य विष्कम्भानन्तरं कपटवेषधारी मारीचः रामाश्रममागत्य तद्दृष्टिपथं परिहृत्य अतिष्ठत्। राक्षसैर्भीतेभ्यः ऋषिगणेभ्यः सान्त्वनं दत्वा कवचधारी लक्ष्मणस्तत्र आगतवान्। सन्तुष्टैः महर्षिभिः रामादिभ्यः दत्तान्युपहारवस्तूनि लक्ष्मणेन प्रदर्श्यन्ते। लक्ष्मणाय कवचः, रामाय अङ्गुलीयकं, सीतायै रत्नञ्च। रत्नस्य विशेषता अपि तेन उच्यते। अद्भुतकरमिदं यत्नं येन ध्रियते, तत्स्पर्शेन मायाविनां माया विच्छेत्स्यते। अङ्गुलीयकं स्वकरे धृत्वा च रामः सीताचूडायां रत्नमलङ्कृतवान्। आश्रमस्य पुरोभागे कश्चन सुवर्णमृगः आयाति। तं दृष्ट्वा सीता स्वेच्छां प्रकटयति। सीतायाः इच्छामवगम्य रामः सीतारक्षणं लक्ष्मणे निक्षिप्य मृगमनुधावति। शूर्पणखा रावणसमीपं गत्वा सीताहरणाय प्रेरयति। आश्रमसङ्केते सीतां दृष्ट्वा तत्सौन्दर्ये मुग्धं रावणं प्रदर्शययति। रावणेन कृतं सीतापहरणं सम्भवति।

चतुर्थाङ्कारम्भे सीतामाह्वत्य रावणस्य स्यन्दनं गच्छति। तस्मिन् समीपस्थितां सीतां स्पृष्टुं कामाभिभूतो रावणः ऐच्छत्। सहसा रावणस्य करौ सीतायाः केशपाशे व्यापृतौ आस्ताम्। सीतास्पर्शेन चूडामण्याः माहात्म्येन च रावणः कपटवेषमुक्तो भवति। दशरथमित्रं जटायुः आगच्छति। जटायुरावणयुद्धं सम्भवति। रावणखड्गेन जटायुः भूमौ अपतत्। तदनन्तरं रावणः सीतामाह्वत्य लङ्कां प्रति अगच्छत्।

पञ्चमाङ्के रङ्गस्थलं रावणस्य अन्तःपुरम्। तत्र रावणपत्नी मण्डोदरी दास्या सह वार्तालापः क्रियते। एतस्मिन्नन्तरे नेपथ्ये वसन्तोत्सवस्य घोषणा। रावणः अशोकवनिकायां सीतासमीपं गतवानिति श्रुत्वा मण्डोदरी रावणस्य व्यवहारं द्रष्टुं दास्या सह तत्र गच्छति। लतावृन्दे निलीना भूत्वा मण्डोदरी रावणेन क्रियमाणानि प्रलोभनानि, तन्निषेधेन सीतया

प्रदर्शितं पातिव्रत्यं च पश्यति। एतद्दृष्ट्वा करुणह्मदया मण्डोदरी तयोर्मध्ये आगच्छति। मण्डोदरीं दृष्ट्वा लज्जितो भवति रावणः। स क्षणादेव तस्माद्देशादगच्छत्।

हनुमतः लङ्कागमनेन षष्ठाङ्कः प्रारभ्यते। वृक्षान्तरितो भूत्वा हनूमान् धूलिधूसरितां सीतां पश्यति। उचितावसरे एव हनूमान् तत्पुरतः अवतरति। रामदूतोऽहमिति आत्मपरिचयः क्रियते। रामेण दत्तम् अङ्गुलीयकं तेन सीतायै अदात्। अङ्गुलीयकं दृष्ट्वा, रामवृत्तान्तं श्रुत्वा च सीता हर्षपुलकिता अभवत्। रामसन्देशं श्रुत्वा सीता रामाय दातुं स्वचूडामणिः हनूमते दीयते। चूडामणिं गृहीत्वा हनूमान् रामं द्रष्टुं प्रस्थितवान् च।

सप्तमाङ्कस्य आरम्भे मिश्रविष्कम्भकम्। रामरावणयुद्धं, रामविजयः, विभीषणस्य स्थानारोहणमित्यादिकानि विष्कम्भकेऽस्मिन् सन्ति। तदनु रामस्य कथा प्रस्तूयते। लोकमतं विचार्य, सीतायाः चारित्र्यविषये परीक्षणमावश्यकमिति रामस्य चिन्ता। सीता अग्निपरीक्षायै सन्नद्धा दृश्यते। सीता अग्निपरीक्षामकरोत्। सीतायाः अग्निप्रवेशनकाले जातानि अद्भुतानि लक्ष्मणेन वर्ण्यते। तदनन्तरं नारदः आगच्छति। सीतायाः अनसूयावरप्राप्तिः, तल्लाभेन अग्निप्रवेशाद्रक्षणमेतत् सर्वं तेन निवेद्यते। तस्मिन् काले एव विभीषणेन पुष्पकविमानं आनीतम्। सीतया लक्ष्मणेन च सह विमानमारुह्य रामः अयोध्यां प्रति प्रस्थितवान्। देवलोकात् कल्याणवृष्टिः। नाटकस्य समाप्तिः च।

### 5.1.3. शक्तिभद्रस्य रचनासामर्थ्यम्।

आश्चर्यचूडामण्याः इतिवृत्तं ख्याता रामायणकथा भवति। रामायोणोक्तायाः कथायाः यथागतं विन्यासः अस्मिन् नाटके कविना न कृतः। उचितसन्दर्भाणां स्वीकारः, असम्बन्धघटनानां परित्यागः, नाटकीयतायै योग्यसम्भवानां विपुलीकरणं च विवेचनेन कविना प्रस्तुतीकृतानि। रामविलापः, सुग्रीवसख्यं, सीतान्वेषणं, युद्धवर्णनमित्यादि विषयाः सूचिताः एव, न रङ्गमुखे आगच्छन्ति। नाटकीयचमत्कारार्थं मूलकथायां कानिचन परिवर्तनानि कविना दत्तानि सन्ति। सीतापहरणकाले साधुवेषं धृत्वा रावणः मूलकथायामागच्छति। किन्तु अत्र कविः रावणं रामवेषं धारयति। अनेन परिवर्तनेन लाभः अस्ति । रावणं रामं मत्वा, तेन सह गन्तुं सीतायाः प्रयासो नानुभवति। आश्चर्यचूडामणेः चित्रीकरणमपि कवेः नूतनकल्पना भवति। तेन रत्नेन मायाविनो राक्षसाः प्रत्यभिज्ञाताः भवन्ति। अनसूयायाः वरदानकल्पनमपि कवेः मौलिकसृष्टिरेव।

नाटकारम्भात् समाप्तिपर्यन्तम् विविधानानि आशचर्यघटनानि सन्ति। एतानि कविना सम्यगालोच्य कृतानि। तानि नाटकीयतायै अत्यन्तं प्रयोजनानि भवन्ति।

चूडामणिमधिकृत्य नाटकस्य इतिवृत्तं विकसति। एषा चूडामणिः कविना मूलकथायां संयोजिता भवति। तस्मिन् अद्भुतशक्तिरस्ति, यया रावणस्य कापट्यं सीतया प्रत्यभिज्ञायते। आश्चर्यचूडामणिरिति नामधेयमपि चूडामणिनिमित्तं भवति।

भारतीयनाट्यमीमांसकैरुक्तं नाटकस्य लक्षणम् अस्मिन् सम्यक् परिपालितमस्ति। आरम्भाद्यवस्थानां, बीजाद्यर्थप्रकृतीनां मुखादिसन्धीनां विन्यासः सुरुचिरेण अत्र कृतः। अस्मिन् वीररसः अङ्गिरूपेण, अद्भुतरसः तदङ्गरूपेण च दृश्येते। केषाञ्चिद् विमर्शकानां पक्षे अस्मिन् अद्भुतरसः अङ्गिरूपेण तिष्ठति।

नाटकस्य रचना सुकुमारशैल्या कृता, यत्र वैदर्भीरीत्याः प्रसादगुणस्य च परिबद्धावस्था दृश्यते। अतिदीर्घसमासानां वा क्लिष्टपदानां वा विन्यासः अस्मिन् नाटके विरल एव। व्यञ्जनात्मकशैलिः सर्वत्र स्वीकृता। इदं नाटकं अभिनेयतानिर्भरं भवति। रङ्गमण्डपे दर्शकान् रसमग्नान् कर्तुमावश्यकानि दृश्यानि अत्र प्रस्तुतीकृतानि सन्ति।

## पुनरावृत्तिः (Recap)

- नाटकं साहित्यस्य महत्त्वपूर्णमङ्गं वर्तते।
- केरलनाट्यकलायाः सहस्राब्दादधिककालस्य प्राचीनता अस्तीति।
- नाट्यरूपमत्र कूत् इति नाम्ना प्रचरितमासीत्।
- केरलस्य संस्कृतनाट्यकलायाः नाम कूटियाट्टम्।
- कुलशेखरवर्मणा कृतं नाटकद्वयं सुभद्राधनञ्जयं, तपतीसंवरणं च।
- कूटियाट्टे प्रसिद्धानां संस्कृतनाटकानामवतरणं सम्भवति।
- परिष्कृतकूटियाट्टे बहूनि संस्कृतनाटकानि अत्र सृष्टानि सन्ति।
- तेषु मुख्यतया वर्तन्ते आश्चर्यचूडामणिः, तपतीसंवरणं, मल्लिकामारुतम्, प्रद्युम्नाभ्युदयं, सुभद्राधनञ्जयं च।
- आश्चर्यचूडामणिः नाम नाटकस्य कर्ताः शक्तिभद्रः केरलीयः।
- शक्तिभद्रस्य जन्मदेशः तिरुवितांकूर्देशे कुन्नत्तुनाडिति देशे मण्णटिग्रामे भवति।
- शक्तिभद्रस्य कालः क्रिस्तोः पश्चाद् अष्टमशतकस्य अन्ते, अथवा नवमशतकस्य आदौ वेति वक्तुं शक्यते।
- शक्तिभद्रस्य नाटकं आश्चर्यचूडामणिः। अस्मिन् सप्त अङ्काः वर्तन्ते।
- आश्चर्यचूडामण्याः इतिवृत्तं ख्याता रामायणकथा भवति।

- अस्मिन् वीररसः अङ्गिरूपेण, अद्भुतरसः अङ्गरूपेण।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. केरलस्य संस्कृतनाट्यकलायाः नाम किम् ?
2. शक्तिभद्रस्य नाटकं किम् ?
3. आश्चर्यचूडामणिनाटके कति अङ्काः सन्ति ?
4. आश्चर्यचूडामणिनाटके नायकः कः ?
5. आश्चर्यचूडामणिनाटकस्य मूलकथा कस्मात् स्वीकृता ?
6. कूटियाट्टे उपयुज्यमानम् आश्चर्यचूडामणिनाटकस्य अङ्कः कः ?
7. चूडामणिरत्नं सीतायै कैः दीयते?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

(Answer the following questions in one or two sentences

1. कुलशेखरवर्मणा कृतं नाटकद्वयं किम् ?
2. शक्तिभद्रस्य जन्मदेशः कः ?

## एकैकया खण्डिकया उत्तरं लिखत।

(Answer the following questions in a paragraph)

1. कूटियाट्टं नाम किम् ?

## निर्दिष्टाभ्यासः (Assignment)

1. रामायणकथातः आश्चर्यचूडामणिकथा भिद्यते। कथमिति लिखत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. कूटियाट्टम्।
2. आश्चर्यचूडामणिः।
3. सप्त।
4. रामः।
5. रामायणात्।
6. अङ्गुलीयकाङ्काख्यमङ्कम्।
7. महर्षिभिः।

## सूचनाग्रन्थाः(References)


1. T.K.Ramachandra Iyyer, A short History of Sanskrit Literature, R S Vadhyar & Sons Kalpathy, Palakad, 2018.
2. Arther A Macdonnel, A History of Sanskrit Literature, London William Heinemann, MDCCCC
3. A.B.Keith, Sanskrit drama –Geoffrey cumberlege, Oxford University Press
4. Dr.K.Kunjunniraja - Sanskrit on the stage, Madras University of Madras.
5. Vadakkamkur, Keraliya Samskrutha Sahitya Caritram.
6. Ramakant Jha, Āścarya cūḍāmaṇi by Saktibhadra.

# Unit - 2
# श्रीहर्षः

## उद्देश्यानि (Learning Outcomes)

- संस्कृसाहित्ये प्रमुखरूपककाराणां परिचयः प्राप्नोति।
- श्रीहर्षं परिचयं ज्ञास्यति कविं तस्य काव्यं च परिचिनोति।
- नैषधीयचरितमहाकाव्यस्य विषयवस्तु अवगमिष्यति।

## प्राग्व्यपेक्षाः (Pre requisites)

सुहृदः! संस्कृतनाटककर्तॄणां कालगणनायां भासः प्रथमः। भासादनन्तरं कालिदास एव। सः यद्यपि कालगणनायां भासस्यानन्तरगामी, तथापि प्रशस्तिविषये सः भासात् पुरतो वर्तते। कालिदासः न केवलं संस्कृतसाहित्ये सुप्रसिद्धः कविः, अपि च विश्वसाहित्येऽपि स तथैव सुप्रसिद्धः। सुप्रसिद्धानां संस्कृतरूपककाराणां मध्ये श्रीहर्षः परमपरिगणनीयः भवति। पञ्चमहाकाव्येषु विश्वविख्यातस्य नैषधीयचरिताख्यस्य महाकाव्यस्य प्रणेता भवति लोकोत्तरप्रतिभावान् महाकाविः श्रीहर्षः। नैषधीयचरितं नाम महाकाव्यं कन्नौजाधिपतेः महाराजजयचन्द्रस्य काले श्रीहर्षेण द्वादशशतकोत्तरार्थे लिखितम्। महाकाव्येऽस्मिन् कलापक्षस्य, भावपक्षस्य च प्राधान्यं विद्यते। श्रीहर्षप्रणीतं नैषधीयचरितं न केवलम् एकं महाकाव्यम् अपि तु विविधविषयाणां विश्वकोशोऽपि। अस्मिन् भागे श्रीहर्षस्य योगदानमधिकृत्य प्रतिपाद्यते।

## मुख्यपदानि (Key terms)

कान्यकुब्जेश्वरः, लघुत्रयी, बृहत्त्रयी, श्रीहर्षस्य कृतयः, नलस्य चरितं, अद्वैतवादस्य समर्थकः, नैषधे पदलालित्यम्, नैषधं विद्वदौषधम्।

**DISCUSSION**

### 5.2.1. नैषधीयचरितस्य कर्त्ता

संस्कृतसाहित्ये नितान्तं प्रसिद्धं तथा विस्तृतं च महाकाव्यं भवति श्रीहर्षस्य नैषधीयचरितम्। श्रीहर्षो हि संस्कृतसाहित्यस्य वरेण्यकविषु अन्यतमः। श्रीहर्षस्य पितुः नाम श्रीहीरः, माता श्रीमती परमविदुषी मामल्लदेवी। श्रीहर्षकविना स्वकाव्ये "ताम्बूलद्वतयमासतञ्जलभते यः कान्यकुब्जेश्वरात्" इति कथनेन कविरयं १२२५-१२५२ मितवैक्रमाब्दानभितः शासतः कान्यकुब्जेश्वरस्य गहडवालवंशस्य गोविन्दचन्द्र प्रपौत्रस्य वाराणस्याः महाराज्यस्य विजयचन्द्रपुत्रस्य जयचन्द्रस्य सभापण्डितः आसीत् इत्यनुमीयते। श्रीहर्षश्च प्रथमं विजयचन्द्रस्य तदनन्तरं जयचन्द्रस्य च सभापण्डितः आसीत्।

श्रीहर्षेण समये समये ग्रन्थाः विरचितास्सन्ति। अयं कविः असामान्यवैदुष्यपूर्णां प्रतिभां धारयति। एतादृश्यपि एका उक्तिरस्ति यत् महाकविश्रीहर्षः प्रसिद्धस्य आलङ्कारिकस्य मम्मट्टस्य भागिनेय आसीत्। अयं श्रीहर्षः न्यायवेदान्तादिषु नैकेषु शास्त्रेषु पूर्णाधिकारी आसीत्।

### 5.2.2. श्रीहर्षस्य कृतयः

संस्कृतमहाकाव्येषु नैषधीयचरितमेकमुच्चं स्थानं भजते। संस्कृतसाहित्ये अपरिमितकाव्यानि महाकाव्यानि च सन्ति किन्तु पठनपाठने लघुत्रयी, बृहत्त्रयी च पञ्चमहाकाव्यानि नितरां प्रसिद्धानि सन्ति। लघुत्रय्यां नैषधीयचरितस्य गणना न भवति। बृहत्त्रय्याम् अस्याः कृतेः समावेशो भवति। किरातार्जुनीयम्, शिशुपालवधम् नैषधीयचरितम् एतानि त्रीणि महाकाव्यानि बृहत्त्रय्यां समागच्छन्ति। श्रीहर्षस्य बह्व्यः कृतयः सन्ति किन्तु 'नैषधं विद्वदौषधम्' इति वाक्येन नैषधीयचरितमहाकाव्यस्य महिमा प्रकटितः भवति।

श्रीहर्षस्य कृतयः तेषां संक्षिप्तपरिचयं अधो धीयते।

- स्थैर्यविचारप्रकरणम्- संभवतः ग्रन्थेऽस्मिन् बौद्धस्य क्षणिकवादस्य खण्डनं वर्तते।
- विजयप्रशस्तिः- ग्रन्थेऽस्मिन् जयचन्द्रस्य पिता विजयचन्द्रस्य प्रशस्तिः वर्णिता अस्ति।
- खण्डनखण्डखाद्यम्- ग्रन्थेऽस्मिन् न्यायस्य रीतिः वर्णिता वर्तते। न्यायस्य खण्डनं च अद्वैतसिद्धान्तस्य मण्डनं विद्यते। ग्रन्थोऽयम् अत्यन्तं दुरुहस्य पाण्डित्यस्य निकषग्रावा मन्यते। षोडशशताब्द्यां शङ्करमिश्रेण अस्य खण्डनखण्डखाद्यस्य शैलीं लक्षीकृत्य "वादविनोदः" नाम्नः ग्रन्थस्य रचना कृता आसीत्।

- गौडोर्वीशकुलप्रशस्तिः- अस्मिन् ग्रन्थे बङ्गदेशस्य कस्यचिद् राज्ञः प्रशस्तिवर्णनमस्ति।
- अर्णववर्णनम्- ग्रन्थेऽस्मिन् समुद्रस्य वर्णनं वर्तते।
- छिन्दप्रशस्तिः अस्मिन् ग्रन्थे छिन्दनाम्नः कस्यचित् राज्ञः प्रशस्तिः वर्तते।
- शिवशक्तिसिद्धिः- ग्रन्थेऽस्मिन् शिवस्य शक्त्याः सिद्धिः विवर्णिताऽस्ति।
- नवसाहसाङ्कचरितचम्पूः- संभवतः राज्ञः भोजस्य पितुः "नवसाहसाङ्क" उपाधिना भूषितस्य सिन्धुराज्ञः चरित्रं वर्तते।
- नैषधीयचरितम्- महाकाविना "तच्चिन्तामणिमन्त्रचिन्तनफले" एतदुक्त्वा चिन्तामणिमन्त्रस्य जपं कृत्वा चिन्तनेन महाकाव्यमिदं तस्य मन्त्रस्य फलरूपेण प्राप्तमस्ति। महाकाव्येऽस्मिन् 22 सर्गाः सन्ति। प्रायः प्रत्येकं सर्गे शताधिकाः श्लोकाः सन्ति। 13, 15, 19 सर्गत्रयं त्यक्त्वा सर्वेषु शताधिकश्लोकास्सन्ति। किं बहुना 17 सप्तदशतमे सर्गे तु 222 श्लोकाः विद्यन्ते समष्टिरूपेण महाकाव्येऽस्मिन् 2830 श्लोकाः विद्यन्ते। तादृशी उक्तिः वर्तते आश्रयदातुः महाराज जयचन्द्रस्याज्ञया महाकविना महाकाव्यमिदं रचितम्।

### 5.2.3. नैषधीयचरितम्

निषधराजकुमारस्य नलस्य चरितं अत्र वर्णयति। नलस्य वर्णनया ग्रन्थमारभ्यते। निषिधराजकुमारः विदर्भाया राजकुमारी दमयन्ती च परस्परं अनुरक्तौ आस्ताम्। कश्चन हंसः तयोः सहायं करोति। पुत्र्याः वैशम्यं ज्ञात्वा तस्याः स्वयंवरं पिता निश्चिवान्। तत् श्रुत्वा नलः तत्र आगच्छति। तस्मिन् समये दमयन्त्यां आसक्ता नलरूपं धृत्वा तत्रागछन्ति चत्वारो दिक्पालाः। पश्चात् च ते नलस्य समर्पणभावं दृष्ट्वा प्रसन्नाः देवाः स्वानि स्वानि रूपाण्येव गृह्णाति। ततश्च सुखेन दमयन्ती नलं स्वयंवरस्रजा विभूषयति। परिणयानन्तरं जातेर्ष्युः कलिर्नलं तं विरूपयति। पश्चात् च लब्धस्वरूपेण नलेन सह दमयन्त्याः सुखं सङ्गमो भवति। नैषधीयचरितस्य उपजीव्यं महाभारतं (नलोपाख्यानं) अस्ति।

### 5.2.4. श्रीहर्षस्य पाण्डित्यम्

श्रीहर्षः अद्वैतवादस्य समर्थकः। श्रीहर्षः द्वैतवादी उदयनाचार्यस्य मतं खण्डितवान्। नैषधीयचरिते कविः शिल्पविज्ञापेन सह प्राणिविज्ञानस्य वर्णनं, सामुद्रिकशास्त्रेण सह तन्त्रशास्त्रस्य वर्णनं च कृतवान्। महाक विः श्रीहर्षः अलंकाराणां विन्यासे अतीव निपुणः अस्ति। श्रीहर्षो महाकविः महादार्शनिको महावैयाकरणः च इत्यादि विविधविरुद्धगुणगणसमन्वयात् अतिशेते सर्वान् अन्यान् महाकवीन् पाण्डित्यप्रदर्शने वाग्वैभवे रुचिररचनायां भावाभिव्यक्तौ

साधुशब्दसंकलने विद्यावैशरद्ये वक्रोक्तिव्यवहारे च। अनुपमवैदुष्यवैभव आविर्भावात् पाण्डित्यपुटपरिपाकप्रतीकाशः प्रतीयते। प्रतिपदं पदलालित्यावेक्षणात् 'नैषधे पदलालित्यम्'। इत्यभिधीयते।

### 5.2.5. नैषधे पदलालित्यम्

नैषधे पदानां विन्यासः सर्वेषां सहृदयानां हृदयं विलोभयति। पदलालित्यस्य निदर्शनं दिङ्मात्रं द्रष्टव्यमत्र 'शृङ्गारभृङ्गारसुधाकरेण यर्णस्त्रजानूपय कर्णकूपौ' 'नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे' 'सकलया कलया किल दंष्ट्रया समवधाय यमाय विनिर्मितः' 'दिने दिने त्वं तनुरोधिरेऽधिकं पुनः पुनर्मूर्च्छच्छ तापमृच्छ च' इत्यादयः। एवं च नैषधे महाकाव्ये पदलालित्यस्याधिक्यं दृश्यते। क्वचित् प्रसादः क्वचित् माधुर्यम्, क्वचित् च ओजोगुणो लक्ष्यते। माधुर्यगुणेन सह पदलालित्यं विचित्रामाभां प्रदर्शयति। काव्यस्य लयात्मकत्वं संगीतात्मकत्वं च श्रुतिसुखदत्वेन सममेव सहृदयहृदयावर्जकत्वेनोपतिष्ठेते। विपश्चिद्भिः 'नैषधे पदलालित्यम्' इति साह्लादम् उद्घोष्यते।

### 5.2.6. नैषधं विद्वदौषधम्

नैषधमहाकाव्यं अनुपमवैदुष्यस्य वैभवय्य च आविर्भावात् पाण्डित्यपुटपरिपाकप्रतीकाशः प्रतीयते। नैकशास्त्रनिष्णातस्यानुपहता गतिरत्रेति 'नैषधं विद्वदौषधम्' इति उद्घोष्यते यशोऽस्य सुधिभिः।

नैषधं विद्वदौषधम् विविधविद्यापारदृश्वा श्रीहर्षः। नैषधे स्वव्युत्पत्तिप्रदर्शनोपक्रमे स प्रतिपदं क्लिष्टत्वं दुरुहत्वं चोपपादयति। विविधशास्त्रियसिद्धान्तवर्णनात् श्लिष्ट-क्लिष्ट-पद-प्रयोगात्, बहुज्ञता-प्रदर्शनाच्च स्वकाव्ये व्युत्पत्ति-वारिधिं प्रथयति। स श्लिष्टप्रयोगादतिरिक्तं व्याकरण-न्याय-वैशेषिक-सांख्य-योग-वेदान्त-मीमांसा-चार्वाक-बौद्ध-जैनादिदर्शनानां दुरूहान् सिद्धान्तान् यत्र-तत्र वर्णयति। विशिष्ट- दर्शनज्ञानमन्तरेण तदर्थावगमो दुष्कर एव। न केवलं पाश्चात्यविदुषामेव कृते, अपि तु भारतीयविद्वत्तल्लजानामपि कृते नैषधं दुर्बोधमेव। पाण्डित्यप्रदर्शनस्य दुष्परिणामरूपत्वेन श्रीहर्षस्य कलापक्षः श्रियमश्नुते, भावपक्षश्च दौर्बल्यम्। श्रीहर्षेण स्वकीयस्य शास्त्रज्ञानस्य परिचयं तत्र प्रतिसर्गे दत्तम्। परञ्च सप्तदशे सर्गे तु तेन स्वकीयं नास्तिकास्तिकदर्शनप्रवीणत्वं व्याकरणनिष्णातत्त्वं च उद्घोषितम्। चार्वाकसिद्धान्तस्य प्रतिपादनं न कश्चनेश्वरः इति द्रष्टव्यम्।

## पुनरावृत्तिः (Recap)

- पञ्चमहाकाव्येषु विश्वविख्यातस्य नैषधीयचरिताख्यस्य महाकाव्यस्य प्रणेता भवति लोकोत्तरप्रतिभावान् महाकाविः श्रीहर्षः।
- श्रीहर्षः न्यायवेदान्तादिषु नैकेषु शास्त्रेषु पूर्णाधिकारी आसीत्।
- श्रीहर्षस्य बहव्यः कृतयः सन्ति।
- निषधराजकुमारस्य नलस्य चरितं नैषधीयचरिते वर्णयति।
- महाकाव्येऽस्मिन् 22 (द्वाविंशतिः) सर्गाः 2830 श्लोकाश्च सन्ति।
- श्रीहर्षः अद्वैतवादस्य समर्थकः।
- नैषधे पदानां विन्यासः सर्वेषां सहृदयानां हृदयं विलोभयति।
- माधुर्यगुणेन सह पदलालित्यं विचित्रामाभां प्रदर्शयति।
- नैकशास्त्रनिष्णातस्यानुपहता गतिरत्रेति 'नैषधं विद्वदौषधम्' इति साह्लादम् उद्घोष्यते यशोऽस्य सुधिभिः।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. नैषधीयचरितस्य कर्ता कः ?
2. 'हंससन्देशः' कस्मिन् काव्ये वर्णितोऽस्ति?
3. श्रीहर्षस्य मातुलः कः?
4. श्रीहर्षस्य पितुर्नाम किम् ?
5. नैषधीयचरिते कति सर्गाः सन्ति?
6. नैषधीयचरितस्य उपजीव्यं किमस्ति?
7. श्रीहर्षः कस्य वादस्य समर्थकः?
8. नैषधीयचरितं अस्य ग्रन्थस्य गणना कुत्र क्रियते?
9. नैषधीयचरितं किमस्ति ?
10. नैषधीयचरिते ग्रन्थे प्रयुक्तानि प्रत्येकपदानि कानि ?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. कान्यकुब्जे ईश्वरात् ताम्बूलद्वयम् आसनं च लभते' इति कस्य कवेः प्रशंसायां वर्णितम्? विशदयत।
2. श्रीहर्षस्य जन्मस्थितिकालं वर्णयत?
3. श्रीहर्षः कस्य राज्याश्रितः आसीत्?
4. बृहत्रय्यां केषां ग्रन्थानां समावेशः भवति?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. श्रीहर्षस्य रचनाः काः?
2. "नैषधं विद्वदौषधम्"
3. श्रीहर्षस्य विशेषतां लिखत।

## निर्दिष्टाभ्यासः (Assignment)

1. नलोपाख्यानाधारितं काव्यं किम्? विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. श्रीहर्षः।
2. नैषधीयचरिते।
3. मम्मटः।
4. हीरः।

5. द्वाविंशतिः।
6. महाभारतं (नलोपाख्यानं)।
7. अद्वैतवादस्य।
8. बृहत्त्रय्याम्।
9. महाकाव्यम्।
10. श्लिष्टानि।

## सूचनाग्रन्थाः (References)


1. T.K.Ramachandra Iyyer, A short History of Sanskrit Literature, R S Vadhyar & Sons Kalpathy, Palakad, 2018.
2. Arther A Macdonnel, A History of Sanskrit Literature, London William Heinemann, MDCCCC
3. A.B.Keith, Sanskrit drama –Geoffrey cumberlege, Oxford University Press
4. Dr.K.Kunjunniraja - Sanskrit on the stage , Madras University of Madras
5. Dr.Kunjunniraja - Samskṛta Sāhityacaritram, Kerala Sahitya Academy.
6. Naishadhiyacarita of Sriharsha, Motilal Banarasidas, New Delhi
7. Sivabalak Dwivedi, Naishadhiyacarita - A Study, Prakash Mitra Sastri, Shishak Prakasan, Kanpur 1981
8. Naisadhiyacarita of Sriharsa
9. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
10. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन्, वराणसी।

# Unit - 3
# शूद्रकः, भट्टनारायणश्च

## उद्देश्यानि (Learning Outcomes)

- संस्कृसाहित्ये प्रमुखरूपककाराणां परिचयं प्राप्नोति।
- शूद्रकं भट्टनारायणं च परिचाययति।
- संस्कृते राजनैतिकनाटकानाम् अवलोकनम्।
- प्रकरणग्रन्थानां मध्ये चूडारत्नं भवति मृच्छकटिकम् इति अवगच्छति।
- नाटकस्य सामाजराष्ट्रतन्त्रपरं विज्ञानम् आर्जयति।

## प्राग्व्यपेक्षाः (Pre requisites)

अवस्थानुकृतिर्नाट्यम्। अनुकरणमेव नाटकस्य मूलाधारः। लोकरञ्जकत्वमेव नाटकस्य मुख्यं प्रयोजनम्। लोकव्यवहारं तत्तत्कालीनं समाजव्यवस्थां च नाटकेषु चित्रिता वर्तते। राष्ट्रिय-सामूहिक-नीतिपराणि-कार्याणि विशदीकृतानि संस्कृतनाटकानि सन्ति। तेषु प्रसिद्धानि भवन्ति शूद्रकस्य मृच्छकटिकम्, विशाखदत्तस्य मुद्राराक्षसम्, भट्टनारायणस्य वेणीसंहारं च। अधिकारगर्वं राजबन्धूनां दुष्प्रवृत्तिं समूहस्य जीर्णतां च प्रतिपादयति शूद्रकः मृच्छकटिके। तत्समये साधुजनानां चिन्ताधाराः प्रकीर्तयति च। राजतन्त्रस्य दौर्बल्यं सूचयन् नाटककर्ता साधुजनसंरक्षणं च विशदयति। भट्टनारायणस्य वेणीसंहारं सर्वलक्षणोपेतं राजनैतिकं शास्त्रीयनाटकमेव। नैतिकयुक्तानां तादृशानां नाटकानां विवरणमत्र विशदीकरिष्यामः।

## मुख्यपदानि (Key terms)

सर्वोत्कृष्टं प्रकरणम्, मृच्छकटिकस्य कर्ता, बृहत्कथातः स्वीकृतमितिवृत्तम्, दश अङ्काः, कथापात्राणि साधारणमनुष्याः, चारुदत्तम्, चूडारत्नं, शास्त्रीयनाटकम्।

DISCUSSION

## 5.3.1. शूद्रकः

संस्कृतसाहित्ये शुद्रकस्य नाम नितरां प्रसिद्धः। संस्कृतसाहित्ये सर्वोत्कृष्टं प्रकरणं भवति मृच्छकटिकम्। अस्य कर्तुः कालस्य च विषये विभिन्नाभिप्रायाः सन्ति। किन्त्वपि भारतीयपैतृकं अस्य कर्तृत्वं शूद्रके निश्चितमस्ति। शूद्रकः कश्चन राजा इति ग्रन्थादवगम्यते। भारतीयपरम्परायां शूद्रकनामधेये बहवः राजानः दृश्यन्ते। स्कन्दपुराणस्य कुमारिकाकाण्डे कस्यचन शूद्रकस्य नाम आगच्छति, यः क्रिस्तोः पश्चात् 190 वर्षे राज्यभरणं कृतवानिति। दण्डिनः अवन्तिसुन्दरिकथायाम् उज्जयिन्याः राजात्वेन विलसितस्य कस्यचन शूद्रकस्य जीवितविवरणं लभते। राजशेखरस्य ग्रन्थे रामिलसोमिलनामधेयाभ्यां कविभ्यां कीर्तितः कश्चन शूद्रकराजः अस्ति। अनेकलोककथासु शूद्रकः आगच्छति। वामनस्य काव्यालङ्कारसूत्रवृत्तौ श्लेषगुणप्रधानरचनाभिः प्रसिद्धः कस्यचन शूद्रकः आगच्छति। एवं यद्यपि शूद्रकनामधेये बहूनां परामर्शाः दृश्यन्ते, तथापि बहुवादविवादैः चर्चाभिश्च अन्ते दण्डिपरामर्शे मृच्छकटिकस्य कर्ता स्थापितो भवति। तदनुसृत्य क्रिस्तोः पश्चात् प्रथमशतके जीवितं नीतः शूद्रकराजः मृच्छकटिकस्य कर्ता इत्येवमङ्गीक्रयते।

**शूद्रकस्य रूपकाणि**

इतिहासकाराणां मते शूद्रकेण एकमेव प्रकरणं रचितम्। तत्तु मृच्छकटिकनामधेयं भवति। अस्य रूपकस्य घटना प्रकरणलक्षणानुसारं भवति। अस्य इतिवृत्तं न प्रख्यातं, केवलं कविना कल्पितमितिवृत्तम्। बृहत्कथातः स्वीकृतमितिवृत्तम्। प्रथममेतद् इतिवृत्तं भासेन चारुदत्तप्रकरणे स्वीकृतमस्ति। इदं तु चारुदत्तमपेक्ष्य कल्पनासुन्दरं नानासम्भवपात्रचित्रीकरणेन समग्रं च भवति। अस्य आद्याश्चत्वारः अङ्काः चारुदत्तप्रकरणवदेव। किन्तु तदनन्तरं कथांशाः शूद्रकेण निर्मिताः भवन्ति।

नायकः चारुदत्तः धीरशान्तः। 'धीरः शान्तः प्रसन्नात्मा धीरशान्तो द्विजादिकः'इति तस्य लक्षणम्। चारुदत्तः शान्तः, प्रसन्नात्मा च धीरद्विजः। पूर्वं बहुधनी आसीदपि, नाटके सः अत्यन्तं दरिद्रः दृश्यते। दानधर्मादिना तस्य सर्वं धनं नष्टमभूत्। मूल्यमहिम्ना शोभनचरित्रवानस्ति चारुदत्तः। अस्मिन् नायिका वसन्तसेना भवति, या सुन्दरी, धनिका, कृपावती च काचित् वेश्या। प्रतिनायकः शकारः। यद्यपि चारुदत्तः दरिद्रः, तथापि तस्य स्वभावमहिमानं दृष्ट्वा धनिका वसन्तसेना तस्मिन् प्रेमबद्धा अभवत्। धनिकात् शकारेण यद्यपि विघ्नाः कृताः तथापि तान्

सर्वानपि अतिक्रम्य तयोः सुखसङ्गमः अभवत्। एतस्मिन् दश अङ्काः सन्ति। मृच्छकटिकस्य रचनायै निमित्तरूपेण स्थितं रूपकं चारुदत्तम्।

**शूद्रकस्य रचनावैशिष्ट्यम्**

मृच्छकटिके कथापात्राणि साधारणमनुष्याः एव। नाटकानां विषये तु उत्तममध्यमादयः कथापात्ररूपेण आगच्छन्ति। ग्रामीणजीवितकथायाः नाटकीयाविष्करणमित्यनेन एतत्प्रकरणस्य स्वीकरणं व्यापकतया प्राप्तम्। मृच्छकटिकस्य प्रशस्तेः मूलकारणमपि इतिवृत्तस्य जनकीयता एव। अस्य प्रकरणस्य रचना अत्यधिकप्रतिभया कृता अस्ति, यतः वैविध्यघटनानां सम्भवानां कथापात्राणां च विन्यासः अत्याकर्षक एव। बहूनि साहसिक-घटनानि अस्मिन् प्रकरणे उचितानुसारं योजितानि। राष्ट्रियकुटिलतायाः चित्राण्यपि अस्मिन् द्रष्टुं शक्यन्ते। दरिद्रस्य ऋणयाचनं, ऋणधनस्य प्रतिग्रहणाभावे दण्डनम्, एवं ग्रामनगरसाधारणानि कार्याणि अत्र विन्यस्तानि। नाटकीयतायाः सुमधुरमुहूर्तानि च नाटकेऽस्मिन् सन्ति। अत्र यद्यपि शृङ्गारः मुख्यतया दृश्यते, तथापि अन्येषां रसानामपि उचितकालसमावेशनं द्रष्टुं शक्यते। संक्षिप्य उच्यते चेत् प्रकरणग्रन्थानां मध्ये चूडारत्नं भवति मृच्छकटिकम्। एतत्प्रकरणं रङ्गाविष्करणे बहुयोग्यमिति विशेषः अपि दृश्यते।

**मृच्छकटिकम्- राष्ट्रस्य समाजस्य चोत्कृष्टं निदर्शनम्**

प्रस्तुतेऽस्मिन् मृच्छकटिकप्रकरणे प्राचीनभारतस्य सर्वविधं सामाजिकमनुशीलनमुपलभ्यते। अपि च प्राकृतिकं वर्णनमपि स्थाने स्थाने संस्थापितं वर्तते। नायकस्य चारुदत्तस्य वैदुष्यं दानवीरता, तथा च दारिद्र्यभावापन्नता तथापि निर्लोभता वर्णिताऽस्ति। समासतः कथनमिदं समुचितं भविष्यति यत् तत्तत्कालिकाः समस्ताः व्यवहाराः, न्यायालये वादप्रक्षेपाः नीतयश्च विभिन्नाङ्केषु समायाताः सन्ति। चौर्यकर्मणः समस्ताः क्रियाः युगपदेव सन्निविष्टाः सन्ति। कथनस्याभिप्रायोऽयं यदिह रूपके नगराध्यक्षाणां नागरिकाराणाश्च जीवनस्य- समाजस्य चैतादृक् सुमनोहरं चित्रमुपन्यस्तं तथा अन्यस्मिन् कस्मिन्नपि रूपके नोपलभ्यते। एतदभिधानं न केवलं प्रशंसात्मकमपितु यथास्थितिवर्णनात्मकं विद्यते। अस्मिन् रूपकलक्षणान्वितं व्यापारमन्तरेणापि सामाजिकाचारस्य प्रदर्शनं समधिकं गौरवं भजते, तस्मात् राष्ट्रस्यामूल्यनिधिभूतं प्रकरणरत्नमिदमिति।

अस्य प्रकरणस्य मुख्यं वैशिष्ट्यं वर्तते यदस्मिन् मध्यमवर्गीयाणां सामाजिकानामेव नाटकीयतत्त्वेषु सन्निवेशः वर्तते। तथा च चौर-द्यूत-गणिकादीनामत्र विस्तृतं वर्णनं विद्यते।

सामाजिकानां यथार्थचित्रणात् 'मृच्छकटिकम्' संस्कृतनाटकजगति यथार्थवादयुक्तमद्वितीयं (नाटकं) प्रकरणमस्ति। यत्र महाकविकालिदासे भवभूतौ च काव्यपरिपाकस्य भावनायाश्चोदात्तं वातावरणमस्ति तत्र मृच्छकटिके जीवनस्य वास्तविकतायाः चित्रणं विद्यते।

### 5.3.2. भट्टनारायणः

भट्टनारायणस्य वेणीसंहारं हि सर्वलक्षणोपेतं शास्त्रीयनाटकम्। भट्टनारायणोऽपि संस्कृतपरम्परेतरकविरिव स्वजीवनविषये नितान्तमेव मौनमालम्बते। वेणीसंहारं हि वैक्रमाष्टमशतकोत्तरार्द्धभवो वामनः काव्यालङ्कारसूत्राणां वृत्तौ स्मरति इति कवेरस्य तत्पूर्ववर्तित्वं सिध्यति। भट्टनारायणस्य वैक्रमसप्तमशतकमभितः स्थितिकालः स्पष्टः।

**वेणीसंहारम्**

महाभारतीयं कथावस्त्वाश्रित्य विरचितं नाटकं भवति वेणीसंहारम्। दुश्शासनापमानसन्तप्ता द्रौपदी घोरां प्रतिज्ञां कृता, यद् 'अहं दुश्शासने निहत एव केशसंयमनं करिष्यामि' इति। अस्याः एव घटनायाः पूर्ती महाभारतस्य या कथा साऽत्र वर्णिता। अत्र नाटके षडङ्काः सन्ति। प्रथमोऽङ्कः कृष्णचन्द्रस्य दौत्यात् प्रारभ्यते यत्र विफले भगवति कृष्णे कुपिते च युधिष्ठिरे समरदुन्दुभिरताड्यत। द्वितीयेऽङ्के दुर्योधनभानुमत्योः संवादः। तृतीये प्रवेशकेन धृष्टद्युम्नकृतद्रोणवधावगमः, कुपितस्याश्वत्थाम्नः सकलराजन्यकनिन्दा, कर्णाश्वत्थाम्नोर्वाक्कलहश्च प्रधानं वस्तु। चतुर्थेऽङ्के सुन्दरकद्वारा युध्दस्थितौ दुःशासनभीषणवधपर्यन्तायां निवेदितायां दुर्योधनस्य खेदः। पञ्चमेऽङ्के धृतराष्ट्रगान्धार्योः शोकात् दुर्योधनं पाण्डवैः सह सन्धिं विधातुमागृह्णीतः, परं नासौ मन्यते। षष्ठेऽङ्के चार्वाकमुनिवञ्चनया यावद् युधिष्ठिरो वह्निप्रवेशमभिलषति तावदेव सत्ये विदिते सर्वे आनन्दन्ति, द्रौपदी च दुःशासनसृजा केशान् बध्नाति। करुणरसस्य सुन्दरं दृश्यं कविरत्र प्रकटयति। नाटके शृंगार-वीभत्स-करुण-रसाः अङ्गरसाः सन्ति, वीररसं ते सर्वे समुत्तेजयन्ति।

### पुनरावृत्तिः (Recap)

- शूद्रकः उज्जयिन्याः कश्चन राजा।
- क्रिस्तोः पश्चात् प्रथमशतके शूद्रकः जिजीव।
- एकमेव प्रकरमम् – मुद्राराक्षसम्।

- अस्मिन् नायकः चारुदत्तः, नायिका वसन्तसेना च।
- रूपकरचनायां भासस्य प्रेरणा।
- भासस्य चारुदत्तनाटके अपि एषा कथा आगच्छति।
- चतुर्थाङ्कपर्यन्तं भासप्रकरणवत्।
- संस्कृतसाहित्ये सर्वोत्कृष्टं प्रकरणं भवति मृच्छकटिकम्।
- क्रिस्तोः पश्चात् प्रथमशतके जीवितं नीतः शूद्रकराजः मृच्छकटिकस्य कर्ता इत्येवमङ्गीक्रियते।
- मृच्छकटिकस्य इतिवृत्तं न प्रख्यातं, केवलं कविना कल्पितमितिवृत्तम्। बृहत्कथातः स्वीकृतमितिवृत्तम्।
- मृच्छकटिकस्य रचनायै निमित्तरूपेण स्थितं रूपकं भवति चारुदत्तम्।
- मृच्छकटिके कथापात्राणि साधारणमनुष्याः एव।
- मृच्छकटिकस्य प्रशस्तेः मूलकारणमपि इतिवृत्तस्य जनकीयता एव। प्रकरणग्रन्थानां मध्ये चूडारत्नं भवति मृच्छकटिकम्।
- अस्य प्रकरणस्य मुख्यं वैशिष्ट्यं च वर्तते यदस्मिन् मध्यमवर्गीयाणां सामाजिकानामेव नाटकीयतत्त्वेषु सन्निवेशः वर्तते। तथा च चौर-द्यूत-गणिकादीनामत्र विस्तृतं वर्णनं विद्यते।
- सामाजिकानां यथार्थचित्रणात् 'मृच्छकटिकम्' संस्कृतनाटकजगति यथार्थवादयुक्तमद्वितीयं राजनैतिकं (नाटकं) प्रकरणमस्ति।
- भट्टनारायणस्य वेणीसंहारं हि सर्वलक्षणोपेतं राजनैतिकं शास्त्रीयनाटकं भवति।
- महाभारतीयं कथावस्त्वाश्रित्य विरचितं नाटकं भवति वेणीसंहारम्।
- अत्र नाटके षडङ्काः सन्ति।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. मृच्छकटिकं कस्मिन् रूपकविभागे अन्तर्भवति ?
2. मृच्छकटिके कति अङ्काः सन्ति ?
3. मृच्छकटिकस्य नायिका का ?
4. मृच्छकटिकस्य नायकः कः?
5. मृच्छकटिकस्य कर्ता: कः ?

6. शूद्रकस्य कालः कः ?
7. मृच्छकटिके प्रतिनायकः कः ?
8. शास्त्रीयनाटकं वेणीसंहारस्य कर्ता कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. मृच्छकटिकस्य रचनायै निमित्तरूपेण स्थितं रूपकं किम् ? तत् केन कृतम्?
2. मृच्छकटिकस्य प्रशस्तेः मूलकारणं विशदयत।

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. प्रकरणग्रन्थानां मध्ये चूडारत्नं भवति मृच्छकटिकम्। विशदयत।
2. मृच्छकटिकप्रकरणस्य वैशिष्ट्यम्।
3. मृच्छकटिकं राष्ट्रस्य समाजस्य चोत्कृष्टं निदर्शनमिति सप्रमाणं लिखत्।
4. वेणीसंहारस्य वैशिष्ट्यम्।

## निर्दिष्टाभ्यासः (Assignment)

1. संस्कृतनाटकेषु मृच्छकटिकस्य वैशिष्ट्यं सयुक्तिकं सविस्तरं प्रतिपादयत।
2. भट्टनारायणस्य वेणीसंहारं हि सर्वलक्षणोपेतं शास्त्रीयनाटकम्। विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. प्रकरणे।
2. दश।
3. वसन्तसेना
4. चारुदत्तः।

5. शूद्रकः।
6. ए.डि.प्रथमशतकम्।
7. भट्टनारायणः।
8. शकारः।
9. भट्टनारायणः।

## सूचनाग्रन्थाः (References)


1. संस्कृतसाहित्यविमर्शः, कविराजद्विजेन्द्रनाथशास्त्री, भारतीप्रतिष्ठानं, उत्तरप्रदेशः, मयराष्ट्रनगरम्।
2. संस्कृतनिबन्धमञ्जूषा, डा.उदयशंकर् झा, चौखम्बा, सुरभारती प्रकाशन्, वाराणसी।
3. The Mṛcchakaṭika of Sudraka'by M.R.Kale, Digital library of India, Item 2015.326600
4. Mṛcchakaṭika kathāsańgraha – by Prof. V.C.Vasudevan Elayat
5. A Short History of Sanskrit Literature- T.K.Ramachandra Iyer, R.SVadyar&Sons, Kalpathy, Palakkad, 2018
6. Indian Kavya Literature, A.K.Warder, Motilal Banarsidass, New Deilhi, 1992

# Unit - 4
# विशाखदत्तः

## उद्देश्यानि (Learning Outcomes)

- संस्कृसाहित्ये प्रमुखरूपककाराणां परिचयं प्राप्नोति।
- विशाखदत्तं श्रीहर्षं च परिचाययति।
- संस्कृते राजनैतिकनाटकानाम् अवलोकनम्।
- मुद्राराक्षसनाटकस्य सामाजराष्ट्रतन्त्रपरं विज्ञानम् आर्जयति।

## प्राग्व्यपेक्षाः (Pre requisites)

संस्कृतसाहित्ये अतिप्रशस्तम् एकम् इतिहासात्मकं नाटकमस्ति। मुद्राराक्षसमिति तस्य संज्ञा। तत् केन विरचितम्? विशाखदत्तनाम्ना कविना। इतिहासात्मकं नाटकमित्यनेन किम्? यस्मिन् नाटके इतिवृत्तं इतिहासविषयो भवति, तादृशं नाटकम् इतिहासात्मकम्। मुद्राराक्षसनाटके मौर्यवंशराजानां कथा प्रस्तूयते।

राष्ट्रिय-सामूहिक-नीतिपराणि कार्याणि विशदीकृतानि संस्कृतनाटकानि सन्ति। तेषु प्रसिद्धानि भवन्ति विशाखदत्तस्य मुद्राराक्षसम्। मुद्राराक्षसे चाणक्यराक्षसयोः गूढनैतिकविलासः विशाखदत्तेन वर्णितोऽस्ति। कुटिलरीत्या राज्यभरणम् इष्टं नायकं राजपदवीमानयितुं कृतः प्रयत्नः च चित्रीकृतः।

## मुख्यपदानि (Key terms)

वटेश्वरस्य पौत्रः, अवन्तिवर्मणः, सप्त अङ्काः, चाणक्यः, इतिहासनाटकं राष्ट्रियनाटकम्, चन्द्रगुप्तः धीरोदात्तः, वीररसः, विशाखदत्तस्य अपरः कृतिः।

## DISCUSSION

## 5.4.1. विशाखदत्तः

विशाखदत्तस्य जीवितचित्रमधिकृत्य निश्चितज्ञानं ग्रन्थाद्वा अन्यतो वा न प्राप्यते। ग्रन्थस्य आमुखभागे तत्कर्तृविषये केचन परामर्शाः दृश्यन्ते।। प्रस्तावनासन्दर्भे सूत्रधारः प्रविश्य एवं वदति - 'सामन्तवटेश्वरदत्तपौत्रस्य महाराजभास्करदत्तसूनोः कवेर्विशाखदत्तस्य कृतिरभिनवं मुद्राराक्षसं नाम नाटकं नाटयितव्यमिति।' अस्मात् प्रस्तावादभिज्ञायते यत् विशाखदत्तः वटेश्वरस्य पौत्रः इति। वटेश्वरस्तु कश्चन सामन्तराजः। विशाखदत्तस्य पितुर्नाम पृथुः, यस्य महाराज इत्युपाधिरप्यासीदिति। ग्रन्थस्थभरतवाक्ये कस्यचन अवन्तिवर्मणः सूचना अस्ति। केषुचित् पाठेषु 'चिरमवतु महीं पार्थिवोऽवन्तिवर्मा' इत्यपि दत्तमस्ति। एतेन विशाखदत्तः राज्ञः अवन्तिवर्मणः आस्थानकविरासीदिति चिन्तितुं शक्यते। अवन्तिवर्मा प्राचीनकान्यकुब्जराज्यस्य राजा आसीत्। अवन्तिवर्मणः कालः क्रिस्तोः पश्चात् षष्ठशतकमित्येवम् इतिहासकाराणां मतम्। एतेन कवेरपि कालः षष्ठशतकम् इति ज्ञातुं शक्यते।

**मुद्राराक्षसम्**

इतिहासकाराणां मते विशाखदत्तेन एकमेव नाटकं रचितम्। तत्तु मुद्राराक्षसाख्यया वर्तते। मुद्राराक्षसे सप्त अङ्काः सन्ति। मुख्यनायकरूपेण चन्द्रगुप्तः, यः पाटलीपुत्रस्य राजा। एतस्य मौर्यः, वृषलः इति नामधेयद्वयमप्यस्ति। अनन्तरमागच्छति चाणक्यः; यः विष्णुगुप्ताख्यया अपि प्रसिद्धः; यस्य साहाय्येन चन्द्रगुप्तः नन्दान् पराजित्य राज्यसिंहासनाधिरोहणं कृतवान्। मलयकेतुः प्रतिनायकरूपेण आगच्छति, यः पर्वतकाख्यस्य राज्ञः पुत्रः, राक्षसेन सह सख्यं कृत्वा पाटलीपुत्रम् अधिरोढुम् यतते। अन्यस्तु राक्षसनामधेयः नन्दराजानां स्वामिभक्तः अमात्यः, यः मलयकेतुमुपयुज्य चन्द्रगुप्तं निष्कासितुमयतत। एवं चत्वारि कथापात्राणि अस्मिन् नाटके

मुख्यरूपेण आगच्छन्ति। एतानतिरिच्य अमुख्यरूपेण चन्दनदासादीनि कथापात्राण्यपि सन्ति। नाटकस्य नामधेयं मुद्राराक्षसमिति। मुद्रया जितः वशीकृतो वा राक्षसः मुद्राराक्षसः।

प्रथमाङ्कस्य प्रधानमितिवृत्तं मुद्रालाभः, प्रधानपात्रं चाणक्यश्च। चाणक्यगुप्तचरसम्भाषणेन नाटकस्य कथा उद्घाटिता भवति। नन्दानाममात्यस्य राक्षसस्य तन्त्रवैभवं बुद्धिसामर्थ्यं शासनवैदग्ध्यं कार्यप्राप्तिं चाधिकृत्य चाणक्यः सुज्ञातः आसीत्। चन्द्रगुप्तस्य प्रधानामात्यरूपेण राक्षसम् आनेतुम् उपायान् आलोच्य चाणक्यः तस्थौ। अत्रैव कथाबीजम् उपक्षिप्यते नाटककारेण। चन्दनदासस्य गृहात् अङ्गुलीमुद्रिकायाः प्राप्तिरपि अस्मिन्नङ्के। राक्षसविचार इति द्वितीयाङ्कस्य नाम। अस्मिन्नङ्के चन्द्रगुप्तवधाय राक्षसेन आयोजितानि, एवमनुचरैः संचालितानि च कार्याणि सर्वाणि चाणक्यबुद्ध्या निष्फलान्यभवन् इत्येतदवगम्य राक्षसस्य दुःखावस्था। तृतीयाङ्के चन्द्रगुप्तचाणक्ययोर्मध्ये व्याजकलहः। राक्षसोद्योगाख्ये चतुर्थाङ्के राक्षस एव प्रधानपात्रम्। पञ्चमाङ्कारम्भे राक्षसस्य मलयकेतोश्च विरोधः। षष्ठाङ्के बद्धस्य चन्दनदासस्य वधाय पद्धतिः। अन्तिमे अङ्के चन्दनदासमोचनाय आगतेन राक्षसेन सह चाणक्यस्य सख्यम्। तदनुसृत्य राक्षसः चन्द्रगुप्तस्य प्रधानसचिवपदे आगच्छति। एवं शत्रोः मित्रीकृतावस्थायाः वर्णनम्।

**विशाखदत्तस्य रचनावैशिष्ट्यम्**

मुद्राराक्षसम् इतिहासनाटकं राष्ट्रियनाटकमपि भवति। अन्यसंस्कृतनाटकेभ्यः भिन्नं भवति अस्मिन् स्वीकृतमितिवृत्तम्। इतिहासाद् आनीतस्य कथावस्तुनः स्वकीयानुभवेन भावनया च चमत्क्रियते कविना अत्र। अस्मिन् राष्ट्रतन्त्रज्ञतायाः, राष्ट्रियकुटिलप्रवर्तनानां च बहुचित्राणि लभन्ते। इतिवृत्तविकासाय अनुकूलसन्दर्भाणां सम्भवानां च चित्रीकरणं कविना सुन्दररीत्या कृतमस्ति। राष्ट्रियप्रवर्तकश्चायं प्रकृतविषयस्य नाटकाविष्करणे यानि यानि संयोजकानि आवश्यकानि नाटककारः स्वानुभवमण्डलादेव इतिवृत्तं स्वीकृतमिति कार्यं श्लाघनीयमेव। तदुपरि, तानि सर्वाणि भावनया परिचिन्वन् तेषां समञ्जसमेलनेन सुन्दरनाटकशिल्पं कृतवानयं

नाटककारः। कवेः प्रतिभाविलासस्य निदर्शनानि नाटके सर्वत्र द्रष्टुं शक्यन्ते। तस्य रचनाशैलिस्तु ऊर्जस्वला, प्रकाशनं तु ललितमाकर्षकञ्च। नाट्यशास्त्रे ज्योतिशास्त्रे च महान् पण्डितो भवतीति ग्रन्थादवगन्तुं शक्यते। नाटकनियमानां पालनं सुचिररूपेण अनेन कृतम्। अस्य नायकः चन्द्रगुप्तः, यः धीरोदात्तः। अस्मिन् नाटके वीररसः अङ्गित्वेन भासते।

**देवीचन्द्रगुप्तम्**

देवीचन्द्रगुप्तमस्यैव विशाखदत्तस्य अपरः कृतिः। रचनादृष्ट्या त्विदं प्रथमा कृतिः, अस्य सम्प्रति पञ्चैवाङ्का लभ्यन्ते। अत्र हि ध्रुवदेव्याश्चन्द्रगुप्तस्य च प्रेमकथा वर्णिताऽस्ति। शृङ्गारप्रधानेऽप्यस्मिन् नाटके राजनीतिस्तु निहितैव कविना।

समुद्रगुप्तस्य सम्राजो ज्येष्ठतनयो रामगुप्तः पितुरनन्तरं मगधसिंहासनमध्यतिष्ठत्। स हि स्वभावेन कातरोऽकर्मण्यश्चासीत्। बलदर्पितो हि शकराजस्तं हि समाक्रम्य सन्धये प्रार्थितस्तन्निमितं तत्पत्नी ध्रुवदेवीमुपायनरूपेणायाचत। रामगुप्त उपायान्तरमनवेक्ष्य तत्समर्पणाय तत्परोऽभूत्। किन्तु तदनुजो द्वितीयश्चन्द्रगुप्तस्तन्नैवासहत। स हि भ्रातृजायां निरुध्य स्वयमेव तद्वेषेण शकराजशिबिरं प्रविश्य तं हत्वा सकुशलं प्रत्यागतः। तद्विक्रमप्रीता हि ध्रुवदेवी रामगुप्तमुल्लङ्घ्य चन्द्रगुप्तमेव पतित्वेन स्वीचकार। एषैव कथाऽत्र सुनिपुणमवतारिताऽस्ति।

## पुनरावृत्तिः (Recap)

- विशाखदत्तस्य नाटकं मुद्राराक्षसमिति। एतद् इतिहासात्मकं नाटकम्।
- विशाखदत्तस्य कालः क्रिस्तोः षष्ठशतके।
- विशाखदत्तः अवन्तिवर्मणः आस्थानकविः।
- मुद्राराक्षसे सप्त अङ्काः।
- चन्द्रगुप्तः मुख्यनायकः।
- वीरः अङ्गी रसः।

- देवीचन्द्रगुप्तं विशाखदत्तस्य अपरः कृतिः।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. विशाखदत्तस्य नाटकस्य नामधेयं किम् ?
2. मुद्राराक्षसं दशरूपकेषु कस्मिन् विभागे अन्तर्भवति ?
3. मुद्राराक्षसे नायकः कः?
4. नायकविभागेषु चन्द्रगुप्तः कस्मिन्नन्तर्भवति ?
5. मुद्राराक्षसनाटके कति अङ्काः सन्ति ?
6. मुद्राराक्षसनाटकं कीदृशं नाटकं भवति ?
7. मुद्राराक्षसनाटके अङ्गीरसः कः ?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. विशाखदत्तस्य रचनावैशिष्ट्यम्।
2. देवीचन्द्रगुप्तम्।

## निर्दिष्टाभ्यासः (Assignment)

1. मुद्राराक्षसस्य ऐतिहासिककथांशानाश्रित्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. मुद्राराक्षसम्।
2. नाटके।
3. चन्द्रगुप्तः।
4. धीरोदात्तः।

5. सप्त।
6. ऐतिहासात्मकम्।
7. वीरः।

## सूचनाग्रन्थाः (References)


1. A.B.Keith, History of Sanskrit Literature, Motilal Banarasidas Publishers, Pvt.Ltd, New Delhi, 1990
2. Dr.K.Kunjunniraja and Dr.M.S.Menon, Samskritasahityacharitram (ed), Sahitya Academy, Trissur
3. The Mudrārākṣasam of Viśākhadatta'edited by M.R.Kale, Digital library of India.
4. The Mudrārākṣasam of Viśākhadatta'edited by Prof. K.H.Dgruva.
5. Sanskrit drama – A.B.Keith

BLOCK - 6

# संस्कृतसाहित्ये योगदानं कृतवत्सु केरलीयेषु प्रमुखाः

# Unit -1
# के.एन्. एषुत्तच्छन्, डा.पी.के.नारायणप्पिल्लै

## उद्देश्यानि (Learning Outcomes)

- केरलीयेषु प्रमुखान् संस्कृतसाहित्यकारान् परिचिनोति।
- केरलीयेषु प्रमुखानां संस्कृसाहित्यकाराणां योगदानं अवगच्छति।
- के. एन्. एषुत्तच्चन् महाभागस्य डा.पी.के.नारायणप्पिल्लमहोदयस्य च योगदानं अधिकृत्य ज्ञानं लभते।

## प्राग्व्यपेक्षाः (Pre requisites)

संस्कृतसाहित्ये मानवसभ्यतायाः सर्वाणि उपादेयोपादानानि सर्वाङ्गपरिपूर्णरीत्या सन्निवेशितानि। साहित्यं समाजस्य दर्पणः। समाजे यत् किमपि कार्यं क्रियते तत्साहित्ये प्रतिबिम्बितं भवति। तस्मादेव कारणात् साहित्यिकाः समाजे पूजिताः। प्रपञ्चेऽस्मिन् संस्कृतसाहित्यस्य यावान् विकासः परिलक्ष्यते न तथा इतरसाहित्येषु। संस्कृतसाहित्यं वैदिक-लौकिकभेदेन द्विधा विभज्यते। वैदिकसाहित्ये वेद-उपनिषत्-ब्राह्मण-आरण्यक-वेदाङ्ग-सूत्र-स्मृतिग्रन्थाः बहवो सन्ति। लौकिकसाहित्ये च रामायण-महाभारत-पुराण-काव्यादीनि अन्तर्भवन्ति। सर्वेषां महत्त्वं प्रासङ्गिकता च सर्वदा अस्माकं भारतीयसंस्कृतौ वर्तते इत्यत्र नास्ति सन्देहः। भारतवर्षे संस्कृतीनां महती परम्परा अस्तीति पौरस्त्य-पाश्चात्य-विपश्चितां मतम्। संस्कृतसाहित्ये वेद-व्याकरणं-साहित्य-दर्शन-काव्यादि विविधविषये चर्चाः परिलक्ष्यन्ते।

संस्कृतपण्डितैः साहित्यकारैश्च सम्पुष्टं भवति अस्माकं केरलदेशः। गैर्वाण्युपासकानां प्रतिभासम्पन्नानां कवीनां विदुषाञ्च जन्मभूमिरिति विदितमेव इयं भूमिः। ते च सारस्वतसारविदः कविताकामिनीं अनेकैः काव्यतल्लजैः मुक्ताफलकल्पैः विभूषयामासुः। प्रथितयशसां तेषां कवीनां शास्त्रज्ञानं साहित्ययोगदानं च निस्तुलमेव। तेषु प्रधानौ भवतः के.एन्. एषुत्तच्छन्, डा.पी.के.नारायणप्पिल्लै च। तेषां योगदानं अधिकृत्य वयं पठामः।

### मुख्यपदानि (Key terms)

केरलोदयम्, पञ्चमञ्जरी, लघुकथाः, पत्रिकाणि, विश्वभानुः, शबरीगिरीशकीर्तनम्, स्वामिविवेकानन्दस्य चरित्रं, कैरलीध्वनिः।

### DISCUSSION

अनेकैः संस्कृतपण्डितैः कविभिश्च अनुग्रहीतोऽयं केरलभूमिः। मानविक्रमन् एट्टन् तम्पुरान् सहृदयतिलकः के.रामपिषारटि, टि.गणपतिशास्त्रिः, वल्लत्तोल्ल् नारायणमेनोन् आट्टुर् कृष्णपिषारटि, के.रामपिषारटि, सि.कुञ्ञन् राजा, के.एम्.दिवाकरन् नम्पूतिरिप्पाट्, के.अच्युतपोतुवाल्, अनन्तनारायणशास्त्रिः, पि.सि.बालकृष्णपणिक्कर्, कुट्टिकृष्णमारार् च तेषु केचन प्रमुखाः। प्रो.के.पि.नारायणपिषारटि, प्रोफ.पि.सि देवस्या विद्यावाचस्पतिः वि पनोलि चेत्यादयः पण्डिताश्च संस्कृतसाहित्ये स्वीयैः योगदानैः संभाविताः।

एवं संस्कृतसाहित्यलोके प्रशस्ताः अनेके केरलीयकवयः पण्डिताश्च साहित्यविकासाय आत्मनः नैपुणीं समर्प्य ब्रह्मपदमारुरुहः। ते सर्वे तेषां ग्रन्थैः केरलीयानां चित्तेषु सततं नित्यचैतन्यरूपेण स्थितिमाप्नुवन्ति। एवं ते आधुनिककविभ्यो पण्डितेभ्यश्च प्रेरकाः इव वर्तन्ते।

## 6.1.1. के.एन्. एषुत्तच्छन्

आधुनिकसंस्कृतकविषु प्रथमगणनीयः भवति के.एन्. एषुत्तच्चन्। सः केरलसंस्थाने पालक्काट् प्रदेशे चेर्प्पुलश्शेरि नामके जनपदे १९११ तमे वर्षे भूजातः। केरलस्य कश्चन प्रसिद्धः लेखकः, संस्कृतपण्डितः भाषागवेषकश्च आसीत्।

मलयालसाहित्यरंगे प्रशस्तोऽयं केरलोदयः नाम महाकाव्यं संस्कृते व्यरचयत्। तेन विरचितस्य केरलोदयम् इत्याख्यस्य संस्कृतमहाकाव्यस्य कृते केन्द्रीयसाहित्य-अक्कादमि-पुरस्कारं अलभत। एतत् केरलस्य चरित्रकाव्यम् आधुनिकसंस्कृतकाव्येषु अद्वितीयं च भवति। अस्मिन् काव्ये केरलीयसंस्कृतेः वैविध्यं सम्यक् प्रदर्श्यते। केरलोत्पत्तिप्रतिपादिकायाः परशुरामकथायाः प्रभृति केरलराज्यरूपवत्करणं यावत् सर्वाः घटनाः अस्मिन् काव्ये प्रतिपाद्यन्ते। अस्मिन् काव्ये २१(एकविंशति) सर्गाः, २५०० श्लोकाः च अन्तर्भवन्ति। काव्यं एवं स्वप्नमञ्जरी, स्मृतिमञ्जरी, ऐतिह्यमञ्जरी, बोधमञ्जरी, चरित्रमञ्जरी इत्येवं पञ्च मञ्जरीत्वेन विभागं कृतवान्। इदं चरित्रकाव्यं सर्वेषां सहृदयानां हृदयाकर्षकमेव इति विषये सन्देहो नास्ति।

अत्र कथामालिका, कथाभूषणम्, कथामञ्जुषा च तस्य प्रसिद्धाः लघुकथाः भवन्ति। अत्र कुसुमोपहारं, प्रतिज्ञा च अस्य कवित भवतः। अस्य प्रबन्धाः अत्र इलयुं वेरुं (Ilayum Verum), कतिर्क्कुल (Katirkkula), उषुतनिलङ्ङल् (Uzhuta Nilangal,) एषिलंपाला(Ezhilampala), किरणङ्ङगल् (Kiranangal), दीपमाला (Dipamala) च। १९८१ ओक्टोबर् २८ दिनाङ्के तस्य अन्त्यम् अभवत्।

## 6.1.2. डा.पी.के.नारायणप्पिल्लै

संस्कृते मलयाले च पण्डितोऽसीत् डा.पी.के.नारायणप्पिल्लमहोदयः। १९१० तमे वर्षे तिरुवल्लादेशे सः जनिमलभत। केरलीयसंस्कृतसाहित्येषु अग्रगण्यः विद्वान् च भवति डा.पी.के.नारायणप्पिल्लामहोदयः। तस्य पितरौ गोदवर्मा, पुत्तिल्लत्त् लक्षियम्मा च। संस्कृते मलयालमभाषायां बिरुदं च तथा मुम्बई विश्वविद्यालयात् वैदिकसंस्कृते पी.एच्.डी बिरुदं अलभत। तिरुवितांकूर् विश्वविद्यालये अध्यापकः, केरलविश्वविद्यालये मलयालभाषाविभागस्य मेधावी च आसीत्। सः उल्लूर् स्मारकस्य संस्थापक-अध्यक्षः आसीत्। संस्कृतत्रैमासिकम्, भाषात्रैमासिकम्, ग्रन्थालोकम् इत्यादीनां पत्रिकाणां सम्पादकोऽसीत्।

विश्वभानुः शबरीगिरिशकीर्तनम् अस्य प्रधानौ संस्कृतग्रन्थौ। तेन विरचितेन विश्वभानुनामके महाकाव्ये स्वामिविवेकानन्दस्य चरित्रं वर्णितम्। अस्य काव्यस्य केन्द्रीयसाहित्य-अक्कादमि-संस्थया पुरस्कारं लब्धम्।

अनेकगवेषणपत्राणां लेखकत्वेन, प्राचीनसंस्कृतग्रन्थानां भाष्यकारत्वेन, प्रकाशकत्वेन, मलयालग्रन्थानां भाष्यकारत्वेन, निरूपकत्वेन च डा. पी. के. नारायणप्पिल्लमहोदयः अशोभत। ऋग्वेदे उषसूक्तेषु दृष्टान्तेषु प्रतिबिम्बिताः सामाजिक-सांस्कारिकाः विषयाः, ऋग्वेदपदपाठं, ऋग्वेदप्रातिशाख्यं अधिकृत्य पठनं च बहुधा अङ्गीकारं प्राप्तवान्। चिदात्मिकास्तवम्, श्रीधर्मशास्तस्तवम्, शिशोणादीस्तवम्, कन्याकुमारीभजे, शबरीगिरीशकीर्तनम् इत्यादयः कतिचन ग्रन्थाः, मयूरसन्देशस्य संस्कृतानुवादः, विवेकानन्दस्वामिं श्रीरामकृष्णपरमहंसं च अधिकृत्य विश्वभानुः, धर्मसागरः इति नामकं संस्कृतकाव्यद्वयम्।

मदनकेतुचरितम्, विष्णुविलासम्, शेषसमुच्चयम्, श्रीरामपञ्चशति, नीतितत्वाविर्भावः इत्यादयः अष्ट ग्रन्थाः संस्कृते प्रकाशिताः।

कैरल्यां एकादश संशोधिग्रन्थाः सन्ति। शिवासुदेवस्वम्, प्रचिनगद्यमातृकाः, पद्यरत्नम्, उण्णियच्चीचरितम्, भरतमाला, अध्यात्मरामायणम् (संशोधन-मातृका), हरिनामकीर्तनम् (सव्याख्यानम्), मयूरसन्देशम् (केरलहृदयम्-टीका), चिन्तारत्नम्, रामकथप्पाट्ट् (भाषापरिमलम्), भारतंपाट्ट्(भारतदीपिका) इत्यादीनि तेषु अन्तर्भवन्ति। प्राचीनमणिप्रवालम्, साहितीकटाक्षम्, साहित्यकेली, आशान्टे हृदयम्, संसारकौतुकम् च तेन साहित्यसम्बन्धि लिखितनिबन्धसङ्ग्रहाः सन्ति। सः संस्कृतेषु ध्वनिसिद्धान्तस्य व्याख्यानं करोति। कैरलीध्वनि इति ग्रन्थस्य १९७८ तमे वर्षे केरलसाहित्य-अक्कादमीपुरस्कारम् अलभत। वल्लत्तोल्-कवितायाः आधारेण चर्चां करोति अस्मिन् ग्रन्थे, सः अनेके ग्रन्थाः प्रकाशिताः सन्ति।

**पुरस्काराः**

केरल-साहित्यअकादमी-पुरस्कारः। (१९८७)

केन्द्रीय-साहित्य-अक्कादमी-पुरस्कारः। (१९८२)

केरलवर्मा कालिदासपुरस्कारः।

संस्कृतविदुषां कृते राष्ट्रपतिपुरस्कारः।

विद्याभूषणम्, साहित्यकलानिधिः, पण्डितरत्नम् इत्यादीनि।

## पुनरावृत्तिः (Recap)

- संस्कृतपण्डितैः साहित्यकारैश्च सम्पुष्टं भवति अस्माकं केरलदेशः।
- आधुनिकसंस्कृतकविषु प्रथमगणनीयः भवति के.एन्. एषुत्तच्छन्। अयं केरलोदयः नाम महाकाव्यं संस्कृते व्यरचयत्।
- केरलस्य कश्चन प्रसिद्धः लेखकः, संस्कृतपण्डितः भाषागवेषकश्च आसीत् डा.पी.के.नारायणप्पिल्लमहोदयः।
- डा.पी.के.नारायणप्पिल्लै १९१० तमे वर्षे तिरुवल्लादेशे जनिमलभत।
- विश्वभानुः शबरीगिरिशकीर्तनम् अस्य प्रधानौ संस्कृतग्रन्थौ भवतः।
- तेन विरचिते विश्वभानुनामके महाकाव्ये स्वामिविवेकानन्दस्य चरित्रं वर्णितम्।
- सः संस्कृतेषु ध्वनिसिद्धान्तस्य व्याख्यानं करोति। कैरलीध्वनि इति ग्रन्थस्य कर्ता डा.पी.के.नारायणप्पिल्लमहोदयः भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. केरलोदयस्य कर्ता कः ?
2. कस्मिन् काव्ये केरलोत्पत्तिम् अधिकृत्य प्रतिपादयति?
3. इलयुं वेरुं इत्यस्य लेखकः कः?
4. 'कुसुमोपहारं कविता' केन विरचितम्?
5. केरलोदये कति सर्गाः सन्ति?
6. डा.पी.के.नारायणप्पिल्लामहोदयस्य पितरौ कौ?
7. डा.पी.के.नारायणप्पिल्लामहोदयस्य प्रधानौ संस्कृतग्रन्थौ कौ?
8. विश्वभानुः नामकः ग्रन्थः केन विरचितः?
9. कैरलीध्वनि इति ग्रन्थस्य कर्ता कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. के.एन्. एषुत्तच्चन् त्रीणि पत्रिकाणां सम्पादकोऽसीत्। कानि ?
2. केरलोदये पञ्च मञ्जर्यः सन्ति। ताः काः ?
3. कैरलीध्वनि।
4. विश्वभानुः।

## एकैकया खण्डिकया उत्तरं लिखत।

**(Answer the following questions in a paragraph)**

1. केरलोदयम्।

## निर्दिष्टाभ्यासः (Assignment)

1. आधुनिकसंस्कृतकविषु प्रथमगणनीयः भवति के.एन्. एषुत्तच्चन्। विशदयत।
2. डा.पी.के.नारायणप्पिल्लमहोदयस्य योगदानं प्रतिपादयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. के.एन्. एषुत्तच्चन्।
2. केरलोदये।
3. के.एन्. एषुत्तच्चन्।
4. के.एन्. एषुत्तच्चन्।
5. २१(एकविंशतिः)।
6. गोदवर्मा पुत्तिल्लत्त् लक्षियम्मा च।
7. विश्वभानुः, शबरीगिरिशकीर्तनम्।
8. डा.पी.के.नारायणप्पिल्लै।
9. डा.पी.के.नारायणप्पिल्लै।

## सूचनाग्रन्थाः(References)


1. A Short History of Sanskrit Literature - Dr.T.K.Ramachandra iyer, R.S.Vadyar & sons, Kalpathy, Palakad.
2. Kerala Contribution to Sanskrit Literature – Dr.Kunjunni Raja.
3. Samskrutha sahithya charithram (Malayalam) two volumes- K. Kunjunni raja& M.S.Menon, Kerala sahitya academy, Thrissur.
4. Samskruthasahithya Charithram – k.c. Pillai. Current books, Thrissur.

# Unit - 2
# डा. बालरामप्पणिक्कर्, सि. वि. वासुदेवभट्टतिरिः

## उद्देश्यानि (Learning Outcomes)

- केरलीयेषु प्रमुखान् संस्कृसाहित्यकारान् परिचिनोति।
- केरलीयेषु प्रमुखयोः संस्कृसाहित्यकारयोः योगदानं अवगच्छति।
- के. बालरामपणिक्कर् महाशयस्य सि.वि वासुदेवभट्टतिरि महाशयस्य च कृतीनं ज्ञानं लभते।

## प्राग्व्यपेक्षाः (Pre requisites)

केरलजनाः संस्कृतभाषायां साहित्ये च बहुयोगदानं कृतवन्तः। प्रमुखाः संस्कृतविद्वासः केरलदेशे निवसन्ति स्म। संस्कृतसाहित्ये के. बालरामपणिक्कर् महाशयस्य सि.वि वासुदेवभट्टतिरि महाशयस्य च योगदानं अधिकृत्य वयं पठामः।

## मुख्यपदानि (Key terms)

महोपाध्याय, शिरोमणि, श्रीनारायणविजयकाव्यम्, श्रीनारायणगुरोः जीवचरित्रकाव्यं नवोत्थानचरित्रं, श्रीकृष्णविलासव्याख्यानम्, अन्नदात्रीचरितम्, चेरराजा उदयिनः चेरलाटन्, महा अन्नदात्री, विश्वविज्ञानकोशसम्पादकः, भारतेन्दुः, युधिष्टिरविजयः।

## Discussion

### 6.2.1. डा.के. बालरामप्पणिक्कर्

डा. के. बालरामपणिक्कर् (१९१०-१९७८) आधुनिकसंस्कृतसाहित्यक्षेत्रे उल्लेखनीयव्यक्तित्वम् आसीत्। कोल्लं जिल्लायां कुन्नत्तूरग्रामे १९१० तमे वर्षे तस्य जन्म अभवत्। तस्य पितरौ मणप्पिल्लेषत्त् कोच्चुण्णिपणिक्कर् नारायणियम्मा च आस्ताम्। तस्य

कुटुम्बम् आयुर्वेद-संस्कृतयोः प्रवीणाः आसन्। अपि च केरलस्य तृतीयः मुख्यमन्त्री आर्.शंकर् डा.बालारामपणिक्करस्य परिवारस्य सदस्यः आसीत्।

प्राथमिकशिक्षणानन्तरं संस्कृतसाहित्यस्य न्यायसिद्धान्तस्य च 'महोपाध्याय', 'शिरोमणि' इति परीक्षासु विजयं प्राप्य सः बिरुदबिरुदानन्तरं तिरुवनन्तपुरं नगरस्य संस्कृतकलालये प्राचर्यरूपेण कार्यं कृतवान्। १९७३ तमे वर्षे संस्कृतक्षेत्रे श्रीनारायणविजयकाव्यं रचितवान्। अयं ग्रन्थः भारतराष्ट्रपतिना पुरस्कृतः।

डा. के. बलरामप्पणिक्कर् विविधभाषासु निपुणः विद्वान् च आसीत्। तेन संस्कृत-आङ्ग्ल-कैरली भाषासु बहवः उल्लेखनीयाः ग्रन्थाः रचिताः। तस्य अधिकेषु मलयालग्रन्थेषु श्रीनारायणगुरोः दर्शनानां च चर्चा कृता आसीत्। तस्य आङ्ग्लग्रन्थेषु दार्शनिकवीक्षणानां चर्चा कृता अस्ति।

**मलयालकृतयः**

शकुन्तला, दक्षिणा, रघुराजचरितम्, व्यासन्टे चेरुकथकल्, रामायणकथकल्, महाभारतकथकल्, कालिदासकथकल्, दुर्गानन्दविलासव्याख्यानम्, श्रीकृष्णविलासव्याख्यानम्, रघुवंश व्याख्यानम्, विकारिवेदि, भगवद्गीतासारम्, श्रीनारायणगुरुदेवन् च अस्य महात्मनः विशिष्टाः कैरलीकृतयः भवन्ति।

**संस्कृतकृतयः**

अन्नदात्रीचरितम्, धातुदीपिका(धातूनां अनुक्रमणिका), काव्यमञ्जरी (लघुकविता), शब्दरूपावली, सिद्धान्तसमुच्चयः, श्रीनारायणगुरु-सुप्रभातम्, सुबन्तरूपावली (व्याकरणस्य प्राथमिक पाठ्यपुस्तकम्) श्री नारायणविजय महाकाव्यं च संस्कृतकृतिषु अन्तर्भवन्ति। एतेषु ग्रन्थेषु श्रीनारायणविजयं समाजपरिष्कर्तुः श्रीनारायणगुरोः जीवचरित्रकाव्यं भवति। तस्य प्रशस्तिः संस्कृते न्याय-वेदान्तादि शाखासु आसीत्। तस्य साहित्यशैली गंभीरा, लालिता च आसीत्। श्रीनारायणविजयम्, अन्नदात्रीचरितश्च अस्य प्रस्थावनयाः उत्तमे उदाहरणे स्तः।

**श्रीनारायणविजयं महाकाव्यम्**

श्रीनारायणविजयम् आधुनिकसंस्कृतमहाकाव्यं भवति, यत्र नारायणगुरोः जीवनवृत्तान्तं, सामाजिकक्रियाः, सिद्धान्ताः च अन्तर्भूताः। अस्मिन् काव्ये एकविंशतिः सर्गाः सन्ति, ये चतुर्षु

भागेषु विभक्ताः। प्रथमभागे सप्त सर्गाः, द्वितीयभागे त्रयः, तृतीये विभागे पञ्च, अन्तिमे विभागे षट् सर्गाः सन्ति। काव्यं श्रीनारायणगुरोः सफलजीवनं दर्शयति।

काव्यस्य प्रथमभागे गुरुनारायणस्य जन्म, शिक्षा, विवाहः, लौकिकजीवनविरक्तिः, तस्य मातुलस्य उपदेशः, तीर्थयात्रा, सुब्रह्मण्यस्य आराधना, तस्य आशीर्वादः, तटे विश्वनाथस्य प्रतिष्ठा-स्थापनं च। द्वितीयभागे शिवगिरिमठस्य स्थापनं, शारदादेव्याः देवत्वम्, ब्राह्मणविद्वद्भिः सह तस्य प्रभाषणं च अन्तर्भवन्ति। तृतीये भागे क्रैस्तवपुरोहितैः सह संवादः, सहोदरसंघरूपीकरणं च। अन्तिमे विभागे रवीन्द्रनाथटागोर् महोदयस्य सन्दर्शनं, श्रीनारायणधर्मसंस्थानस्थापनं, महासमाधिः च। आधुनिकमहाकाव्येषु साहित्ये श्रीनारायणविजयस्य महत् प्राधान्यं अस्ति। दण्डिनः तस्य काव्यदर्शे वर्णितं महाकाव्यलक्षणं व्यक्तरूपेण अयं महाशय अनुसरति। शान्तः काव्यस्य मुख्यः भावः। काव्यस्य अन्तिमभागे करुणारसः सम्बद्धः अस्ति। एतत् काव्यं शैल्यां अद्वितीयं आकर्षणं सरलतया च निर्मितं च आसीत्। इदं महाकाव्यं न केवलं काव्यसौन्दर्यात् अपि तु केरलस्य नवोत्थानचरित्रस्य कारणात् अपि महत्तरं अस्ति।

**अन्नदात्रीचरितम्**

प्रो. के बालरामपाणिक्कर् महाशयेन रचितं लघु संस्कृतनाटकं भवति अन्नदात्रीचरितम्। अनेकेषां संघकविनां प्रशंसार्हमभूदिदं नाटकम्। अस्मिन् पञ्चाङ्काः। नाटकमिदं महाकाव्येन केरलस्य प्राचीन-इतिहासेन सहबद्धम्। अस्य नाटकस्य नायकः आधुनिकः चेरराजः उदयिनः चेरलाटन्(अस्मिन् नाटके उदयवर्माकुलशेखरः) भवति। कुरुक्षेत्रयुद्धे समस्तसेनायाः नायकः तथा उदारमतिः च आसीत् उदयिनः। सः महा अन्नदात्री इति उपाधिं आर्जितवान्। प्रवेशनं, विष्कम्भम् इत्यादिषु सर्वेषु नाटकीयपक्षेषु नाट्यशास्त्रस्य नियमानाम् अनुसरणं वर्तते।

## 6.2.2. सि. वि. वासुदेवभट्टतिरिः

सि.वि वासुदेवभट्टतिरिः मलयालमभाषापण्डितः संस्कृतभाषापण्डितः व्याकरणभाषाशास्त्रे प्रख्यातः लेखकः च आसीत्।

सोऽयं महात्मा पत्तनन्तिट्ट जिल्लायां पन्तलदेशस्य समीपे चेरुमुगा इत्यत्र १९२० तमे वर्षे जन्म लेभे। सः उच्चविद्यालयस्य शिक्षकः, महाविद्यालयस्य शिक्षकः, विश्वविज्ञानकोशसम्पादकः च इति विविधमेखलासु प्रवर्तनं कृतवान्। नीतिशास्त्रम्, भाषाशास्त्रम्, व्याकरणम्, दर्शनम्, ज्योतिषम्, काव्यशास्त्रम् इत्यादिषु विषयेषु सः प्रवीणः आसीत्। भारतीयदर्शनम्,

नल्लमलयालम्, अभिनव-मलयालमव्याकरणम्, भाषाशास्त्रं, केरलपाणिनीयत्तिलूटे, औचित्यविचारम्, पत्रभाषा इत्याद्याः अनेके ग्रन्थाः सः रचयत्। भगवद्गीता, विशाखविजयम्, ध्वन्यालोकम्, कुवलयानन्दम्, गीतागोविन्दम्, नारायणीयम्, सुभाषितत्रिंशति इत्याद्याः टीकाः च व्यरचयत्। भारतेन्दुः इति संस्कृतमहाकाव्यमपि प्रकाशितम्। भारतीयदर्शनानां केरलसाहित्य-अक्कादमीपुरस्कारः प्राप्तः आसीत्। संस्कृते मलयालम्भाषायां च प्रायः द्वात्रिंशत् कृतयः रचितवान्। २००८ तमे वर्षे मार्चमासस्य २६ दिनाङ्के दिवंगतः।

**भारतेन्दुः**

सी.वि. वासुदेवभट्टतिरि महात्मागान्धिनः जीवन-इतिहासस्य वृत्तान्तः भारतेन्दुनामके महाकाव्ये प्रतिपादितम्। द्वादश(१२) काण्डानि ७८४ श्लोकाः च सन्ति। शीर्षके यथा प्रतिबिम्बिता कवेः अवधारणा अस्ति यत् गान्धी भारतस्य पूर्णिमा अस्ति। अस्य समाजिक-राजनैतिक-ऐतिहासिक-दार्शनिक-संकल्पनाः अस्मिन् महाकाव्ये चित्रिताः सन्ति।

**युधिष्टिरविजयम्**

केरलदेशे अन्यदेशे च अत्यधिकं प्रसिद्धं प्राप्तं "युधिष्टिरविजयः" इति कृतेः रचयिता भवति सी.वी वासुदेवभट्टतिरिः। अस्य काव्यस्य श्लोकानां अलङ्कारे यमकस्य (अनुप्रासप्रकारः) प्रयोगः उल्लेखनीयः अस्ति, अतः इदं काव्यं यमककाव्यत्वेन वर्गीकृतः। यमकं संस्कृतसाहित्ये विशिष्टः रचनालंकारः अस्ति। अस्मिन् समानशब्दयुक्तानां, परन्तु परस्परं अर्थान्तराणाम् अक्षराणां पुनरावृत्तिः भवति। अस्मिन् महाकाव्ये अष्टकाण्डाः सन्ति। अस्य ग्रन्थस्य प्रतिपाद्यविषयः महाभारतस्य कथा पाण्डुमृगया आरभ्य महायुद्धानन्तरं युधिष्ठिरस्य राज्याभिषेकेन समाप्तम्।

**ध्वन्यालोकानुवादः**

आनन्दवर्धनस्य ध्वन्यालोकस्य प्रत्येकं भागं 'उद्योतम्' इति नाम्ना प्रसिद्धम्। अस्य ध्वन्यालोकस्य अनुवादः सि.वि. वासुदेवभट्टतिरिः अकरोत्। प्रथमे उद्योते ध्वन्याभावादिवादीनां एकैकं विवेचनं कृत्वा निराकृत्य ध्वनिस्वरूपं स्पष्टयति। द्वितीये उद्योते ध्वनिभेदस्य विशदीकरणम्। तृतीयोद्योते ध्वनिभेदानां पदवाक्यप्रकाशनं विस्तरेण आरभ्यते। चतुर्थे उद्योते पूर्वकविभिः प्रस्तुताः विचाराः एव ध्वनिसङ्गत्या कथं अधिकं रोचकाः भवन्ति इति व्याख्यानेन आरभ्यते।

शौरिकथा, गजेन्द्रमोक्षम्, वासुदेवविजयम् इत्येते ग्रन्थाः च तेन विचितावेव।

## पुनरावृत्तिः (Recap)

- प्रो. के. बालरामपणिक्कर् (१९१०-१९७८) आधुनिकसंस्कृतसाहित्यक्षेत्रे उल्लेखनीयव्यक्तित्वम् आसीत्।
- कोल्लं जिल्लायां कुन्नत्तूरग्रामे १९१० तमे वर्षे तस्य जन्म अभवत्।
- श्रीनारायणविजयकाव्याय भारतराष्ट्रपतिना परस्कृतः।
- श्रीनारायणविजये आधुनिकसंस्कृतमहाकाव्यं, नारायणगुरोः जीवनवृत्तान्तं, सामाजिकक्रियाः, सिद्धान्ताः च सूचिताः।
- अन्नदात्रीचरितं प्रो. के बालरामपाणिक्कर् महोदयेन रचितं लघु संस्कृतनाटकं भवति।।
- सि.वि वासुदेवभट्टतिरिः मलयालमभाषापण्डितः संस्कृतभाषापण्डितः व्याकरणभाषाशास्त्रे प्रख्यातः लेखकः च आसीत्।
- सः भारतीयदर्शनम्, नल्लमलयालम्, अभिनवमलयालव्याकरणम्, भाषाशास्त्रं, केरलपाणिनीयत्तिलूटे, औचित्यविचारम्, पत्रभाषा इत्यादि अनेक ग्रन्थाः रचयत्।
- केरलदेशे अन्यदेशे च अत्यधिकं प्रसिद्धं प्राप्तं "युधिष्टिरविजयः" इति कृतेः रचयिता भवति सी.वी वासुदेवभट्टतिरिः।
- ध्वन्यालोकस्य अनुवादः सि.वि. वासुदेवभट्टतिरिः कृतवान्। शौरिकथा, गजेन्द्रमोक्षम्, वासुदेवविजयम् इत्येते तेन विचितान्येव।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. प्रो. के. बालरामपणिक्कर् कुत्र जनिम् अलभत?
2. श्रीनारायणविजयकाव्यस्य लेखकः कः?
3. समाजपरिष्कर्तुः श्रीनारायणगुरोः जीवचरित्रकाव्यं अवलम्ब्य प्रो. के. बालरामपणिक्कर् महोदयेन विरचितं काव्यं किम्?
4. अन्नदात्रीचरितम् इति ग्रन्थस्य रचनाकारः कः?
5. 'केरलपाणिनीयत्तिलूटे' कस्य कृतिरस्ति?
6. ध्वन्यालोकस्य अनुवादः कः कृतवान्?
7. भारतेन्दुः कस्य कृतिरस्ति?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. प्रो. के. बालरामपणिक्कर्महोदयस्य संस्कृतरचनाकार्याणि कानि?
2. केषु शास्त्रेषु प्रसिद्धः आसीत् सि.वि वासुदेवभट्टतिरिः?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. प्रो. के. बालरामपणिक्कर्।
2. श्रीनारायणविजयम्।
3. भारतेन्दुः।
4. युधिष्टिरविजयम्।

## निर्दिष्टाभ्यासः (Assignment)

1. प्रो. के. बालरामपणिक्कर् महाशयस्य, सि.वि वासुदेवभट्टतिरिमहोदयस्य च योगदानं अधिकृत्य निबन्धं रचयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. कोल्लं जिल्लायां कुन्नत्तूर् ग्रामे।
2. प्रो. के. बालरामपणिक्कर्।
3. श्रीनारायणविजयम्।
4. प्रो. के. बालरामपणिक्कर्।
5. सि.वि. वासुदेवभट्टतिरेः।
6. सि.वि. वासुदेवभट्टतिरिः।
7. सि.वि. वासुदेवभट्टतिरेः।

## सूचनाग्रन्थाः(References)


1. A Short History of Sanskrit Literature - Dr.T.K.Ramachandra iyer, R.S.Vadyar & sons, Kalpathy, Palakad.
2. Kerala Contribution to Sanskrit Literature – Dr.Kunjunni Raja.
3. Samskrutha sahithya charithram (Malayalam) two volumes- K. Kunjunni raja& M.S.Menon, Kerala sahitya academy, Thrissur.
4. Samskruthasahithya Charithram – K.C. Pillai. Current books, Thrissur.

# Unit - 3
# पि.सि.देवस्य, ए.आर्.राजराजवर्मा

## उद्देश्यानि (Learning Outcomes)

- केरलीयेषु प्रमुखान् संस्कृसाहित्यकारान् परिचिनोति।
- केरलीयेषु प्रमुखानां संस्कृसाहित्यकाराणां योगदानम् अवगच्छति।
- पि. सि. देवस्य महायशयस्य ए. आर्. राजराजवर्मा महायशयस्य च योगदानं अधिकृत्य ज्ञानं लभते।

## प्राग्व्यपेक्षा: (Pre requisites)

केरलीयाः अनेके संस्कृतोपासकाः कवयः च आसन्। तेषु प्रमुखैः भवतः क्रिस्तुभागवताख्यस्य महाकाव्यस्य कर्ता प्रोफ.पि.सि.देवस्य, केरलपाणिनिरिति विख्यातः ए. आर्. राजराजवर्मा च। तयोः योगदानम् अधिकृत्य पठामः।

## मुख्यपदानि (Key terms)

प्लाक्किल् चाक्को देवस्य, क्रिस्तुभागवतम्, श्रीयेशुचरितम्, हेलन्, केरलपाणिनिः, आङ्गलसाम्राज्यम्।

## Discussion

### 6.3.1. पि. सि. देवस्य

प्रोफसर् पि. सि. देवस्य महोदयः १९०६ तमे वर्षे कोट्टयंदेशे कुटमालूर्ग्रामे क्रिस्त्यन्-कुटुम्बे जनिमलभत। अस्य पूर्णनामधेयं प्लाक्किल् चाक्को देवस्य इति। मलयालसंस्कृतभाषयोः बिरुधधारी अयं मार् इवानियोस् कलाशालायां प्राध्यापकः आसीत्। अनेन बहवः कृतयः विरचिताः। तासु प्रमुखं भवति क्रिस्तुभागवतम्। अस्य क्रिस्तुभागवतम् इत्याख्यस्य संस्कृतमहाकाव्यस्य कृते १९८० तमे वर्षे केन्द्रीयसाहित्य-अक्कादमी-पुरस्कारं(१९८०) अलभत। केरलसाहित्य-अक्कादमीपुरस्कारः अपि महाभागमेनम् अन्वग्रहीत्। स्वस्य शततमे वयसि २००३अक्तूबर् २० दिनाङ्के महानुभावोऽयं दिवंगतः।

**क्रिस्तुभागवतम्।**

श्रीयेशुदेवस्य जीवनचरितं अवलम्ब्य संस्कृतभाषायां रचितं प्रथमं महाकाव्यं भवति क्रिस्तुभागवतम्। क्रिस्तोः जीवचरित्रं तस्य उपदेशः च ३३ सर्गै १६०० श्लोकैः अतिविस्तृतेन वर्णितं भवति। श्रीयेशुचरितमवलम्ब्य विरचिते महाकाव्ये श्रीयेशुदेवस्य महद्वचनानि त्यागपूर्णजीवितं च मनोहररीत्या वर्णितमासीत्। अयं भक्तानामनुग्रहाय कृतः उत्तमग्रन्थः भवति। जोसफस्य विवाहार्थं कन्यादर्शनादारभ्य येशुदेवस्य स्वर्गेरोहणं यावत् संपूर्णं काव्येऽस्मिन् वर्णितं वर्तते। काव्यस्यास्य सप्तदशे सर्गे शिष्यान् प्रति येशुदेवस्य उपदेशाः वर्णिताः उपलभ्यन्ते। पर्वतोपरि स्थित्वा कृतस्यास्य उपदेशः 'गिरिप्रभाषणम्' इति प्रसिद्धिं प्राप।

**कृतयः**

मलयालकृतयः-

भारतशिल्पिकल् (Bharata Shilpikal), बालनगरम् (Balanagaram), पतिमून्नु कथकल् (Pathimoonnu Kathakal), पोलीस् कथकल् (Police kathakal), राजनीति (Rajaneethi), अमेरिक्कन् संस्कारम् (American Samskaram), मतं इरुपतां शतकत्तिल् (Matham Irupatham Shatakathil), कला सौरभम् (Kala Sourabham), कथासरित्सागरम् (Katha sarith sagaram), मरुभूमियिले गर्जितम् (Marubhoomiyile Garjitham), हेलन् (Helen), वेतालकथकल् (Vethala kathakal) चास्य प्रमुखाः कैरलीग्रन्थाः।

संस्कृतम् - जनकीयकाव्यम् (Janakeeyakavyam), कर्षकगीतम् (Karshakageetham) चास्य क्रिस्तुभागवतातिरिक्तौ संस्कृतग्रन्थौ भवतः।

## 6.3.2. ए.आर्.राजराजवर्मा

केरलपाणिनिरिति विख्यातः ए. आर्. राजराजवर्मा १०३५ तमे वर्षे कुम्भमासे नवमे दिने (क्रि.श. २१-०२-१८६३) पूर्वभाद्रपदनक्षत्रे केरलेषु चङ्ङनाश्शेरि नाम्नि देशे लक्ष्मीपुरराजमन्दिरे जातोऽभूत्। षट्पञ्चाशे वयसि १०९३ तसे मिथुनमासे चतुर्थे दिने (क्रि.श.१८-०६-१९९८) स्वर्गमगात्। आङ्गलसाम्राज्यं नाम महाकाव्यस्य कर्ता ए. आर्. राजराजवर्मा भवति। अस्मिन् काव्ये २३ सर्गाः १९०० श्लोकाः च सन्ति। आङ्गलसाम्राज्यं चरित्रकाव्यमस्ति। इदं हि इन्ड्या ब्रिट्टीष् चरित्रं अतिव्यक्ततया विस्तृतया च वर्णितः संस्कृत ग्रन्थः भवति। ए. आर्. राजराजवर्मा इतिहासपुराणेषु, स्मृतौ, कोशेषु, व्याकरणज्योतिषादि शास्त्रा विषयेषु नितरां पण्डितः।

कृतयः

संस्कृतगीतकानि - गणपत्यष्टकम्, देवीमङ्गलम्, श्री विशाखसिंहासनारोहाभिनन्दनम्, चित्रनक्षत्रमाला, कादम्बरीसङ्ग्रहः, पञ्चाशतपूर्तिपञ्चाशिका, राजनीत्यष्टकम्, वीणाष्टकम्, भृङ्गविलापः, विटविभावरी, मेघोपालम्भ्यः, विमानाष्टकम्, पितृप्रलापः, प्रसादमाला।

दण्डकानि - देवीदण्डकम्, श्रीमूलषष्टिपूर्तिदण्डकम्।

संस्कृतचम्पूः - रुक्मिणीहरणम्।

संस्कृतप्रबन्धाः - तुलाभारः, अष्टबन्धाष्टबन्धः।

संस्कृत-एकाङ्करूपकम् – गैर्वाणीविजयः।

संस्कृतमहाकाव्यम् – आङ्गलसामाज्यम्।

मलयालप्रबन्धाः - कैरलीचरितम्, मलयालभाषायाः आधुनिकावस्था, अर्धेकारः।

मलयाललघुकाव्यम् – मलयविलासः।

जीवचरित्रम् – केरलवर्मावलियकोयित्तम्पुरान्।

कैरल्यां विवर्तिताः ग्रन्थाः – मेघदूतम्।

खण्डकाव्यम् – मेघदूतम्।

महाकाव्यम् - भाषाकुमारसम्भवः, रघुवंशः।

नाटकानि - उद्दालचरितम्, मलयालशाकुन्तलम्, मालविकाग्निमित्रम्, चारुदत्तः, स्वप्नवासवदत्तम्।

व्याख्यानानि - मयूरसन्देशव्याख्यानम्, ऋग्वेदव्याख्यानम्, नलचरितव्याख्यानम् (कान्तारतारकम्)।

व्याकरणग्रन्थाः – मलयालव्याकरणम्, केरलपाणिनीयम्, शब्दशोधिनी, प्रथमव्याकरणम्, मध्यमव्याकरणम्।

मलयाले संस्कृतव्याकरणम् - मणिदीपिका

संस्कृतव्याकरणम् - लघुपाणिनीयन् - प्रथमोभागः, लघुपाणिनीयम् - द्वितीयोभागः।

निघण्टुः - साङ्केतिकपदनिघण्टुः, आङ्गलेय-मलयालानिघण्टुः।

मलयालभाषायां साहित्यशास्त्रग्रन्थाः-

अलङ्कारशास्त्रम् – भाषाभूषणम्।

छन्दः शास्त्रम् – वृत्तमञ्जरी।

गद्यसाहित्यचरित्रम् – साहित्यसाह्यम्।

ज्योतिषग्रन्थाः-

ग्रन्थाः - ज्योतिप्रकाशकम्

प्रबन्धाः - हैन्दवज्यौतिषम्, केरलज्यौतिषम्, कालगणनम्।

## पुनरावृत्तिः (Recap)

- प्रोफसर् पि. सि. देवस्यमहोदयः१९०६ तमे वर्षे कोट्टयंदेशे कुटमालूर्ग्रामे क्रिस्त्यन्कुटुम्बे जनिमलभत।
- अस्य पूर्णनामधेयं प्लाक्किल् चाक्को देवस्य इति।
- पि. सि. देवस्यया विरचितं संस्कृतमहाकाव्यं भवति क्रिस्तुभागवतम्।
- श्रीयेशुचरितमवलम्ब्य विरचिते महाकाव्ये श्रीयेशुदेवस्य महद्वचनानि त्यागपूर्णजीवितं च मनोहररीत्या वर्णितञ्च।
- केरलपाणिनिरिति विख्यातः ए. आर्. राजराजवर्मा।
- आङ्गलसाम्राज्यं नाम संस्कृतमहाकाव्यस्य कर्ता ए. आर्. राजराजवर्मा भवति। आङ्गलसाम्राज्यं चरित्रकाव्यमस्ति।
- ए. आर्. राजराजवर्मा एवं इतिहासपुराणादिषु, स्मृतौ, कोशग्रन्थेषु व्याकरणज्योतिषादिशास्त्रेषु नितरां पण्डितः
- संस्कृतचम्प्वाः रुक्मिणीहरणस्य कर्ता ए. आर्. राजराजवर्मा।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. प्रोफसर् पि. सि. देवस्य महोदयस्य जन्म कुत्र अभवत्?
2. प्रोफसर् पि. सि. देवस्य महोदयस्य पूर्णनामधेयं किम्?
3. पि. सि. देवस्यमहोदयेन विरचितं संस्कृतमहाकाव्यं किम्?

4. केरलपाणिनिरिति नाम्ना प्रसिद्धः कः?
5. ए. आर्. राजराजवर्मणा विरचितं संस्कृतमहाकाव्यं किम्?
6. संस्कृतचम्प्वाः रुक्मिणीहरणस्य कर्ता कः?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।

**(Answer the following questions in one or two sentences)**

1. ए. आर्. राजराजवर्मा कस्मिन् विषये अत्यधिकपण्डितः आसीत्?
2. ए. आर्. राजराजवर्मणा विरचितानि संस्कृतगीतकानि कानि?

## एकैकया खण्डिकया उत्तरं लिखत।

**(Answer the following questions in a paragraph)**

1. क्रिस्तुभागवतम्।
2. आङ्गलसाम्राज्यम्।

## निर्दिष्टाभ्यासः (Assignment)

1. पि. सि. देवस्यमहोदयस्य योगदानम् अधिकृत्य लिखत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. कोट्टयंदेशे कुटमालूर् ग्रामे।
2. प्लाक्किल् चाक्को देवस्य।
3. क्रिस्तुभागवतम्।
4. ए. आर्. राजराजवर्मा।
5. आङ्गलसाम्राज्यम्।
6. ए. आर्. राजराजवर्मा।

## सूचनाग्रन्थाः(References)


1. A Short History of Sanskrit Literature - Dr.T.K.Ramachandra iyer, R.S.Vadyar & sons, Kalpathy, Palakad.
2. Kerala Contribution to Sanskrit Literature – Dr.Kunjunni Raja.
3. Samskrutha sahithya charithram (Malayalam) two volumes- K. Kunjunni raja& M.S.Menon, Kerala sahitya academy, Thrissur.
4. Samskruthasahithya Charithram – K.C. Pillai. Current books, Thrissur.

# Unit - 4
# केरलवर्मा वलियकोयित्तम्पुरान्, मेल्पत्तूर् नारायणभट्टपादः

## उद्देश्यानि (Learning Outcomes)

- केरलीयेषु प्रमुखाः संस्कृसाहित्यकाराः परिचिनोति।
- केरलीयेषु प्रमुखाः संस्कृसाहित्यकारस्य योगदानं अवगच्छति।
- केरलवर्मा वलियकोयित्तम्पुरान् मेल्पुत्तूर् नारायणभट्टितिरि च योगदानं अधिकृत्य ज्ञानं लभते।

## प्राग्व्यपेक्षाः (Pre requisites)

केरलेषु अनेके संस्कृतकवयः आसन्। तेषु प्रमुखाः भवति केरलकालिदासः इति प्रथितः केरलवर्मवलियकोयित्तम्पुरान्। संस्कृतभाषायां महापण्डितः आसीत् मेल्पुत्तूर् नारायणभट्टपादः। तेषां योगदानं अधिकृत्य पठामः।

## मुख्यपदानि (Key terms)

केरलकालिदासः, जन्मनक्षत्रमहोत्सवप्रबन्धम्, मयूरसन्देशम्, मणिप्रवालरीति, मार्गवर्णना, द्वितीयाक्षरप्रासम्, क्रिक्कट्ट् क्लब्, प्रक्रियासर्वस्वम्, पाणिनीयसूत्राणां सम्पूर्णव्याख्यानात्मकं धातुकाव्यम्, अपाणिनीयप्रामाण्यसाधनम्, नारायणीयम्।

## DISCUSSION

### 6.4.1. केरलवर्मा वलियकोयित्तम्पुरान्

केरलवर्मा वलियकोयित्तम्पुरान् केरलकालिदासः इति नाम्ना प्रसिद्धः भवति। तस्य जन्म क्रिस्त्वब्दे चत्वारिंशदुत्तराष्टशताधिकसहस्रतमे(१८४०) वर्षे केरलस्य चङ्ङनाश्शेरी नगरस्य लक्षीपुरे राजभवने आसीत्। पुष्यनक्शत्रजा राज्ञी मुल्लप्पल्लिनम्पूतिरिः च अस्य पितरौ आस्ताम्। १८५९ तमे वर्षे तिरुवितांकूर् आट्टिङ्ङल् मातृभूमिं मन्यमानायाः महाराणी भरणी तिरुनाल् लक्ष्मीभाई इत्यस्याः विवाहं कृत्वा वलियकोयित्तम्पुरान् इति नाम्ना निवसति स्म।

स्वातितिरुनाल् महाराजस्य पिता राजराजवर्मा वलियकोयित्तम्पुरान् केरलवर्मावलियाकोयिताम्पुरान् महोदयस्य मातुः मातुलः आसीत्। विद्या-मनोरञ्जनयोः उत्कृष्टतां प्राप्तवान् तम्पुरान् नाटक-काव्य-चाम्पूकाव्य-सिद्धान्तकौमुदी-चित्रमीमांसा-शास्त्रग्रन्थान् अभ्यासं करोति स्म। सः वेदान्त- तर्कशास्त्र-व्याकरणादिषु अग्रगण्यः आसीत्। डॉ. वेयरिंग् इत्यस्य संरक्षणे आङ्ग्लेयशिक्षा च प्राप्तवान्। बाल्यकाले एवायं धीमान् कवितारयताम् अतीव कुशलः आसीत्। षोडशे वयसि एकया निशया जन्मनक्षत्रमहोत्सवप्रबन्धं नाम संस्कृतकाव्यं अलिखत्।

कैरल्यां प्रसिद्धः कविः निबन्धकारः च सः मयूरसन्देशस्य कर्ता भवति। मणिप्रवालरीतिं अवलम्ब्य तेन विरचितं सन्देशकाव्यं भवति मयूरसन्देशम्। काव्ये अस्मीन् स्वस्य जीवनस्य परमप्रधानः कश्चित् अंशः प्रपाद्यते। आयिल्यं तिरुनाल् महाराजस्य अप्रियत्वात् तिरुवितांकूर् प्रदेशतः केरलवर्मा निष्कासितोऽभवत्। सः हरिप्पाट्ट् देशे सस्मिंश्चित् राजभवने कारागगरे बद्धः अवसत्। तदा सः महाकविः मयूरमेकं स्वप्रियतमायाः समीपं सन्देशहरत्वेन भावनया प्रेषितवान्। एतदेव अस्य सन्देशकाव्यस्य प्रतिपाद्यो विषयः। मार्गवर्णनावसरे केरलस्य विविधान् देशान् मनोहारितया काव्येऽस्मिन् अवर्णयत्। मयूरसन्देशं कालिदासस्य मेघसन्देशम् आश्रित्य मलयालम्भाषायां सन्देशकाव्यम् अस्ति। अस्य १४१ सुन्दराणि श्लोकानि द्वितीयाक्षरप्रासयुक्तानि सन्ति। पूर्वभागः हरिपाट्ट् तिरुवनन्तपुरमपर्यन्तं मार्गस्य वर्णनं, उत्तरभागः तु तिरुवनन्तपुरस्य वर्णनं प्रियाय सन्देशः च। एतत् ग्रन्थं केवलं ४८ दिवसेषु एव लिखितम्।

कालिदासस्य अभिज्ञानसकुन्तलस्य प्रथमतया कैरल्यां विवर्तनं कृत्वा "केरलकालिदासः" इति नाम्ना प्रसिद्धिं प्रप्तवान् केरलवर्मा वलियकोयित्तम्पुरान्। महाभागोऽयं विविधासु भाषासु अतीव कुशलः असीत्। कैरल्यां संस्कृते च विविधान् ग्रन्थान् विलिख्य सः भाषायाः पोषणम् अकरोत् च। कैरल्यां गद्यशाखायाः विकासाय सः प्रायतत। 'कविसार्वभौमः' इत्यपि प्रसिद्धस्य अस्य संस्कृतकाव्येषु विशाखविजयम् महाकाव्यम्, क्षमापणसहस्रम्, यमप्रणाशसहस्रम्, श्रीपद्मनाभशतकञ्च नितरां प्रसिद्धानि।

चिरं भषापोषिणीसभायाः अध्यक्षस्थानं अलंकुर्वन् सः न केवलं भाषाविषयेषु किन्तु मृगयाविनोदे, अश्वधावने, चतुरङ्गे च समर्थः आसीत्। इदं प्रथमतया अनन्तपुरे महाशयः क्रिक्कट्ट् क्लब् स्थापितवान्। चङ्ङनाशेरी लक्षीपुरे राजभवने लब्धजन्मा अयं चतुर्देशोत्तरनव शताधिकसहस्रतमे(१९१४) वर्षे दिवंगतोऽभूत्।

तर्कमीमांसापण्डितः आसीत् अयं राजः। सर्वज्ञविजयं, पालाषिमदनं, स्यमन्दकं, सतीविवाहश्च अस्य प्रधानग्रन्थाः।

### 6.4.2. मेलपत्तूर् नारायणभट्टपादः

मेल्पत्तूर् नारायणभट्टतिरि संस्कृतभाषायां महापण्डितः आसीत्। केरलस्य उत्तरभागे निलानद्याः उत्तरतीरे चन्दनक्कावुनामकग्रामे मेल्पुत्तूर इति प्रतिथे नम्पूतिरिब्राहमणकुले नारायणभट्टस्य जन्म अभवत्। तस्य पिता मातृदत्तः, माता पय्यूर् द्विजकुलान्तर्गतैका च आस्ताम्।

अस्य जीवनकालविषये प्रमाणानि उद्धृत्य डा. के कुञ्जुण्णिराजामहोदयेन उक्तं यद् श्रीमन्नरायणभट्टपादतः १५६० तमवर्षततः १६६६ तमवर्षं यावद् जीवितवानिति। मीमांसादिशास्त्राणि स्वपितुः सकाशात्, वेदशास्त्रं माधवाचार्यात्, तर्कशास्त्रं दामोदराचार्यात्, व्याकरणशास्त्रम् अच्युतपिषारटि महोदयात् च अधीतवान् इति।

**नारायणभट्टपादस्य कृतयः**

महापण्डितेन प्रक्रियासर्वस्वम्, धातुकाव्यम्, अपाणिनीयप्रामाण्यसाधनम् इति त्रयः संसकृतव्याकरणग्रन्थाः विरचिताः। तन्त्रवार्तिकनिबन्धनम् मानमेयोदयम् इति द्वौ पूर्वमीमांसाग्रन्थौ श्रीमन्नारायणीयम्, श्रीपादसप्ततिः, गुरुवायुपुरेशस्तवम्, सूक्तश्लोकाः, इत्याद्याः स्तोत्रग्रन्थाः राजसूयम्, दूतकाव्यम्, अष्टमीप्रबन्धः, कोटिविरहप्रबन्धः, निरनुनासिकप्रबन्धः, वामनावतारप्रबन्धः, दक्षयागप्रबन्धः, सन्तानगोपालचम्पू, कुचेलवृत्तचम्पू, स्वाहासुधाकरचम्पू, मत्स्यावतारचम्पू, सुभद्राहरणचम्पू, पाञ्चालीस्वयंवरचम्पू, इत्याद्यनेके प्रबन्धाः गोश्रीनगरवर्णना, वीरकेरलप्रशस्तिः, देवनारायणप्रशस्तिः, बिंबलीशगोदवर्मप्रशस्तिः, मानविक्रमप्रशस्तिः इत्याद्यनेकाः प्रशस्तयः आश्वलायनक्रियाक्रमम्, चतुरंगाष्टकम्, मुक्तकश्लोकाः इत्यादयः नारायणभट्टपादेन विरचिताः कैश्चन प्रशस्तग्रन्थाः। नारायणभट्टपादस्य सर्वासु कृतिषु विशेषप्रयोगेषु काव्यशोभा इव व्याकरणपाटवमपि समीचीनरीत्या द्रष्टुं शक्नुमः। तेन विरचिताः त्रयः व्याकरणग्रन्थाः तस्य व्याकरणपाण्डित्यप्रतिपादकाः भवन्ति।

**प्रक्रियासर्वस्वम्**

नारायणभट्टस्य कृतिषु प्रधानस्थानं वहत्ति पाणिनीयसूत्राणां सम्पूर्णव्याख्यानात्मकं प्रक्रियासर्वस्वम्। चम्पकश्शेरी देवनारायणराजः आज्ञया भट्टपादेन प्रक्रियासर्वस्वस्य रचना कृता। ग्रन्थनाम तथा खण्डाविभागाः, तेषां नामानि च देवनारायणेन निर्दिष्टानि। तदाज्ञानुसारेणैव ग्रन्थरचनां कृतवान् नारायणभट्टपादः। अस्मिन् ग्रन्थे विषयविभागमनुसृत्य देवनारायणेन

निर्दिष्टाः विंशतिखण्डाः सन्ति। एवं विंशतिखण्डात्मकस्यास्य रचनाकालः १६१७ तमे वर्षे आरभ्य १९१९ तमे वर्षे समाप्तिंगतमिति पण्डितानामभिप्रायः।

प्रथमे संज्ञाखण्डे माहेश्वरसूत्रानन्तरं हलन्त्यमिति प्रथमसूत्रम्। अनन्तरम् आदिरन्त्येन सहेता, तस्य लोपः इति क्रमेण सूत्राणि घटितानि। अष्टाध्यायीक्रमं परित्यज्य सूत्राणि प्रक्रियासौकर्यार्थं विषयक्रमेण कथितानि। सूत्राणां विषयक्रमे प्रक्रियाकौमुदी एव मार्गदर्शिका।

अस्मिन् ग्रन्थे पाणिनीयसूत्राणां वार्त्तिकानां, परिभाषाणां, गणानां, धातूनाम्, उणादीनां च प्रतिपादनमस्ति। यथायोग्यं वार्त्तिकानि उदाहृतानि। सूत्ररूपेण पाणिनिना स्वीकृता परिभाषाः परिभाषाखण्डे निबद्धाः। ज्ञापकन्यायरूपेण परिगणिताः परिभाषाः समाहृत्य न्यायखण्डे प्रतिपादिताः च। माधवीयधातुवृत्तिमनुसृत्य सर्वे धातवः धातुखण्डे उदाहृताः। सूत्राणां व्याख्यानावसरे यथाक्रमं गणान्तर्गतानि पदानि सम्पूर्णतया उदाहृतानि। अव्ययानि अपि सुबन्तप्रतिरूपाव्ययानि, तद्धितप्रतिरूपाव्ययानि इत्येवंविधं यथायोग्यमुदाहृतानि।

**अपाणिनीयप्रामाण्यसाधनम्**

व्याकरणशास्त्रे नारायणभट्टपादस्य अतिमहदेका सम्भावना भवति अपाणिनीयप्रामाण्यसाधनम् इत्याख्यमेकं क्रोडपत्रम्। पाणिनीयानुसारी केचित् वैयाकरणाः केचन शब्दाः अपाणिनीयप्रयोगाः इति निन्दन्ति। पाणिनेः अर्वाचीनाः चन्द्रभोजादयः तेषां व्युत्पादनं प्रयोगं च कृतवन्तः। तेषां स्वीकारेण मुनित्रयसिद्धान्तविरोधः न भविष्यन्ती चिन्ता सयुक्तिकं प्रतिपादयति नारायणभट्टपादः अस्मिन् क्रोडपत्रे। प्रक्रियासर्वस्वे अनेन प्रयुक्तानाम् अपाणिनीयप्रयोगानां विमर्शनं चोलदेशीयैकेन वैनतेयपण्डितेन कृतम्। अस्य विमर्शनमवखण्ड्य सुदर्शनसमालमबी सोऽपि नारायणोऽधुना

नामकपण्डितः नारायणभट्टस्य मतं समर्थितवान्।
वैनतेयभवत्पक्षमाक्रम्य स्थानुमारभे।

इति श्लोकेन क्रोडपत्रमारभ्यते। अस्य उपक्रमे एव तेन एवमुक्तम्-

पाणिन्युक्तं प्रमाणं न तु पुमरपदं चन्द्र भोजादिसूत्रम्?
तेऽप्याहुर्यल्लघिष्ठं न खलु बहुविदामस्ति निर्मूलवाक्यम्।
बह्वङ्गीकारभेदो भवति गुणवशात् पाणिनेः प्राक्कथं वा,
पूर्वोक्तिं पाणिनिश्चाप्यनुवदति, विरोधेऽपि कल्प्यो विकल्पः ।।

पाणिनीयव्याकरणस्य बहुभिः अङ्गीकरणे कारणं तस्य गुणविशेषः एव। किन्तु बहुज्ञानां चन्द्रभोजादीनां वचनं कथम् अप्रमाणं भवेत्? पाणिनेः पूर्वमपि वैयाकरणाः आसन्, तेषां

वचनानि पाणिनिः अपि उद्धरति। पाणिनिना अनुक्ताः केचन शब्दाः कात्यायनेन पतञ्जलिना च उक्ताः। तैः अनुक्ताः शब्दाः भोजाद्यन्यैः वैयाकरणैः उक्ताः। तेऽपि महापण्डिताः आसन्, निर्मूलं किञ्चित् तै न वदेयुः। तस्मात् तेषां वचनानि च प्रमाणान्येव। पाणिनेः अन्येषां वैयाकरणानां च वचनानां परस्परं यत्र वैरुध्य दृश्यते, तत्र अन्यतरस्य स्वीकरणमुचितम्, इति व्याकरणविषये आधुनिकानामप्यङ्गीकार्या विधिः नारायणभट्टपादेन स्वीकृता। एवं वैनतेयेन ये ये वादाः उन्नीताः तान् सर्वान् युक्तियुक्तं प्रतिपक्षबहुमानेन सह खण्डयति भट्टपादः।

ततोऽन्यग्रन्थसन्दोहैर्मदुक्तान्येव साधयन्
वैनतेयो ममात्यन्तं बन्धुरेवेति शोभनम्।।

एवं, वैनतेयः अन्यग्रन्थानुद्धृत्य मम वादगतिमेव समर्थयति। तस्मात् तत्रभवान् ममबन्धुरेवेति उक्त्वा सः क्रोडपत्रम् उपसंहरति ।

**धातुकाव्यम्**

सरसस्य कस्यचित् इतिवृत्तस्य प्रतिपादनेन सह यत्किञ्चित् शास्त्रमपि उदाहरन्ति चेत् तत् शास्त्रकाव्यमिति प्रसिद्धम्। नारायणभट्टपादेन कृतं एक व्याकरणशास्त्रकाव्यं भवति धातुकाव्यम्। केरलीयेन केनचित् वासुदेवेन वासुदेवविजयम् इति व्याकरणशास्त्रकाव्यं रचितवान्, अस्य अनुबन्धत्वेन विरचितं भवति इदम्। वासुदेवविजयस्योपरि माधवेन विरचितं धातुवृत्तिग्रन्थमाश्रित्य भीमप्रणीतधातुपाठान्तर्गतान् धातून् तदीयक्रमेण अस्मिन्नुदाहरति।

उदाहृतं पाणिनिसूत्रमण्डलं प्राग्वासुदेवेन तदूर्ध्वतोऽपरः।
उदाहरत्यद्य वृकोदरोदितान, धातून् क्रमेणैव हि माधवाश्रयात्।।

इति श्लोकेन धातुकाव्यमारभ्यते। कंसदूतस्य अक्रूरस्य गोकुलयात्रादारभ्य कंसवधान्ता श्रीमद्भागवतकथा अस्य काव्यस्य इतिवृत्तम्। सर्गत्रयात्मकेऽस्मिन् काव्ये श्रीकृष्णलीला वर्णिता। धातूनां तिङन्तरूपाणि कृदन्तरूपाणि चौदाहरणरूपेण प्रदर्शितानि। प्रायेण एकस्य धातोः एकमुदाहरणमिति रूपेण प्रदर्शितवान्, किन्तु कदाचित् धातूनामर्थभेदं सूचयितुं पदभेदं प्रकाशयितुं च अधिकरूपाणि उदाहर्तुं सः विमुखः नासीत्।

द्विनवतिपद्यात्मकप्रथमसर्गं सम्पूर्णं तथा द्वितीयसर्गस्य त्रिचत्वारिंशत्पद्यानि च भ्वादिगणधातूनामुदाहरणानां प्रदर्शनाय उपयुक्तवान्। अदादि-जुहोत्यादि-दिवादि-स्वादि-तुदादि-स्थादिगणधातूनि द्वितीयसर्गस्य त्रिचत्वारिंशत् पद्येषु उदाहृतानि। तृतीयसर्गस्य षट्षष्टिपद्येषु तनादि क्र्यादि-चुरादिगणान्तर्गतधातूनि उदाहृतानि। एवम् आहत्य चतुश्चत्वारिंशदधिकद्विशत (२४४) पद्यानि धातुकाव्ये सन्ति।

**नारायणीयम्**

केरलवास्तव्यो नारायणभट्टोऽस्य प्रणेता प्रणयनकालश्च १६४२ मितर्वक्रमाब्दः। नारायणीयं हि श्रीभागवतगता कथा सर्वाः सम्क्षिप्ताः। अत्र हि द्वादशस्कन्धाः १०३६ श्लोकाश्च। ग्रन्थोऽयं मालावारादिप्रदेशे बहु मतः। इदं स्तोत्रं नारायणविषयत्वात् नारायणरचितत्वाच्च नारायणीयं इत्याख्यायन्ते। इदं न केवलं भक्तिरसपरिपोषशालितया स्तोत्ररत्नं, किन्तु काव्यगुणपुष्पकलतया काव्यरत्नमपि भवति। श्रीभागवतस्येवैतस्य पारायणमभ्युदयकामाः केरलेषु शिष्टा भक्तिपूर्वमाद्रियन्ते। इदं प्रौढत्वाद् बहुत्र व्याख्यासापेक्षम्। अतो देशमङ्गलवार्यकृतया ललितया व्याख्यया समेतं कृत्वा संशोधनाधारत्तया मूलस्य ५, व्याख्यायाः ३ आदर्शा राजकीयग्रन्थशालात उपलब्धाः।

अस्य कविनारायणभट्टः अच्युतपिषारोटिसकाशाद् व्याकरणादिविद्या अधीतवान्। कदाचिदेष वातरोगाभिभूतो गुरुवायूर्पुरेश्वरं श्रीकृष्णमस्य स्तोत्ररत्नस्य प्रत्यहमेकैकदशकानिर्माणसपर्यया परितोष्य कल्पो बभूव। अथ लोकोत्तरेण कवित्वेन, पाण्डित्येन, चरित्रेण, ग्रन्थनिर्माणेन च प्रथमानोऽयं अम्बलप्पुष्रपुराधिपेन, राज्ञा देवनारायणेन सविशेषमुपलालितस्तदास्थानभूषणतां प्रतिपेदे। नारायणीयस्यान्तिमपद्ये 'आयुरारोग्यसौख्यम्' इति पदेन तत्समाप्तिकलिदिनसंख्या सूच्यत इति शिष्टोपदेशपरम्परा। सा च संख्या १७१२२१० इत्येवंरूपं १५९० तमः क्रौस्ताब्दो भवतीति स एव महाकवेर्नारायणभट्टस्य जीवितसमयो निश्चितः।

## पुनरावृत्तिः (Recap)

- केरलवर्मा वलियकोयित्तमपुरान् केरलकालिदासः इति प्रसिद्धः भवति।
- केरलकालिदासः १८४० तमे वर्षे चङ्ङनाश्शेरी प्रदेशे जनिम् अलभत।
- मयूरसन्देशस्य कर्ता केरलाकालिदासः।
- कालिदासस्य अभिज्ञानसकुन्तलस्य प्रथमतया कैरल्यां विवर्तनं कृत्वा "केरलकालिदासः" इति नाम्ना प्रसिद्धं प्राप्तवान् केरलवर्मा वलियकोयित्तम्पुरान्।
- केरलाकालिदासेन विरचितं महाकाव्यं विशाखविजयम्।
- मेल्पुत्तूर् नारायणभट्टितिरि संस्कृतभाषायां महापण्डितः आसीत्।
- महापण्डितेन तेन प्रक्रियासर्वस्वम्, धातुकाव्यम्, अपाणिनीयप्रामाण्यसाधनम् इति त्रयः

संसकृतव्याकरणग्रन्थाः विरचिताः।
- नारायणभट्टपादस्य सर्वासु कृतिषु विशेषप्रयोगेषु काव्यशोभा इव व्याकरणपाटवमपि समीचीनरीत्या द्रष्टुं शक्नुमः।
- नारायणभट्टस्य कृतिषु प्रधानस्थानं वहत्ति पाणिनीयसूत्राणां सम्पूर्णव्याख्यानात्मकं प्रक्रियासर्वस्वम्।
- व्याकरणशास्त्रे नारायणभट्टपादस्य अतिमहदेका सम्भावना भवति अपाणिनीयप्रामाण्यसाधनम् इत्याख्यमेकं क्रोडपत्रम्।
- नारायणभट्टपादेन कृतं एक व्याकरणशास्त्रकाव्यं भवति धातुकाव्यम्।

## वस्तुनिष्ठप्रश्नाः (Objective type Questions)

1. केरलवर्मा वलियकोयित्तमपुरान् कुत्र जनिम् अलभत?
2. केरलाकालिदासः इति प्रसिद्धः कः ?
3. केरलवर्मा वलियकोयित्तमपुरान् विरचितं महाकाव्यं किम् ?
4. मयूरसन्देशस्य कर्ता कः?
5. प्रक्रियासर्वस्वं कस्य कृतिरस्ति?
6. नारायणभट्टपादेन कृतं एक व्याकरणशास्त्रकाव्यं किम्?

## एकेन वाक्येन द्वाभ्यां वा उत्तरं लिखत।
**(Answer the following questions in one or two sentences)**

1. केरलवर्मणा विरचिताः प्रमुखग्रन्थाः के?
2. मेल्पुत्तूर् नारायणभट्ट त्रयः संस्कृतव्याकरणग्रन्थाः विरचिताः। के?
3. प्रक्रियासर्वस्वं नाम कृतेः प्रदिपाद्यविषयं किम्?

## एकैकया खण्डिकया उत्तरं लिखत।
**(Answer the following questions in a paragraph)**

1. मयूरसन्देशम्।
2. प्रक्रियासर्वस्वम्।

3. अपाणिनीयप्रामाण्यसाधनम्।
4. नारायणीयम्

## निर्दिष्टाभ्यासः (Assignment)

1. केरलीयानां संस्कृतकवीनां तेषां काव्यानां च विशदयत।
2. केरलवर्मा वलियकोयित्तमपुरान् महोदयस्य योगदानम्।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type Questions)

1. चङ्ङनाशेरी लक्ष्मीपुरे राजभवने
2. केरलवर्मा वलियकोयित्तमपुरान्।
3. विशाखविजयम्।
4. केरलवर्मा वलियकोयित्तमपुरान्।
5. नारायणभट्टपादस्य।
6. धातुकाव्यम्।

## सूचनाग्रन्थाः(References)


1. A Short History of Sanskrit Literature - Dr.T.K.Ramachandra iyer, R.S.Vadyar & sons, Kalpathy, Palakad.
2. Kerala Contribution to Sanskrit Literature – Dr.Kunjunni Raja.
3. Samskrutha sahithya charithram (Malayalam) two volumes- K. Kunjunni raja& M.S.Menon, Kerala sahitya academy, Thrissur.
4. Samskruthasahithya Charithram – k.c. Pillai. Current books, Thrissur.

**Model Question Paper**
**Set - 01**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………                                   Reg. No : ………...............
                                                 Name : ………………....

FIFTH SEMESTER B.A. SANSKRIT EXAMINATION

DISCIPLINE SPECIFIC ELECTIVE COURSE - B21SN03DE SAMSKRUTHASAHITYETHIHASAHA

(CBCS - UG)

2022-23 - Admission Onwards

Time: 3 Hours                                    Max Marks: 70

---

**सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः। संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या।**

**SECTION - A**

**(प्रथमो भागः)**

**I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** (10x1=10)

(Answer any ten Questions in a word or Sentence)

1. कति वेदाः सन्ति ?
2. निरुक्तस्य रचयिता कः?
3. उपनिषद् इत्यस्य अपरं नाम किम्?
4. रामायणे कति काण्डाः सन्ति?
5. श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि उपलभ्यते ?
6. महाभारते अङ्गीरसः कः?
7. रघुवंशमहाकाव्ये कति सर्गाः भवन्ति ?
8. संस्कृतगद्यसाहित्यजगति प्रथमः गद्यकारः कः?
9. महाकविकालिदासप्रणीतं संदेशकाव्यं किंम् ?
10. देवेन सह भक्तस्य व्यवहारमाध्यमम् किम् ?
11. कुलशेखरवर्मणा विरचितं स्तोत्रकाव्यं किम् ?
12. शक्तिभद्रस्य नाटकं किम् ?
13. नैषधीयचरितस्य कर्ता कः ?
14. विश्वभानुः नामकः ग्रन्थः केन विरचितः?

15. अन्नदात्रीचरितम् इति ग्रन्थस्य रचयिता कः?

**SECTION - B**

**(द्वितीयो भागः)**

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** (5x2=10)
(Answer any five Questions in one or two sentences)

16. ऋग्वेदस्य संवादसूक्तानि कानि?
17. रामायणे कति काण्डानि सन्ति? तेषाम् नामानि लिखत?
18. संस्कृतसाहित्ये पञ्चमहाकाव्यानि कानि?
19. संस्कृतसाहित्ये प्रख्यातानि सन्देशकाव्यानि कानि ?
20. स्तोत्रम् इत्येषः शब्दः किमर्थे प्रयुज्यते ?
21. शङ्कराचार्यस्य त्रीणि प्रमुखस्तोत्रकाव्यानि कानि ?
22. कुलशेखरवर्मणा विरचितं नाटकद्वयं किम् ?
23. बृहत्रय्यां केषां ग्रन्थानां समावेशः भवति?
24. केरलोदये पञ्च मञ्जर्याः सन्ति। ताः काः ?
25. प्रो. के. बालरामपणिक्कर्महोदयस्य संस्कृतरचनाकार्याणि कानि?

**SECTION – C**

**(तृतीयो भागः)**

**III.केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** (6x5=30)
(Answer any six Questions)

26. वेदानां नामानि कानि?
27. वेदाङ्गे शिक्षायाः प्रयोजनं किम् ?
28. भरतस्य भ्रातृभक्तिमधिकृत्य लिखत।
29. 'महत्वात् भारवत्वात् महाभारतमुच्यते' विशदयत?
30. काव्यस्य किं प्रयोजनम्?
31. पञ्चमहाकाव्येषु रघुवंशस्य प्राधान्यं विशदयत।
32. मुकुन्दमाला।
33. नारायणीयम्।
34. "नैषधं विद्वदौषधम्" विशदयत।
35. प्रकरणग्रन्थानां मध्ये चूडारत्नं भवति मृच्छकटिकम्। विशदयत।
36. केरलोदयम्।

37. क्रिस्तुभागवतम्।

## SECTION– D

## (चतुर्थो भागः)

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** (2x10=20)

(Write an essay on any two of the following)

38. आधुनिकशिक्षायां वैदिकसाहित्यस्य प्रभावमधिकृत्य उपन्यस्यत।

39. महाभारतस्य महात्म्यम्।

40. संस्कृतसन्देशकाव्यानि अधिकृत्य विशदयत।

41. केरलीयानां संस्कृतकवीनां तेषां काव्यानां च लघु टिप्पणीं लिखत।

**Model Question Paper**
**Set - 02**

# SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: .........                                    Reg. No : .........................

Name : ......................

FIFTH SEMESTER B.A. SANSKRIT EXAMINATION
DISCIPLINE SPECIFIC ELECTIVE COURSE - B21SN03DE SAMSKRUTHASAHITYETHIHASAHA
(CBCS - UG)
2022-23 - Admission Onwards

Time: 3 Hours                                    Max Marks: 70

**सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः । संस्कृतलेखने देवनागरीलिपिरुपयोक्तव्या ।**

## SECTION - A
**(प्रथमो भागः)**

**I.एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।** (10x1=10)
(Answer any ten Questions in a word or Sentence)

1. सामवेदस्य उपवेदस्य नाम किम् ?
2. वेदाङ्गेषु मुखत्वेन गृहीतं किम्?
3. नचिकेतयमसंवादः कस्यामुपनिषदि वर्तते ?
4. वाल्मीकिरामायणे कस्य रसस्य प्रधानता वर्तते?
5. महाभारतस्य कर्ता कः ?
6. वेदानन्तरं सर्वप्राचीनानि सर्वप्रधानानि किं भवन्ति ?
7. महाकविकालिदासस्य महत्तरं शृङ्गारकाव्यं किं भवति ?
8. कथासरित्सागरस्य कर्ता कः?
9. कोकिलसन्देशस्य कर्ता कः?
10. गद्यपद्यमयं काव्यं किं भवति?
11. प्रथमचम्पूग्रन्थः कः?
12. मृच्छकटिकस्य कर्ताः कः ?
13. मुद्राराक्षसनाटकं कीदृशं नाटकं भवति ?
14. केरलपाणिनिरिति नाम्ना प्रसिद्धः कः?
15. केरलाकालिदासः इति प्रसिद्धः कः ?

## SECTION – B
## (द्वितीयो भागः)

**II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत।** (5x2=10)
(Answer any five Questions in one or two sentences)

16. यजुर्वेदस्य भागद्वयं किम्?
17. द्वयोः छन्दशास्त्रग्रन्थयोः नाम लिखत?
18. पुराणस्य पञ्चलक्षणानि कानि ?
19. किं नाम गद्यम् ?
20. स्तोत्रसाहित्यं द्विधोपविभक्तम्। के?
21. हर्षवर्धनस्य द्वे स्तोत्रे प्रथिते स्तः। के?
22. श्रीहर्षः कस्य राज्याश्रितः आसीत्?
23. मृच्छकटिकस्य प्रशस्तेः मूलकारणं विशदयत।
24. केरलवर्मणा विरचिताः प्रमुखग्रन्थाः के?
25. मेल्पत्तूर् नारायणभट्टेन त्रयः संस्कृतव्याकरणग्रन्थाः विरचिताः। के?

## SECTION – C
## (तृतीयो भागः)

**III.केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत।** (6x5=30)
(Answer any six Questions)

26. ऋग्वेदमन्त्रेषु प्रधानदेवताः अधिकृत्य विशदयत?
27. कठोपनिषदः वैशिष्ट्यं किम् ?
28. 'व्यासोच्छिष्टं जगत्सर्वं' इत्युक्त्याः औचित्यं शोधयत।
29. पुराणानां मुख्यप्रयोजनं किम्?
30. कादम्बरी-लघु टिप्पणी लिखत।
31. मेघसन्देशम् ।
32. चम्पूकाव्यलक्षणं लिखत।
33. नलचम्पूः।
34. वेणीसंहारस्य वैशिष्ट्यम्।
35. विशाखदत्तस्य रचनावैशिष्ट्यम्।
36. आङ्गलसाम्राज्यम्।
37. नारायणीयम्

## SECTION – D

**(चतुर्थो भागः)**

**IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।** (2x10=20)

(Write an essay on any two of the following)

38. भरतीयानां जीवनसम्प्रदाये पुराणस्य स्वाधीनं महत्वं च विशदयत।
39. संस्कृतसाहित्ये काव्यसङ्कल्पः काव्यस्वरूपं काव्यभेदान् च उपन्यस्यत।
40. संस्कृतसाहित्ये प्रसिद्धचम्पूकाव्यानि अधिकृत्य विशदयत।
41. संस्कृतसाहित्ये श्रीहर्षस्य योगदानमधिकृत्य विशदयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

संस्कृतसाहित्येतिहासः

COURSE CODE: B21SN03DE

YouTube


Sreenarayanaguru Open University

Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841



ISBN 978-81-982562-0-1

9 788198 256201